

Almira 3
Shelf 3
32

४१०२ हठप्रदीपिका

एवंपरमगुरुनमस्कारलक्षणंमंगलंकृत्वाविघ्नबाहुल्येमंगलबाहुल्यस्यापेक्षितत्वात्स्वगुरुनमस्कारात्मकंमंगलमाचरन्नस्यग्रंथस्यविषयप्रयोजनादि प्रदर्शयति श्रीमंतंगुरुंश्रीगुरुंनाथंश्रीगुरुनाथंस्वगुरुमितियावत्॥ प्रणम्यप्रकर्षेणभक्तिपूर्वकंनत्वास्वात्मारामेणस्वात्मारामाख्येनयोगिनायोगोस्यास्तीतितेनकेवलं राजयोगायकेवलंराजयोगार्थंहठविद्याउपदिश्यतेत्यन्वयः हठविद्यायाराजयोगएवमुख्यंफलंनसिद्धयइतिकेवलपदस्याभिप्रायः।सिद्धयस्त्वानुषंगिक्यः एतेनराजयोगफलसहितोहठयोगोस्यग्रंथस्यविषयःराजयोगद्वाराकैवल्यंचास्यफलंतत्कामश्चाधिकारीग्रंथविषययोःप्रतिपाद्यप्रतिपादकभावःसंबंधःग्रंथस्यकैवल्यस्यचप्रयोज्यप्रयोजकभावःसंबंधःग्रंथाभिधेयस्यसफलयोगस्यकैवल्यस्यचसाध्यसाधनभावःसंबंधइत्युक्तं २ ननुमंत्रयोगसगुणध्याननिर्गुणध्यानमुद्रादिभिरेवराजयोगसिद्धौकिंहठविद्योपदेशेनेत्याशंक्यव्युत्थितचित्तानांमंत्रयोगादिभीराजयोगासिद्धेर्हठयोगादेवराजयोगसिद्धिंवदन्ग्रंथंप्रतिजानीते भ्रांत्येति

प्रणम्यश्रीगुरुंनाथंस्वात्मारामेणयोगिना केवलंराजयोगायहठविद्योपदिश्यते २
भ्रांत्याबहुमतध्वांतेराजयोगमजानतां हठप्रदीपिकांधत्तेस्वात्मारामःकृपाकरः ३

मंत्रप्रयोगादिबहुमतरूपेध्वांतेगाढांधकारेयाभ्रांतिर्भ्रमःतैस्तैरुपायैःराजयोगार्थंप्रवृत्तस्यतस्यातत्तत्फलालाभात् वक्ष्यतिचहठंविनाराजयोगइत्यादि तथाराजयोगमजानतांनजानंतीत्यजानंतःतेषांअजानतांपुंसांराजयोगज्ञानायेतिशेषः करोतीतिकरःकृपायाःकरःकृपाकरःकृपायाआकरइतिवातादृशःअनेनहठप्रदीपिकाकरणेभूतानुकंपैवहेतुरित्युक्तंस्वात्मन्यारमतेइतिस्वात्मारामः॥ हठस्यहठयोगस्यप्रदीपिकेवप्रकाशकत्वात् हठप्रदीपिकातां अथवाहठएवप्रदीपिकाहठप्रदीपिकाराजयोगप्रकाशकत्वातांधत्तेकरोतीतियावत्॥ स्वात्मारामइत्यनेनज्ञानस्यसप्तमभूमिकांप्राप्तोब्रह्मविद्वरिष्ठइत्युक्तं। तथाचश्रुतिः आत्मक्रीडआत्मरतिः क्रियावानेषब्रह्मविदांवरिष्ठइतिसप्तभूमयश्चोक्तायोगवासिष्ठेज्ञानभूमिःशुभेच्छाख्याप्रथमासमुदाहृता विचारणाद्वितीयास्यात्तृतीयातनुमानसा सत्वापत्तिश्चतुर्थीस्यात्ततोसंसक्तिनामिका पदार्थाभाविनीषष्ठीसप्तमीतुर्यगास्मृता॥ अस्यार्थः शुभेच्छाइत्याख्यायस्या

:साशुभेच्छाख्या विवेकवैराग्यशमादिपूर्विकातीव्रमुमुक्षाख्याप्रथमाज्ञानस्यभूमिर्भूमिकाउदाहृताकथितायोगिभिरितिशेषः॥ १॥ विचारणाश्रवणमननात्मि
काद्वितीयाभूमिःस्यात् २ अनेकार्थग्राहकंमनोयदानेकार्थान्परित्यज्यसदेकार्थवृत्तिप्रवाहवद्भवति तदातनुमानसंयस्यांसातनुमानसानिदिध्यासनरूपातृ
तीयाज्ञानभूमिःस्यादितिशेषः इमास्तिस्रःसाधनभूमिकाःआसुभूमिषुसाधकइत्युच्यते तिसृभिर्भूमिकाभिःशुद्धसत्त्वेन्तःकरणे अहंब्रह्मास्मीत्याकारिका
ऽपरोक्षवृत्तिरूपासत्त्वापत्तिनामिकाचतुर्थीज्ञानभूमिःस्यात् चतुर्थीयंफलभूमिःअस्यांयोगीब्रह्मविदित्युच्यते इयंसंप्रज्ञातयोगभूमिका ४ वक्ष्यमाणास्ति
स्त्रोऽसंप्रज्ञातयोगभूमयः ततःसत्त्वापत्तेरनंतरंसत्त्वापत्तिसंज्ञिकायांभूमौऽपाप्यितासुसिद्धिषु असंसक्त्यासंसक्तिनामिकांपंचमीज्ञानभूमिःस्यात् अस्यां
योगीस्वयमेवव्युत्तिष्ठते इमांभूमिंप्राप्तोब्रह्मविद्वरइत्युच्यते ५ परंब्रह्मातिरिक्तमर्थंनभावयतियस्यांसापदार्थाभाविनीषष्ठीज्ञानभूमिःस्यात् अस्यां
योगीपरप्रबोधितःसन्व्युत्थितोभवति इमांप्राप्तोब्रह्मविद्वरीयानित्युच्यते ६ तुर्यगानामसप्तमीज्ञानभूमिःस्मृताः॥ अस्यांयोगीस्वतःपरतोवानव्युत्थानंप्रा

हठविद्यांहिमत्स्येन्द्रगोरक्षाद्याविजानते स्वात्मारामोथवायोगीजानीतेतत्प्रसादतः ४

प्नोति इमांप्राप्तोब्रह्मविद्वरिष्ठइत्युच्यते तत्रप्रमाणभूताश्रुतिःसैवोक्तापूर्वं अयमेवजीवन्मुक्तइत्युच्यते सएवात्रस्वात्मारामपदेनोक्तइत्यलंबहूक्तेन महत्सेवितत्वाद्ध
ठविद्यांप्रशंसन्स्वस्यापिमहत्सकाशाद्धठविद्यालाभाद्गौरवंद्योतयति हठविद्यांहीति हीतिप्रसिद्धं मत्स्येन्द्रश्चगोरक्षश्चतौआद्यौयेषांतेमत्स्येन्द्रगोरक्षाद्याःआद्य
शब्देनजालंधरनाथभर्तृहरिगोपीचंद्रप्रभृतयोग्राह्याः तेहठविद्यांहठयोगविद्यांविजानतेविशेषेणसाधनलक्षणभेदफलैर्जानंतीत्यर्थः स्वात्मारामःस्वात्मारा
मनामाअथवाशब्दःसमुच्चयेयोगीयोगवान्तत्प्रसादतःगोरक्षप्रसादाज्जानीतेइत्यन्वयः परमगुरुणाब्रह्मणाप्रापितेयंविद्यासेवितेन्यत्रयोगीयाज्ञवल्क्यस्मृतिः हिर
ण्यगर्भोयोगस्यवक्तानान्यःपुरातनः वक्तृत्वंचमानसव्यापारपूर्वकंभवतीतिमानसोव्यापारोर्थादागतः॥ तथाचश्रुतिः यन्मनसाध्यायतितद्वाचावदतीतिभ
गवतापीयंविद्याभागवतादावुद्धवादीन्प्रत्युक्ताशिवस्तुयोगीप्रसिद्धएवएवंचसर्वनिमेब्रह्मविष्णुशिवैःसेवितेयंविद्यानचब्रह्मसत्त्वकृताभ्यासेनयोगेनविराकृ
नइतिशंकनीयंश्रुतिस्वातंत्र्याविर्भेदांशमात्रस्यनिराकरणात् नतुभावनाविशेषरूपयोगस्यभावनायाश्चसर्वसमत्वात् तांविनामुक्त्यसंभवात् तथा

थोक्तंभगवद्गीतासु नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना नचाभावयतश्शांतिरशांतस्यकुतःसुखमिति नारायणतीर्थैरप्युक्तं ध्यानंच्यसमत्वबुद्धेःप्रधानेसमत्वं
चेदमभेदवाक्ये। व्यासोनिरावरणभावनाख्यंयोगंस्वयंनिर्मितब्रह्मसूत्रे अपिचात्मप्रदंयोगंव्याकरोत्स्मितिमात्त्वयं भाष्यादिषुततःसच्चाप्याचार्यप्रमुखैर्मतः
मतोयोगोभगवतागीतायामभिकीर्त्यतः कृतःशुकादिभिस्तस्मादत्रसंतोतिसादराः इतिवेदेषुयज्ञेषुतपस्सुचैवदानेषुयत्कर्मफलंप्रदिष्टं अत्येतिसर्वमिदंविदि
त्वायोगीपरंस्थानमुपैतिचाद्यमितिभगवदुक्तेः किंबहुनाजिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्ततेइतिवदताभगवतायोगजिज्ञासोरप्युत्कृष्टत्वंवर्णितं किमु
तयोगिनः नारदादिभक्तश्रेष्ठैः याज्ञवल्क्यादिज्ञानिश्रेष्ठैश्चास्याःसेवनाद्भक्तिज्ञानिनामप्यविरुद्धेत्युपरम्यते ४ हठयोगेप्रवृत्तिंजनयितुंहठविद्ययाप्राप्तै
श्वर्यान्सिद्धानाह श्रीआदिनाथेत्यादिना आदिनाथःशिवःसर्वेषांनाथानांप्रथमोनाथःततोनाथसंप्रदायःप्रवृत्तइतिनाथसंप्रदायिनोवदंति मत्स्येंद्राख्य

श्रीआदिनाथमत्स्येंद्रशावरानंदभैरवाः॥ चौरंगीमीनगोरक्षविरूपाक्षविलेशयाः ५ मंथानोभैरवोयोगीसिद्धबुद्धश्चकंथडिः कोरंटकः
सुरानंदःसिद्धपादश्चचर्पटिः ६ कानेरीपूज्यपादश्चनित्यनाथोनिरंजनः कपालीविंदुनाथश्चकाकचंडीश्वराह्वयः ७ अल्लामःप्रभुदेवश्च
घोडाचोलीचटिंटिणिः भानुकीनगदेवश्चखंडकापालिकस्तथा ८ इत्यादयोमहासिद्धाहठयोगप्रभावतः खंडयित्वाकालदंडंब्रह्मा
ण्डेविचरंतिते ९

श्चादिनाथशिष्यः अत्रैवंकिंवदंतीतिकदाचिदादिनाथःकस्मिंश्चिद्द्वीपेस्थितः तत्रविजनमितिमत्वागिरिजायैयोगमुपदिष्टवान् तीरसमीपनीरस्थःकश्चनमत्स्य
स्तंयोगोपदेशंश्रुत्वात्मकाग्रचित्तोनिश्चलकायोवतस्थे तंतादृशंदृष्ट्वाअनेनयोगःश्रुतइतितंमत्वाकृपालुरादिनाथोजलेनप्रोक्षितवान् सचप्रोक्षणमात्राद्दि
व्यकायोमत्स्येंद्रःसिद्धोभूत् तमेवमत्स्येंद्रनाथइतिवदंति शावरनामाकश्चित्सिद्धः आनंदभैरवनामाप्यस्तेषांश्चरेदंद्वः छिन्नहस्तपादंपुरुषंहिंदुस्थानभा
षायांचौरंगीइतिवदंति कदाचिदादिनाथाल्लब्धयोगस्यभुवंपर्यटतोमत्स्येंद्रनाथस्यकृपावलोकनमात्रात्क्वचिदरण्येस्थितश्चौरंगीअंकुरितहस्तपादो
बभूवसचेतत्कृपयासंजातहस्तपादोहमितिमत्वातत्पादयोःप्रणिपत्यममानुग्रहंकुर्वितिप्रार्थितवान् मत्स्येंद्रोपितमनुगृहीतवान् तस्यानुग्रहाच्चौरंगी

तिप्रसिद्धःसिद्धःसोभूत् मीनोमीननाथःगोरक्षोगोरक्षनाथःविरूपाक्षनामाविलेशयनामाचचौरंगीप्रभृतीनांद्वंद्वसमासःमंथानभैरवः योगीतिमंथानप्रभृती
नांसर्वेषांविशेषणंकाकचंडीश्वरइतिआद्यंनामयस्यसतथाअन्येस्पष्टाः तथाशब्दःसमुच्चयेइतिपूर्वोक्ताआद्यायेषांतेतथा आदिशब्देनतारानाथादयोग्रा
ह्याःमहांतश्चतेसिद्धाश्चअप्रतिहतैश्वर्याइत्यर्थः हठयोगस्यप्रभावात्सामर्थ्यादितिहठयोगप्रभावतःपंचम्यास्तसिल्कालोमृत्युस्तस्यदंडनंदंडःदेहप्राण
वियोगानुकूलोव्यापारःतंखंडयित्वाछित्वामृत्युंजित्वेत्यर्थः ब्रह्मांडेब्रह्मांडमध्येविचरंतिविशेषेणअव्याहतगत्याचरंतीत्यर्थः तदुक्तंभागवते योगेश्वरा
णांगतिमाहुरंतर्बहिस्त्रिलोक्याःपवनांतरात्मनामिति ९ श्रीपरमानंदायब्रह्मरूपेणनमः हठस्याशेषतापनाशकत्वमशेषयोगसाधकत्वंचमठकमठरूपेणाह
अशेषेति अशेषाःआध्यात्मिकाधिभौतिकाधिदैविकभेदेनत्रिविधाःतत्राध्यात्मिकंद्विविधंशारीरंमानसंच तत्रशारीरंदुःखंव्याधिजंमानसंदुःखंकामादि
जं आधिभौतिकंव्याघ्रसर्पादिजनितं आधिदैविकंग्रहादिजनितं तेचतेतापाश्चतैस्तप्तानांसंतप्तानांपुंसांहठोहठयोगःसम्यगाश्रयतइतिसमाश्रयःआ

अशेषतापतप्तानांसमाश्रयमठोहठः अशेषयोगयुक्तानामाधारकमठोहठः १० हठविद्यापरंगोप्यायोगिनासिद्धिमिच्छता

श्रयभूतोमठः अशेषयोगयुक्तानांअशेषायेयोगाःमंत्रयोगकर्मयोगादियुक्तास्तेषांआधारभूतःकमठःकमठस्वयथानरणिकिरणतापतप्तानां
पुंसांआश्रयोमठःएवंत्रिविधतापतप्तानांआश्रयोहठः यथाचविश्वाधारःकमठःएवंनिखिलयोगानामाधारोहठइत्यर्थः १० अथाखिलविद्यापेक्ष
याहठविद्यायाअतिगोप्यत्वमाह हठविद्येति सिद्धिंअणिमाद्यैश्वर्यंइच्छता यद्वासिद्धिंकैवल्यसिद्धिंइच्छताकांक्षतायोगिनाहठविद्याहठयोगविद्या
परमत्यंतंगोप्यागोपनार्हास्तीति तत्रहेतुमाहयतोगुप्ताहठविद्यावीर्यवतीभवेत् अप्रतिहतैश्वर्यजननसमर्थास्यात् कैवल्यसिद्धिजननसमर्थावाभवे
त् प्रकाशिताप्रसिद्धिंगमितातुनिर्वीर्यादीर्घकालसेवितापिअप्रतिहतैश्वर्यजननासमर्थाकैवल्यसिद्धिजननासमर्थावास्यात् अथयोगाधिकारिणमा
श्रयशांतायमुक्तौविहीनायदोषैरसक्तायभुक्तौ अहीनायदोषैरितरैकर्कत्वेविप्रदेयोहठश्चेतरस्मै १ याज्ञवल्क्यविशुद्धकर्मसंयुक्तःकामस
कल्पवर्जितः यमैश्चनियमैर्युक्तःशुरूतविद्योजितःक्रोधःसत्यधर्मपरायणः गुरुशुश्रूषणरतःपितृमातृपरायणः २ स्वाश्रमस्थःसदाचारोविद्वद्भि

2

युक्ताहारविहारेण हठयोगप्रसिद्ध्ये मूलेऽधि

ष्वसुशिक्षितइति शिक्षोदरस्तयायेवनदेयंवेदधारिणेइतिकुत्रचित् अत्रयोगचिंतामणिकाराः यद्यपि ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणांचपावनं शांतयेकर्मणामन्यद्योगान्नास्तिविमुक्तये इत्यादिपुराणवाक्येषुप्राणिमात्रस्ययोगेऽधिकारउपलभ्यते तथापिमोक्षरूपफलवतियोगेविरक्तस्यैवाधिकारउचितः तथाचवायुसंहितायां दृष्टेतथानुश्रविकेविरक्तंविषयेमनः यस्यतस्याधिकारोस्मिंयोगेनान्यस्यकस्यचित् सुरेश्वराचार्याः इहामुत्रविरक्तस्यसंसारंप्रजिहासतः जिज्ञासोरेवकस्यापियोगेस्मिन्नधिकारितेत्याहुः हठेरप्युक्तं नेनदेयंदुर्विनीतायनानुज्ञातंगुरुभिःसम्यक्फलाय अस्थानेहिस्थापनेनैववाचांदेवीकोपान्निदहेनंचिरायइति ११ अथहठाभ्यासयोग्यंदेशमाहसार्द्धेन सुराज्येइति राज्ञांकर्मभावोवाराज्यंतत्शोभनंयस्मिन्सुराज्यः तस्मिन्सुराज्येयथाराजातथाप्रजाइतिमहदुक्तेः राज्ञःशोभनत्वात्प्रजानामपिशोभनत्वंसूचितं धार्मिकेधर्मवति अनेनहठाभ्यासिनोनुकूलहारादिलाभःसूचितं सुभिक्षइत्यनेनाना

भवेद्वीर्यवतीगुप्तानिर्वीर्यातुप्रकाशिता ११ सुराज्येधार्मिकेदेशेसुभिक्षेनिरुपद्रवे ध
नुःप्रमाणपर्यंतंशिलाग्निजलवर्जिते १२ एकांतेमठिकामध्येस्थातव्यंहठयोगिना छ

यासेनन्नलाभःसूचितः निरुपद्रवेचोरव्याघ्राद्युपद्रवरहिते एतेनदेशस्यदीर्घकालवासयोग्यतासूचिता धनुषःप्रमाणंधनुःप्रमाणंचतुर्हस्तमात्रंतत्पर्यंतंशिलाग्निजलवर्जितेशिलाःप्रस्तराः अग्निर्वह्निःजलंतोयंतैर्वर्जितेरहिते यत्रासनंततश्चतुर्हस्तमात्रेशिलाग्निजलानिनस्युरित्यर्थः तेनशीतोष्णविकाराभावसूचितः १२ एकांतेविजनेइत्यनेनजनसमागमाभावात्कलहवार्ताद्यभावःसूचितः जनसंमर्देतुकलहादिकंस्यादेवतदुक्तंभागवतेवासेबहूनांकलहोभवेत्वार्ताद्वयोरपीति तादृशेदेशेमठिकामध्येअल्पोमठोमठिकाअल्पीयसिकन् तस्यामध्येहठयोगिनाहठाभ्यासियोगीहठयोगीतेनशाकपार्थिवादित्वात्समासःस्थातव्यंस्थातुंयोग्यंमठिकामध्येइत्यनेनशीतातपादिजनितक्लेशाभावःसूचितः अत्रयुक्ताहारविहारेणहठयोगस्यसिद्धयेइत्यर्थकोनचित्प्रक्षिप्तत्वान्नव्याख्यातं मूलश्लोकानामेवात्रव्याख्यानं एवमग्रेपियेमयानव्याख्याताःश्लोकाहठप्रदीपिकायामुपलभ्यंतेतेसर्वेप्रक्षिप्ताइतिबोध्यं १२

ह.प्र.टी.
४

अथमठलक्षणमाह् अल्पद्वारेति अल्पंद्वारंयस्मिंस्तत्तादृशं रंध्रंगवाक्षादिःगर्तोनिम्नप्रदेशःविवरामूषकादिबिलंतेनसंतियस्मिन्तत्तादृशं अत्युच्चंचतन्नीचंचअत्यु
च्चनीचंतच्चतत् आयतंच अत्युच्चनीचायतं विशेषणंविशेष्येणबहुलमितिबहुलग्रहणात् विशेषणानांकर्मधारयः ननुउच्चनीचायतशब्दानांभिन्नार्थकानांक
थंकर्मधारयइतितल्लक्षणाभावादितिचेन्न मठेतेषांसमानाधिकरण्यसंभवात् नअत्युच्चनीचायतंमनत्युच्चनीचायतं नशब्देनसमासान्नलोपाभावः नेतिपृथक्
पदंवा अत्युच्चे आरोहणेश्रमःस्यात् अतिनीचेअवरोहणेश्रमोभवेत् अत्यायतेदूरंदृष्टिर्गच्छेत् तन्निराकरणार्थमुक्तमनत्युच्चनीचायतमिति सम्यक्समीचीनत
यागोमयेनगाढःप्रलेपेणसांद्रंयथाभवतितथालिप्तं अमलंनिर्मलंनिःशेषाबाधिलायेजंतवःमशकमत्कुणाद्यास्तैरुज्झितंत्यक्तंरहितं बाह्येमठाद्बहिःप्रदेशे
मंडपःशालाविशेषःवेदिःपरिष्कृताभूमिःकूपोजलाशयविशेषःतैरुचिरंरमणीयंप्राकारेणवरणेनसम्यक्परितःवेष्टितंपरितोभित्तियुक्तमित्यर्थः हठाभ्यासिभिःहठ

अल्पद्वारमरंध्रगर्तविवरंनात्युच्चनीचायतंसम्यग्गोमयसांद्रलिप्तममलंनिःशेषजंतूज्झितं बाह्येमंडपवेदिकूपरुचिरंप्राकारसंवेष्टितं
प्रोक्तंयोगमठस्यलक्षणमिदंसिद्धैर्हठाभ्यासिभिः १३ एवंविधेमठेस्थित्वासर्वचिन्ताविवर्जितः गुरूपदिष्टमार्गेणयोगमेवसदाभ्यसेत् १४

3

योगाभ्यासनशीलैःसिद्धैरिदंपूर्वोक्तंअल्पद्वारादिकंयोगमठस्यलक्षणंस्वरूपंप्रोक्तंकथितं नंदिकेश्वरपुराणेत्वेवंमठलक्षणमुक्तं मंदिरंरम्यविन्यासंमनोज्ञंगंधवासितं
धूपामोदादिसुरभिकुसुमोत्करमंडितं मुनितीर्थनदीवृक्षपद्मिनीशैलशोभितं चित्रकर्मनिबद्धंचचित्रभेदविचित्रितं कुर्याद्योगगृहंधीमान्सुरम्यंशुभवर्त्मना दृष्ट्वाचि
त्रगतान्ध्यातान्मुनीन्यातिमनःशमं सिद्धान्दृष्ट्वाचित्रगतान्मतिरभ्युद्यमेभवेत् मध्येयोगगृहस्याथलिखेत्संसारमंडलं श्मशानंचमहाघोरंनरकांश्चलिखेत्क्वचित् तान्दृ
ष्ट्वाभीषणाकारान्संसारेसारवर्जितं अनवसादोभवतियोगीसिद्ध्यभिलाषकः पश्यंश्चव्याधितान्जंतून्नृत्यतोमत्तांश्चलक्षणात् १३ मठलक्षणमुक्त्वामठेयत्कर्तव्यंतदा
ह एवंविधइति एवंपूर्वोक्ताविधाप्रकारोयस्यसतथातस्मिन् पूर्वोक्तलक्षणेइत्यर्थः तस्मिन्स्थित्वास्थितिंकृत्वासर्वाभिश्चिन्ताभिर्विशेषेणवर्जितोरहितःअशेषचिंतारहितःगुरु
णाउपदिष्टोयोमार्गःहठाभ्यासप्रकाररूपःतेनसदानित्यंयोगमेवअभ्यसेत् एवशब्देनाभ्यासांतरस्ययोगेविघ्नकरत्वंसूचितं गुरूपदिष्टमार्गेणेत्यनेनगुरूपदेशंविनायो

राम:
४

गेनसिध्यतीतिसूचितं तदुक्तंयोगबीजे मरुज्जयोयस्यसिद्धःस्यात्सेवेतगुरुंसदा गुरुवक्त्रप्रसादेनकुर्यात्प्राणजयंबुधः राजयोगे वेदांततर्कोक्तिभिरागमैश्चनानाविधैःशास्त्रकदं
बकैश्च ध्यानादिभिःसत्करणैर्नगम्यश्चिंतामणिरेकगुरुंविहाय स्कंदपुराणे आचार्याद्योगसर्वस्वमवाप्यस्थिरधीःस्वयं यथोक्तंलभतेतेनप्राप्नोत्यपिचनिर्वृतिम् सुरे
श्वराचार्याःगुरुप्रसादाल्लभतेयोगमष्टांगसंयुतं शिवप्रसादाल्लभतेयोगसिद्धिंचशाश्वतीं श्रुतिश्चयस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशं
तेमहात्मनइति आचार्यवान्पुरुषोवेदेतिच १४ अथयोगाभ्यासप्रतिबंधकानाह अत्याहारइति अतिशयितआहारोत्याहारः क्षुधापेक्षयाधिकभोजनं प्रयासःश्रम
जननानुकूलोव्यापारः प्रजल्पोजल्पः प्रजल्पोबहुभाषणं शीतोदकेनप्रातःस्नाननक्तभोजनफलाहारादिरूपनियमस्याग्रहणंनियमग्रहः जनानांसंगोजनसंगः
कामादिजनकत्वात्लौल्यस्यभावोलौल्यंचांचल्यं षड्भिरत्याहारादिभिरभ्यासप्रतिबंधात्योगोविनश्यति विशेषेणनश्यति १५ अथयोगसिद्धिकरानाह उत्सा

अत्याहारःप्रयासश्चप्रजल्पोनियमग्रहः जनसंगश्चलौल्यंचषड्भिर्योगोविनश्यति १५ उत्साहात्साहसाद्धैर्यात्तत्त्वज्ञानाच्चनिश्चयात् ज
नसंगपरित्यागात्षड्भिर्योगःप्रसिध्यति १६ हठस्यप्रथमांगत्वादासनंपूर्वमुच्यते कुर्यात्तदासनंस्थैर्यमारोग्यंचांगलाघवं १७

हादिति विषयप्रवणंचित्तंनिरोत्स्याम्येवेत्युद्यमउत्साहः साध्यत्वासाध्यत्वेऽपरिभाव्यसहसाप्रवृत्तिःसाहसं यावज्जीवंसेत्स्यत्येवेत्यखेदोधैर्यं विषयामृगतृष्णाजलव
दसंतः ब्रह्मैवसदितिवास्तविकंज्ञानं योगांगानांवास्तविकंज्ञानंवा शास्त्रगुरुवाक्येषुविश्वासोनिश्चयःश्रद्धेतियावत् जनानांयोगाभ्यासप्रतिकूलानांयःसंगस्त
स्यपरित्यागात् जनानांयोगाभ्यासप्रतिकूलानांयःसंगस्तस्यपरित्यागात् षड्भिरेभिर्योगःप्रकर्षेणाविलंबेनसिध्यतीत्यर्थः १६ आदौआसनकथनेसंगतिंसामा
न्यतस्तत्फलंचाह हठस्येति हठस्यआसनंकुंभकंचित्रंमुद्राख्यकरणंतथा [illegible] अथनादानुसंधानमितिवक्ष्यमाणानिचत्वार्यंगानि प्रत्याहारादिसमाध्यंतानांनादानुसं
धानेंतर्भावः तन्मध्येआसनस्यप्रथमांगत्वात्पूर्वमासनमुच्यतइतिसंबंधः तत्आसनंस्थैर्यंदेहस्यमनसश्चचांचल्यरूपरजोधर्मनाशकत्वेनस्थिरतांकुर्यात् आ
सनेनरजोहंतीतिवाक्यात् आरोग्यंचित्तविक्षेपकरोगाभावं रोगस्यचित्तविक्षेपकत्वमुक्तंपातंजलसूत्रे व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शि

ह०दी०
५

नलब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेंतराया इति अंगानां लाघवं लघुत्वं गौरवरूपतमोधर्मनाशकत्वमप्येतेनोक्तं चकारात् क्षुद्दीप्त्यादिकमपि बोध्यं ७ वसि
ष्ठादिसम्मतासनमध्ये श्रेष्ठानि मयोच्यंत इत्याह वसिष्ठाद्यैरिति वसिष्ठ आद्यो येषां याज्ञवल्क्यादीनां तैर्मुनिभिर्मननशीलैः चकारान् मंत्रादिपरैः मत्स्येंद्र आद्यो येषां जा
लंधरनाथादीनां तैः योगिभिः हठाभ्यासिभिः चकारान्मुद्रापरैः अंगीकृतानि चतुरशीत्यासनानि तन्मध्ये कानिचित् श्रेष्ठानि मया कथ्यंते सो घणुभयोरपि मननह
ठाभ्यासौ स्तस्तथापि वसिष्ठादीनां मननमुख्यं मत्स्येंद्रादीनां हठाभ्यासो मुख्य इति पृथगुक्तं १८ तत्र सुकरत्वात् प्रथमं स्वस्तिकासनमाह जान्वोरिति जानु च
ऊरू च अत्र जानुशब्देन जानुसंनिहितो जंघाप्रदेशो ग्राह्यः जंघोर्वोरिति पाठस्तु साधीयान् तयोरंतरमध्ये उभे पादयोस्तले तलप्रदेशौ कृत्वा ऋजुकायः समका

वशिष्ठाद्यैश्च मुनिभिर्मत्स्येंद्राद्यैश्च योगिभिः अंगीकृतान्यासनानि कथ्यंते कानिचिन्मया १८ जानूर्वोरंतरे सम्यक् कृत्वा पाद
तले उभे ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्ष्यते १९ सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् दक्षिणेपि तथा सव्यं
गोमुखं गोमुखाकृतिः २० एकं पादं तथाकस्मिन् विन्यसेदुरुणि स्थितं इतरस्मिंस्तथा चोरुं वीरासनमितीरितं २१ गुदं नि
रुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः कूर्मासनं भवेदेतदिति योगविदो विदुः २२

५

यः यत्र समासीनो भवेत् तदासनं स्वस्तिकं स्वस्तिकाख्यं प्रचक्ष्यते वदंति योगिन इति वदंति १९ गोमुखासनमाह सव्य इति सव्ये वामे पृष्ठस्य पार्श्वे संप्रदायात् कटेरधो
भागे दक्षिणगुल्फं नितरां योजयेत् दक्षिणेपि पृष्ठपार्श्वे तथा सव्यं वामं सव्यं गुल्फं नियोजयेत् गोमुखस्याकृतिरिवाकृतिर्यस्य तत्तादृशं गोमुखं गोमुखसंज्ञकमासनं भवेत्
वीरासनमाह एकमिति एकं दक्षिणं पादं तथा पादपूरणे एकस्मिन् वामे ऊरुणि स्थितं विन्यसेत् इतरस्मिन् वामे पादे ऊरुं दक्षिणं विन्यसेत् तद्वीरासनमितीरितं क
थितं कूर्मासनमाह गुदमिति गुल्फाभ्यां गुदं निरुध्य नियम्य व्युत्क्रमेण यत्र सम्यगाहितः स्थितो भवेत् एतत्कूर्मासनं भवेत् इति योगविदो विदुरित्यन्वयः २२

सम:
५

कुक्कुटासनमाह पद्मासनंत्विति पद्मासनंतुउर्वोपरिउत्तानचरणस्थापनरूपंसम्यक्स्थापयित्वा जानुपदेनजानुसंनिहितोजंघाप्रदेशःतच्चऊरूश्चजानूरूतयोअन्तरेमध्येकरौनिवेश्यभूमौसंस्थाप्यकरावित्यत्रापिसंबध्यते व्योमस्थंखस्थंपद्मासनमीदृशंयत्तत्कुक्कुटासनं २३ उत्तानकूर्मासनमाह कुक्कुटासनेति कुक्कुटासनस्ययोबन्धःपूर्वश्लोकोक्तःतस्मिन्स्थितःदोर्भ्यांबाहुभ्यांकंधरांग्रीवांसंबध्यकूर्मवदुत्तानोयस्मिन्भवेत् एतदासनंउत्तानकूर्मकंनाम २४ धनुरासनमाह पादांगुष्ठौत्विति पाणिभ्यांपादयोरंगुष्ठौगृहीत्वाश्रवणावधिकर्णपर्यंतंधनुषःआकर्षणंयथाभवतितथाकुर्यात् गृहीतांगुष्ठमेकंपाणिंप्रसारितंकृत्वागृहीतांगुष्ठमितरंपाणिंकर्णपर्यंतमाकुंचितंकुर्यादित्यर्थः एतद्धनुरासनंउच्यते २५ मत्स्येंद्रासनमाह वामोरुमूलेति वामोरुमूलेअर्पितःस्थापितोयोदक्षपादःतंसंप्रदायात्पृष्ठतोगतवामपाणिनागुल्फस्योपरिभागेप्रगृह्यजानोःदक्षिणपादजानोर्बहिःबहिःप्रदेशेवेष्टितोयोवामपादःतंवामपादंजानोर्बहिर्वेष्टितदक्षपाणि

पद्मासनंतुसंस्थाप्यजानूर्वोरंतरेकरौ निवेश्यभूमौसंस्थाप्यव्योमस्थंकुक्कुटासनं २३ कुक्कुटासनबंधस्थोदोर्भ्यांसंबध्यकंधरां भवेत्कूर्मवदुत्तानंएतदुत्तानकूर्मकं २४ पादांगुष्ठौतुपाणिभ्यांगृहीत्वाश्रवणावधि धनुराकर्षणंकुर्याद्धनुरासनमुच्यते २५ वामोरुमूलार्पितदक्षपादंजानोर्बहिर्वेष्टितवामपादं प्रगृह्यतिष्ठेत्परिवर्तितांगःश्रीमत्स्यनाथोदितमासनंस्यात् २६ मत्स्येंद्रपीठंजठरप्रदीप्तिंप्रचंडरुग्मंडलखंडनास्त्रं अभ्यासतःकुं

नांगुष्ठंप्रगृह्य परिवर्तितांगःवामभागेनपृष्ठतोमुखंयथास्यादेवंपरिवर्तितंपरावर्तितमंगंयेनसन्तथातादृशोयश्चतिष्ठेत् स्थितिंकुर्यात् तदासनंमत्स्येंद्रनाथेनोदितंकथितंस्यात् तदुदितत्वात्तन्नामकमेववदंतिएवंदक्षोरुमूलार्पितवामपादंपृष्ठतोगतदक्षिणपाणिनाप्रगृह्यवामजानोर्बहिर्वेष्टितदक्षपादंदक्षिणपादजानोर्बहिर्वेष्टितवामपाणिनाप्रगृह्यदक्षभागेनपृष्ठतोमुखंयथास्यादेवंपरिवर्तितांगश्चाभ्यसेत् २६ मत्स्येंद्रासनस्यफलमाह मत्स्येंद्रेति प्रचंडदुःसहंयद्रुजांरोगाणांमंडलंसमूहःतस्यखंडनेछेदनेअस्त्रंअस्त्रमिव तादृशंमत्स्येंद्रपीठंमत्स्येंद्रासनंअभ्यासतःअभ्यसनमावर्तनरूपादभ्यासात् पुंसांजठरस्यजठराग्नेःप्रकृष्टांदीप्तिंवृद्धिंददाति तथा कुंडलिन्याआधारशक्तेःप्रबोधंनिद्राभावंतथास्लोदंडाकारौश्लिष्टगुल्फौप्रसार्यप्रसारितौकृत्वा दोर्भ्यामाकुंचिततर्जनी

पश्चिमतानासनमाह प्रसार्येति भुविभूमौदंडस्यरूपमिवरूपंययोस्तौदंडाकारौश्लिष्टगुल्फौ प्रसार्यप्रसारितौकृत्वा दोर्भ्यांआकुंचिततर्जनीभ्यांभुजाभ्यांपदोःपादयोः अग्रेअग्र
भागौतयोर्द्वितयंद्वयंअंगुष्ठप्रदेशयुग्मंबलादाकर्षणपूर्वकंयथायथाजान्वधोभागस्यभूमेरुत्थानंनस्यात् तथागृहीत्वा जानूपरिन्यस्तोललाटदेशोयेनतादृशोय
द्वशेत् इदंपश्चिमतानानामकमासनमाहुः २८ अथतत्फलं इतीतिइतिपूर्वोक्तं आसनेषुअग्र्यंमुख्यंपश्चिमतानंपवनंप्राणंपश्चिमवाहिनं पश्चिमेनपश्चिममार्गेणसुषु
म्णामार्गेणवहतीतिपश्चिमवाहितंतादृशंकरोतिजठरानलस्यजठरेयोनलोग्निःतस्यउदयंवृद्धिंकुर्यात् उदरेमध्यप्रदेशेकार्श्यंकृशत्वंकुर्यात् अरोगतांआरोग्यं चकारा
न्नाडीचलनाडीसाम्यंकुर्यात् २९ अथमयूरासनमाह धरामिति करद्वयेनकरयोःद्वयंतेनधरांभूमिंअवष्टभ्यअवलंब्यप्रसारितांगुलिभूमिसंलग्नतलौसंनिहितौकरौ
कृत्वेत्यर्थः तस्यकरद्वयस्यकूर्परयोःभुजमध्यसंधिभागयोःस्थापितेन्यस्तेनाभेःपार्श्वेपार्श्वभागौयेनसउच्चासनः उच्चमुन्नतमासनंयस्यतादृशःखेशून्येदंडवत् दंडेनतुल्यंउत्थितः

डलिनीप्रबोधंचंद्रस्थिरत्वंचददातिपुंसां २७ प्रसार्यपादौभुविदंडरूपौदोर्भ्यांपदाग्रद्वितयंगृहीत्वा जानूपरिन्यस्तललाटदेशोवसेदिदंपश्चिमतानमाहुः २८ इ
तिपश्चिमतानमासनाग्र्यंपवनंपश्चिमवाहिनंकरोति उदयंजठरानलस्यकुर्यादुदरेकार्श्यमरोगतांचपुंसां २९ धरामवष्टभ्यकरद्वयेनतत्कूर्परस्थापितना
भिपार्श्वः उच्चासनोदंडवदुत्थितःखेमायूरमेतत्प्रवदंतिपीठं ३० हरतिसकलरोगानाशुगुल्मोदरादीनभिभवतिचदोषानासनंश्रीमयूरं बहुकदशनभुक्तंभस्मकुर्या
दशेषंजनयतिजठराग्निंजारयेत्कालकूटं ३१ उत्तानंशववद्भूमौशयनंतच्छवासनं शवासनंश्रांतिहरंचित्तविश्रांतिकारकं ३२

ऊर्ध्वंस्थितोयत्रभवतितत् मायूरंमयूरस्येदंतत्संबंधित्वात्तन्नामकंप्रवदंतियोगिनइतिशेषः ३० मयूरासनगुणानाह हरतीतिविशेषेःउदरंजलोदरंतेआदिर्येषांप्लीह
दीनांतेनधानान् सकलरोगान्सकलान्येरोगान्येरोगास्तान्आशुझटितिहरतिनाशयति श्रीमयूरमासनमितिसर्वत्रसंबध्यते दोषान्वातपित्तकफान्आलस्या
दींश्चअभिभवतितिरस्करोति बहुअतिशयितंकदशनंकदन्नंयद्भुक्तंतदशेषंसमलंभस्मकुर्यात् पाचयेदित्यर्थः जठराग्निंजठरानलंजनयतिप्रादुर्भावयतिकालकूटं वि
षंकालकूटशब्दोयंकालकूटवदपकारकान्नपरः तंजारयेत्जीर्णंकुर्यात् पाचयेदित्यर्थः ३१ शवासनमाह उत्तानमिति शवेनमृतशरीरेणतुल्यंशववत् उत्तानंभू
मिसंलग्नपृष्ठंयथास्यात्तथाशयनंनिद्रायामिवसंनिवेशोयत् तत्शवासनंशवाख्यमासनंशवासनंश्रांतिहरंश्रांतिंहठाभ्यासश्रमंहरतीतिश्रांतिहरंचित्तस्यविश्रांतिः
विश्रामःतस्याःकारकं ३२

वक्ष्यमाणासनचतुष्टयस्यश्रेष्ठत्वंवदन्नाह चतुरशीतीति शिवेनईश्वरेणचतुरधिकाशीतिसंख्याकान्यासनानिकथितकथितानिचकानि चतुरशीतिलक्षाणिच त
दुक्तं गोरक्षनाथेन आसनानिचतावंतियावंत्योजीवजातयः एतेषामखिलान्भेदान्विजानातिमहेश्वरः चतुरशीतिलक्षाणिएकैकंसमुदाहृतं ततःशिवेनपीठानांषोडशो
नंशतंकृतमिति तेभ्यःशिवोक्तचतुरशीतिलक्षासनानांमध्येप्रशस्तानियानिचतुरशीत्यासनानितेभ्यःआदौगृहीत्वासारभूतंश्रेष्ठभूतंचतुष्कंअहंब्रवीमित्यन्वयः ३३ तदे
वचतुष्कंनाम्नानिर्दिशति सिद्धमिति सिद्धंसिद्धासनंपद्मंपद्मासनंसिंहंसिंहासनंभद्रंभद्रासनंच इतिचतुष्टयंश्रेष्ठं अतिशयेनप्रशस्तं तत्रापिचतुष्टयेसुखेसुखक
रेसिद्धासनेसदातिष्ठेत् एतेनसिद्धासनंचतुष्टयेप्युत्कृष्टमितिसूचितं ३४ आसनचतुष्टयेप्युत्कृष्टत्वात्प्रथमंसिद्धासनमाह योनीति योनिस्थानकमिति योनिस्थानमेवयो
निस्थानकंस्वार्थेकप्रत्ययः गुदोपस्थयोःमध्यप्रदेशोयोनिस्थानंतत् अंघ्रिर्वामचरणःतस्यमूलेनपार्ष्णिभागेनघटितंसंलग्नंकृत्वा अथानंतरंएकंपादंदक्षिणंमेढ्रेप.

चतुरशीत्यासनानिशिवेनकथितानिच तेभ्यश्चतुष्कमादायसारभूतंब्रवीम्यहं ३३ सिद्धंपद्मंतथासिंहंभद्रंचेतिचतुष्टयं श्रेष्ठंतत्रापिचसुखेतिष्ठेत्सि
द्धासनेसदा ३४ तत्रसिद्धासनं योनिस्थानकमंघ्रिमूलघटितंकृत्वादृढंविन्यसेन्मेढ्रेपादमथैकमेवहृदयेकृत्वाहनुंसुस्थिरं स्थाणुःसंयमिते
न्द्रियोऽचलदृशापश्येद्भ्रुवोरंतरंह्येतन्मोक्षकपाटभेदजनकंसिद्धासनंप्रोच्यते ३५ मतांतरेतु मेढ्रादुपरिविन्यस्यसव्यंगुल्फंतथोपरि गुल्फांत
रंचनिक्षिप्यसिद्धासनमिदंभवेत् ३६ पूर्वोक्तमेवमत्स्येंद्रमतं एतत्सिद्धासनंप्राहुरन्येवज्रासनंविदुः मुक्तासनंवदंत्येकेप्राहुर्गुप्तासनंपरे ३७

स्योपरिभागेदृढंयथास्यात्तथाविन्यसेत् हृदयेहृदयसमीपेहनुंचिबुकंसुस्थिरंसम्यक्स्थिरंकृत्वा हनुहृदययोश्चतुरंगुलमंतरंयथाभवतितथाकृत्वेतिरहस्यं संयं
मितानिविषयेभ्यःपराङ्वृत्तानिइंद्रियाणियेनसतथा अचलयादृढयादृष्ट्याभ्रुवोरंतरंमध्यंपश्येत् हिप्रसिद्धं मोक्षस्ययत्कपाटंप्रतिबंधकंतस्यभेदंनाशं
जनयतीतितादृशंसिद्धानांयोगिनांआसनं आस्यतेनेनेतिवाआसनंसिद्धासनंनामकमिदंभवेदित्यर्थः ३५ मत्स्येंद्रमतंसिद्धासनमुक्त्वान्यसंमतंवक्तुमाह म
तांतरेत्विति तदेवदर्शयतिमेढ्रादिति मेढ्रादुपस्थादुपरिऊर्ध्वभागेसव्यंवामंगुल्फंविन्यस्यतथासव्यवत् उपरिसव्यपादस्योपरितुसव्यगुल्फस्यगुल्फांतरंस

अंगुल्फं च निक्षिप्य वसेदिति शेषः इदं सिद्धासनं मतांतराभिमतं भवेदित्यर्थः॥३६॥ तत्र प्रथममहासिद्धसंमतमित्याह पूर्वोक्तमिति अस्यैव मतभेदान्नामभेदानाह ए-
तदिति एतत्पूर्वोक्तं सिद्धासनं सिद्धासननामकं प्राहुः केचिदित्यध्याहारः अन्ये वज्रासनं वज्रासनसंज्ञकं विदुः जानंति एके मुक्तासनं मुक्तासनाभिधं वदंति परे गुप्तास-
नाख्यं प्राहुः अत्रासनाभिज्ञाः यत्र वामपादपार्ष्णिर्मूलस्थाने नियोज्य दक्षिणपादपार्ष्णिं मेढ्रादुपरि स्थाप्यते तद्वज्रासनं यत्र तु दक्षिणसव्यपार्ष्णिद्वयमुपर्यधोभागे-
न संयोज्य योनिस्थाने संयोज्यते तन्मुक्तासनं यत्र च पार्ष्णिद्वयं मेढ्रादुपरि नीधीयते तद्गुप्तासनमिति ३७ अथ यमप्रभिश्लोके। सिद्धासनानिते प्रसिद्धाः एकं सिद्धास-
नं मुख्यं विदुरिति संबंधः ३८ चतुरशीतीति चतुरधिकाशीतिसंख्याकानि यानि पीठानि तेषु सिद्धमेव सिद्धासनमेव सदा सर्वदा अभ्यसेत्। सिद्धासनस्य सदाभ्यासे हेतु-
गर्भविशेषणं द्वासप्ततिसहस्राणां नाडीनां मलशोधनं शोधकं यतः ३९ आत्मध्यायीति आत्मानं ध्यायतीति आत्मध्यायी मिताहारोस्यास्तीति मिताहारी यावते

यमेष्विव मिताहारमहिंसां नियमेष्विव मुख्यं सर्वासनेष्वेकं सिद्धाः सिद्धासनं विदुः ३७ चतुरशीतिपीठेषु सिद्धमेव सदाभ्यसेत् द्वासप्ततिसहस्राणां नाडी-
नां मलशोधनं ३९ आत्मध्यायी मिताहारी यावद्द्वादशवत्सरं सदा सिद्धासनाभ्यासाद्योगी निष्पत्तिमाप्नुयात् ४० किमन्यैर्बहुभिः पीठैः सिद्धे सिद्धासने सति
के॰ प्राणानिले सावधाने बद्धे केवलकुंभके ४१ उत्पद्यते निरायासात्स्वयमेवोन्मनी कला तथैकस्मिन्नेव दृढे बद्धे सिद्धासने सति ४२ बंधत्रयमनायासात्स्वय-
मेवोपजायते नासनं सिद्धसदृशं न कुंभः केवलोपमः न खेचरीसमा मुद्रा न नादसदृशो लयः ४३

द्वादशवत्सरान्यावद्द्वादशवत्सरं या- वदवधारणेऽव्ययीभावः समा-
सः द्वादशवत्सरपर्यंतमित्यर्थः सदा सर्वदा सिद्धासनस्याभ्यासात् योगी योगाभ्यासी निष्पत्तिं योगसिद्धिं आप्नुयादित्यर्थः ४० किमन्यैरिति सिद्धासने सिद्धे स-
ति अन्यैर्बहुभिः पीठैरासनैः किं न किमपीत्यर्थः सावधाने प्राणानिले प्राणवायौ केवलकुंभके बद्धे सति ४१ उन्मनी उन्मन्यवस्था सा कलेव आह्लादकत्वात्स्वंद्रे
रेव निरायासादनायासात्स्वयमेवोत्पद्यते उदेति तथेति तथोक्तप्रकारेण एकस्मिन्नेव सिद्धासने दृढे बद्धे सति ४२ बंधत्रयं मूलबंधोड्डियानबंधजालंधर-
बंधरूपं अनायासात् पार्ष्णिभागेन संपीड्य योनिमाकुंचयेद्गुदमित्यादिवक्ष्यमाणप्रकारेण मूलबंधादिषु य आयासः तं विनैव स्वयमेवोपजायते स्वत एवाय-
यत इत्यर्थः नासनमिति सिद्धेन सिद्धासनेन सदृशं आसनं न अस्तीति शेषः केवलेन केवलकुंभकेन उपमीयत इति केवलोपमः कुंभकः कुंभको नास्ति खेचरीमुद्रास-
मा मुद्रा नास्ति नादसदृशो लयो लयहेतुर्नास्ति ४३

पद्मासनं वक्तुमुपक्रमते अथेति पद्मासनमाह वामोरूपरीति वामोयऊरुःतस्यउपरिदक्षिणंचरणंचकारःपादपूरणे संस्थाप्य सम्यग्यत्नात् स्थापयित्वावामंसव्यंच
रणंतथादक्षिणचरणावत् दक्षोदक्षिणोयऊरुःतस्यउपरिसंस्थाप्यपश्चिमेनपश्चिमभागेनपृष्ठभागेनेति विधिर्विधानंकरयोरित्यर्थात् तेनकराभ्यांहस्ताभ्यां
दृढंयथास्यात्तथाअंगुष्ठौपादांगुष्ठौधृत्वा गृहीत्वा दक्षिणंकरंपृष्ठतःकृत्वावामोरुस्थितदक्षिणचरणांगुष्ठंगृहीत्वा वामकरंपृष्ठतःकृत्वादक्षिणोरुस्थितवाम
चरणांगुष्ठंगृहीत्वेत्यर्थः हृदयेहृदयसमीपे सामीपिकाधारेसप्तमी चिबुकंहनुंनिधायउरःस्थलस्यचतुरंगुलांतरालेचिबुकंनिधायेतिरहस्यं नासाग्रंनासिकाग्रंआ
लोकयेत्पश्येत् पश्यप्रयत्नेनतत्यमिनांयोगिनांव्याधिविनाशंकरोतीतिव्याधिविनाशकारिपद्मासनंएतन्नामकंप्रोच्यतेसिद्धैरितिशेषः ४४ मत्स्येंद्र
नाथाभिमतंपद्मासनमाह उत्तानाविति उत्तानौऊरुसंलग्नपृष्ठभागौचरणौपादौप्रयत्नतःप्रकृष्टाद्यत्नात् ऊरुसंस्थौऊर्वोःसम्यक्तिष्ठतइतिऊरु

अथपद्मासनं वामोरूपरिदक्षिणंचचरणंसंस्थाप्यवामंतथादक्षोरूपरिपश्चिमेनविधिनाधृत्वाकराभ्यांदृढं अंगुष्ठौहृदयेनिधायचिबुकंनासाग्रमा
लोकयेदेतद्व्याधिविनाशकारियमिनांपद्मासनंप्रोच्यते ४४ मतांतरे उत्तानौचरणौकृत्वाऊरुसंस्थौप्रयत्नतः ऊरुमध्येतथोत्तानौपाणीकृत्वाततोदृ
शौ ४५ नासाग्रेविन्यसेद्राजदंतमूलेतुजिह्वया उत्तंभ्यचिबुकंवक्षस्युत्थाप्यपवनंशनैः ४६ इदंपद्मासनंप्रोक्तंसर्वव्याधिविनाशनं दुर्लभंयेनके

संस्थौताद्दृशौकृत्वा ऊर्ध्वमुखौऊरुमध्ये तथाचार्थेपाणिकरौउत्तानौकृत्वाऊरुसंस्थोत्तानपादोभयपार्ष्णिसंलग्नपृष्ठंशव्यंपाणिमुत्तानंकृत्वातदुपरिदक्षिणंपाणिं
चोत्तानंकृत्वेत्यर्थः ततःतदनंतरंदृशौदृष्टीनासाग्रेविन्यसेत् विशेषेणनिश्चलतयान्यसेदित्यर्थः राजदंतानांदंष्ट्राणांसव्यदक्षिणभागस्थितानांमूलेउभेमूल
स्थानेजिह्वयाउत्तंभ्यऊर्ध्वंस्तंभयित्वा गुरुमुखादवगंतव्योयंजिह्वाबंधःचिबुकंवक्षसिनिधायेतिशेषः शनैःमंदंमंदंपवनंवायुमुत्थाप्यअनेनमूलबंधःप्रोक्तःमू
लबंधोपिगुरुमुखादेवावगंतव्यः वस्तुतस्तुजिह्वाबंधेनैवायंचरितार्थः इतिहठरहस्यविदः एवंयत्रास्यतेतदिदंपद्मासनंपद्मासनाभिधानंप्रोक्तंआसनज्ञैरिति
शेषः कीदृशंसर्वेषांव्याधीनांविशेषेणनाशनंयेनकेनापिभाग्यहीनेनदुर्लभंधीमताबुद्धिमतालभ्यतेप्राप्यते ४   श्रीरामचंद्रायनमोनमः

नापिधीमतालभ्यतेभुवि ४

एतच्च मद्योगिसंमतमित्याह पश्चादिति अन्यदपि पद्मासने कृत्यविशेषमाह कृत्वेति संपुटितौ संपुटीकृतौ करौ उत्संगस्थौ इति शेषः दृढतरं अतिशयेन दृढं
स्थिरं पद्मासनं बध्वा कृत्वेत्यर्थः चिबुकं हनुं गाढं दृढं यथास्यात्तथा वक्षसि वक्षःसमीपे सन्निधाय सन्निहितं कृत्वा चतुरंगुलांतरेणेति योगिसंप्रदायाज्ज्ञेयं जालं
धरबंधं कृत्वेत्यर्थः तच्च स्वेष्टदेवतारूपं ब्रह्म वा ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः इति भगवदुक्तेः चेतसि चित्ते ध्यायन् चिंतयन् अपानमनिलं अपा
नवायुं ऊर्ध्वं प्रोत्सारयन् मूलबंधं कृत्वा सुषुम्णामार्गेणोर्ध्वं नयन् पूरितं पूरकेणांतर्धारितं प्राणं न्यंचन् नीचैरधः अंचन् गमयन् अंतर्भावितण्यर्थोंचतिः प्राणा
पानयोरैक्यं कृत्वेत्यर्थः नरः पुमान् अतुलं बोधं निरुपमं ज्ञानं शक्तिप्रभावात् शक्तिराधारशक्तिः कुंडलिनी तस्याः प्रभावात्सामर्थ्यादुपैति प्राप्नोति प्राणा

पश्चादुक्तमेव मत्स्येंद्रमतं कृत्वा संपुटितौ करौ दृढतरं बध्वा तु पद्मासनं गाढं वक्षसि संनिधाय चिबुकं ध्यायंश्च तच्चेतसि वारंवारमपानमूर्ध्वमनिलं
प्रोत्सारयन्पूरितं न्यंचन्प्राणमुपैति बोधमतुलं शक्तिप्रभावान्नरः ४८ पद्मासने स्थितो योगी नाडीद्वारेण पूरितं मारुतं धारयेद्यस्तु स मुक्तो नात्र संश
यः ४९ अथ सिंहासनं गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् दक्षिणे सव्यगुल्फं तु दक्षगुल्फं तु सव्यके ५० हस्तौ तु जान्वोः संस्थाप्य स्वां
गुलीः संप्रसार्य च व्यात्तवक्त्रो निरीक्षेत नासाग्रं तु समाहितः ५१ सिंहासनं भवेदेतत्पूजितं योगिपुंगवैः बंधत्रितयसंधानं कुरुते चासनोत्तमं ५२

पानयोरैक्यं कुंडलिनीबोधो भवति कुंडलिनीबोधे सुषुम्णामार्गेण प्राणो ब्रह्मरंध्रं गच्छति तत्र गते चित्तस्थैर्यं भवति चित्तस्थैर्ये संयमादात्मसाक्षात्कारो भवतीत्यर्थः
४८ पद्मासन इति पद्मासने स्थितो योगी योगाभ्यासी पूरितं पूरकेणांतर्नीतं मारुतं वा सुषुम्णामार्गेण मूर्द्धानं नीत्वेति शेषः यः धारयेत्स्थिरीकुर्यात्स तु मुक्
क्तः संशयो नास्तीत्यन्वयः ४९ सिंहासनमाह गुल्फाविति वृषणस्याधः अधोभागे सीवन्याः पार्श्वयोः सीवन्याः उभयभागयोः क्षिपेत्स्थापयेदिति यावत् गुल्फस्था
पनप्रकारमेवाह दक्षिण इति सीवन्याः दक्षिणभागे सव्यगुल्फं स्थापयेत् सव्यके सीवन्याः सव्यभागे दक्षिणगुल्फं स्थापयेत् ५० हस्ताविति जान्वोरुपरि हस्तौ
तु संस्थाप्य सम्यक् आजुसंलग्नतलौ यथा स्यातां तथा स्थापयित्वा स्वांगुलीः हस्तांगुलीः संप्रसार्य सम्यक् प्रसारयित्वा व्यात्तवक्त्रः प्रसारितललजिह्वमुखः सुस
माहितः एकाग्रचित्तः नासाग्रं नासिकाग्रं सम्यक् निरीक्षेत एतत्सिंहासनं भवेत् कीदृशं योगीपुंगवैर्योगिश्रेष्ठैः पूजितं प्रशस्तं आसनेषूत्तमं सिंहासनं बंधानां मू
लबंधादित्रयं तत्संधानं संनिधानं कुरुते ५२

भद्रासनमाह गुल्फाविति वृषणस्य अधःसीवन्याःपार्श्वयोः सीवन्याःउभयतःगुल्फौ पादग्रंथी क्षिपेत् क्षेपणप्रकारमेवाह सव्येगुल्फमिति सव्येसीवन्याःपार्श्वे सव्यगु
ल्फंक्षिपेत् तथापाददूरगे दक्षगुल्फंतुदक्षिणेसीवन्याःपार्श्वेक्षिपेत् ५३ पार्श्वपादौचपार्श्वसमीपगतौपाणिभ्यांभुजाभ्यांदृढंबध्वापरस्परसंलग्नांगुलिभ्यांउदरसं
लग्नतलाभ्यांपाणिभ्यांबध्वेत्यर्थः एतद्भद्रासनंभवेत्कीदृशंसर्वेषांव्याधीनांविशेषेणनाशनं ५४ सिद्धाश्चतेयोगिनश्चसिद्धयोगिनः इदंभद्रासनंगोरक्षासनमि
त्याहुः गोरक्षेणप्रायशोभ्यस्तत्वात्गोरक्षासनमितिवदंति आसनान्युक्तानिउपसंहरन्नाह एवमिति एवमुक्तेष्वासनानांबंधेषुबंधनप्रकारेषुविग
तःश्रमोयस्यासौविगतश्रमःआसनानांबंधेषुश्रमरहितःयोगिनामिंद्रोयोगेन्द्रः ५५ नाडिकानांनाडीनांशुद्धिंप्राणेचेदिउदयापिवेन्नियमितमितिवक्ष्यमाणा

अथभद्रासनं गुल्फौचवृषणस्याधःसीवन्यापार्श्वयोःक्षिपेत् सव्यंगुल्फंतथासव्येदक्षगुल्फंतुदक्षिणे ५३ पार्श्वपादौचपाणिभ्यां
दृढंबध्वासुनिश्चलं भद्रासनंभवेदेतत्सर्वव्याधिविनाशनं ५४ गोरक्षासनमित्याहुरिदंवैसिद्धयोगिनः एवमासनबंधेषुयोगेन्द्रोविग
तश्रमः ५५ अभ्यसेन्नाडिकाशुद्धिंमुद्रादिपवनक्रियां आसनंकुंभकंचित्रंमुद्राख्यंकरणंतथा ५६ अथनादानुसंधानमभ्यासानुक्र
मोहठे ब्रह्मचारीमिताहारीत्यागीयोगपरायणः अब्दादूर्ध्वंभवेत्सिद्धोनात्रकार्याविचारणात् ५७

रूपांशुद्धिर्यस्याःसूर्यभेदादेस्तादृशीपवनस्यप्राणवायोःक्रियांप्राणायामरूपांचअभ्यसेत् अथहठाभ्यासक्रममाह आसनमिति आसनमुक्तलक्ष
णंचित्रंनानाविधंकुंभकंसूर्यभेदनउज्जायित्यादिवक्ष्यमाणं मुद्राइति आख्यायस्यतन्मुद्राख्यंमहामुद्रादिरूपंकरणं हठसिद्धौप्रकृष्टोपकरणं त
थाशब्देअथयेनंत्रयाउक्तानामनंतरं नादस्यअनाहतध्वनेरनुसंधानंअनुचिंतनं हठेहठयोगेअभ्यासोभ्यसनंतस्यअनुक्रमःपौर्वापर्यक्रमोयं ५८ हठसिद्धे
रवधिमाह ब्रह्मचारीतिब्रह्मचारीब्रह्मवान्मिताहारोवक्ष्यमाणःसोस्यास्तीतिमिताहारीत्यागीदानशीलोविषयपरित्यागीवा योगपरायणःयोगाभ्यास
नपरःअब्दाद्वर्षादूर्ध्वंसिद्धःसिद्धहठोभवेत् अत्रउक्तार्थेविचारणास्यान्नवेतिसंशयप्रयुक्तानकार्याएतन्निश्चितमेवेत्यर्थः ५७ श्रीभवानीयेनमः

पूर्वश्लोके मिताहारीत्युक्तं तत्र योगिनां कीदृशो मिताहार इत्यपेक्षायामाह सुस्निग्धेति स्निग्धः सचासौ मधुरश्च तादृशो आहारः चतुर्थांशविवर्जितः चतुर्थभागरहितः त
दुक्तमभियुक्तैः द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् वायोः संचरणार्थाय चतुर्थमवशेषयेदिति शिवो जीव ईश्वरो वा भोक्ता देवो महेश्वर इति वचनात् तस्य संप्री
त्यै सम्यक्प्रीत्यर्थं यो भुज्यते स मिताहार उच्यते ५८ अथ योगिनामपथ्यमाह द्वाभ्यां कट्वम्लेति कटु कारवेल्लादि अम्लं चिंचाफलादि तीक्ष्णं मरिचादि लवणं प्र
सिद्धं उष्णं गुडादि हरितशाकं पत्रशाकं सौवीरं कांजिकं तैलं तिलसर्षपादिस्नेहः तिलाः प्रसिद्धाः सर्षपाः सिद्धार्थाः मद्यं सुरा मत्स्याः झषाः एषामितरेतरद्वंद्वः समा
नपथ्यमाहुः अजस्येदं आजं आजं आदिर्यस्य सो आजादिः तत्तत् मांसं च आजादिमांसं दधि दुग्धपरिणामविशेषः तक्रं गृहीतसारं दधि कुलत्थाद्विद
लविशेषः कोलं कोल्याफलं बदरं कर्कंधूर्बदरी कोलीत्यमरः पिण्याकं तिलपिंडः हिंगु रामठं लशुनं रसोनं एतेषामितरेतरद्वंद्वः एतानि आद्यानि यस्य तत्तथा आद्यशब्देन प

सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते ५८ कट्वम्लतीक्ष्णलवणोष्णहरीतशाकसौवीरतैलतिलसर्षपमद्यम
त्स्यान् आजादिमांसदधितक्रकुलत्थकोलपिण्याकहिंगुलशुनाद्यमपथ्यमाहुः ५९ भोजनमहितं विद्यात्पुनरप्युष्णीकृतं रूक्षं अतिलवणमम्लयु
क्तं कदशनशाकोत्कटं वर्ज्यम् ६०

लांडुगृंजनमादकद्रव्यमाषान्नादिकं ग्राह्यं अपथ्यं अहितं योगिनामिति शेषः आहुर्योगिन इत्याध्याहारः ५९ भोजनमिति पूर्वपाचितं पश्चाद्वह्निसंयोगेनोष्णीकृतं
यद्भोजनं रूक्षं घृतादिहीनं अतिशयितं लवणं यस्मिन् तत् अतिलवणं एवालवणमिति केचन अतिलवणं चाक्रुवा इति लोके प्रसिद्धं शाकं प
वक्षारादिकं चे लवणस्य सर्वथा वर्जनीयत्वादुक्तपक्षः तथा च दत्तात्रेयः अपवर्ज्यानि वक्ष्यामि योगविघ्नकराणि च लवणं सर्षपं चाम्लमुष्णं तीक्ष्णं च रूक्षकं
अतीव भोजनं त्याज्यमतिनिद्रातिभाषणमिति स्कंदपुराणेपि त्यजेत्कट्वम्ललवणं क्षीरभोजी सदा भवेदिति अम्लयुक्तं अम्लद्रव्येण युक्तं अम्लद्रवेण युक्तम्
पिन्याअं किंभुतसाध्वादन्नं अत्र तृतीयपादे पललं वा तिलपिंडमिति केचित् पठंति तस्यार्थः पललं मांसं तिलपिंडं पिण्याकं कदशनं कदन्नं यावनालको
द्रवादि शाकं विहितेतरशाकमात्रं उत्कटं विदाहि मिरचिशाल लोके प्रसिद्धं मिरच इति हिंदुस्थानभाषायां कदशनादीनां समाहारद्वंद्वः अतिलवणादिकं वर्ज्यं वि
र्जनीयं दुष्टमितिपाठे दुष्टं पूतिपर्युषितादि अहितमिति योजनीय ६०

नां
एवंयोगीसदावर्ज्यानुक्त्वाभ्यासकालेवर्ज्यानाहार्द्धेन वन्हीति वन्हिश्चस्त्रीचपंथाश्चतेषांसेवावन्हिसेवास्त्रीसंगतिर्थयात्रादिपथिगमनादिरूपाः तासांवर्ज
नंआदौअभ्यासकालेआचरेत्सिद्धेभ्यासेतुकदाचीत्शीतेवन्हिसेवनंगृहस्थस्यऋतौस्वभार्यागमनंतीर्थयात्रादौमार्गगमनंचननिषिद्धमित्यादिपदेनसूच्यते
नत्रप्रमाणंगोरक्षवचनमुदाहरयति तथाहीतितत्पठति वर्जयेदिति दुर्जनप्रान्तंदुर्जनसमीपवासंदुर्जनप्रीतिमितिक्वचित्पाठः वन्हिस्त्रीपथासेवनंव्याख्या
तंप्रातः स्नानंचउपवासश्चआदिर्यस्यफलाहारादेस्तच्चतयोःसमाहारःद्वंद्व प्रथमाभ्यासिनःप्रातःस्नानेशीतविकारोत्पत्तेःउपवासादिनापित्ताद्युत्पत्तेः
कायक्लेशविधिंकायक्लेशकरींविधिक्रियांवहुसूर्यनमस्कारादिरूपांवहुभारोद्वहनादिरूपांच तथासमुच्चये अत्रप्रतिपदंवर्जयेदितिक्रियासंबंधः

वन्हिस्त्रीपथिसेवानामादौवर्जनमाचरेत् तथाहिगोरक्षवचनम् वर्जयेद्दुर्जनप्रांतंवन्हिस्त्रीपथिसेवनम् प्रातःस्नानोपवासादिकायक्लेशविधिंतथा ६३ गोधू
मशालीयवषाष्ठिकशोभनान्नंक्षीराज्यखंडनवनीतसितामधूनि शुंठीपटोलकफलादिकपंचशाकंमुद्गादिदिव्यमुदकंचयमींद्रपथ्यं ६४ पुष्टंसुमधुरंस्नि
ग्धंगव्यंधातुप्रपोषणं मनोभिलषितंयोग्यंयोगीभोजनमाचरेत् ६५

६३ अथयोगिपथ्यमाह गोधूमेत्यादिना गोधूमाश्चशालयश्चयवाश्चषाष्ठिकाःषष्ठ्यानैर्येपच्यंतेतंडुलविशेषाः शोभनमन्नंशोभनान्नंपवित्रान्नंश्यामाकनीवारादित
चएतेषांसमाहारद्वंद्वःक्षीरंदुग्धंआज्यंघृतंखंडःशर्करानवनीतंमथितदधिसारःसीतातालीप्रभवाखडीशाकरइतिलोकेप्रसिद्धामिशरीइतिहिंदुस्थानभाषायां मधु
क्षौद्रंएषांइतरेतरद्वंद्वः शुंठीप्रसिद्धापटोलकफलंपरवरइतिभाषायांप्रसिद्धंशाकं तदादिर्यस्यकोशातक्यादेस्तत्पटोलकफलादिकंशेषाद्विभाषाइतिकप्प्र
त्ययः पंचानांशाकानांसमाहारःपंचशाकं तदुक्तंवैद्यके सर्वशाकमचाक्षुष्यंचाक्षुष्यंशाकपंचकं जीवंतिवास्तुमत्स्याक्षीमेघनादपुनर्नवाइतिमुद्गादिदलवि

षाःआदिर्यस्यतत् मुद्गादि आदिपदेनाढकीग्राह्या दिव्यंनिर्दोषमुदकंजलंच यमएषामस्तीतियमिनःतेषामिन्द्रःश्रेष्ठोयोयोगीन्द्रस्तस्यपथ्यंहितं ॥६२॥ अथयोगिनोभोज
ननियममाहपुष्टमिति पुष्टंदेहपुष्टिकरंमोदकादि सुमधुरंशर्करादिसहितंस्निग्धंसघृतंगव्यंगोदुग्धघृतादियुक्तंगव्यालाभेमाहिषंदुग्धादिग्राह्यं धातुप्रपोषणंलड्डुका
पूपादिमनोभिलाषितं पुष्पादिभुयमनोरुचिकरंतदेवयोगिनाभोक्तव्यंमनोभिलषितमपिकिमविहितंभोक्तव्यंनेत्याहयोग्यमितिविहितमेवेत्यर्थः योगीभोजनंविशेषणं
विशिष्टंआचरेत्कुर्यादित्यर्थः नतुशक्तिभर्जितान्नादिनानिर्वाहंकुर्यादितिभावः ॥६३॥ योगाभ्यासिनोवयोविशेषारोगाद्यपेक्षानास्तीत्याह युवेति युवातरुणःवृद्धोवृद्धावस्था
प्राप्तःअतिवृद्धोतिवार्द्धकंगतोवा अभ्यासात् आसनकुंभकादीनामभ्यसनात् सिद्धिंसमाधिफलरूपांआप्नोतिअभ्यासप्रकारमेववदन्विशिनष्टिसर्वयोगेष्विति सर्वेषु

युवावृद्धोतिवृद्धोवाव्याधितोदुर्बलोपिवा अभ्यासात्सिद्धिमाप्नोतिसर्वयोगेष्वतन्द्रितः ॥६४॥ क्रियायोगस्यसिद्धिःस्या
दक्रियस्यकथंभवेत् नशास्त्रपाठमात्रेणयोगसिद्धिःप्रजायते ॥६५॥ नवेषधारणंसिद्धेःकारणंनचतत्कथा क्रियैवकारणंसिद्धेः

योगेषुयोगाङ्गेषुयोगशब्दप्रयोगः ॥६४॥ अभ्यासादेवसिद्धिर्भवतीतिदृढयन्नाहद्वाभ्यां क्रियायुक्तस्येति क्रियायोगाङ्गानुष्ठानरूपातयायुक्तस्यसिद्धिर्योगसिद्धिःस्या
त् अक्रियस्ययोगाङ्गानुष्ठानरहितस्यकथंभवेत् नकथमपीत्यर्थः ननुयोगशास्त्राध्ययनेनयोगसिद्धिःस्यान्नेत्याह नेति शास्त्रंयोगस्ययोगशास्त्रस्यपाठमात्रेण
केवलेन पाठेनयोगस्यसिद्धिर्नप्रजायतेनैवजायतइत्यर्थः ॥६५॥ नेतिवेषस्यकाषायवस्त्रादेर्धारणंसिद्धेर्योगसिद्धेःकारणंनतस्ययोगस्यकथावार्तावचनंसिद्धेःकार

किंतर्हिसिद्धेःकारणमित्यतआह क्रियैवेति योगांगानुष्ठानरूपाक्रियैवसिद्धेःकारणंएतत्सत्यं संशयोनअत्रेत्यध्याहारः ६८ अथयोगांगानुष्ठानस्यावधिमा
ह पीठानीति पीठान्यासनानिचित्रानेकविधाःकुंभकाःसूर्यभेदादयःदिव्यानिउत्कृष्टानिकरणानिमहामुद्रादीनिहठसिद्धौप्रकृष्टोपकारकत्वंकरणत्वंहठस्याभ्यासे
सर्वाणिपीठकुंभककरणानिराजयोगफलावधिराजयोगस्यफलंतदवधितत्पर्यंतकर्त्तव्यानीतिशेषः ६९ इतिश्रीहठप्रदीपिकाव्याख्यायांज्योत्स्नाभि
धायांब्रह्मानंदकृतायांप्रथमोपदेशः १ अथासनोपदेशानंतरंप्राणायामान्वक्तुमुपक्रमते अथेति अथेतिमंगलार्थःआसनेदृढेसतिवशीजिताक्षः हितंप
थ्यंचततमितंचपूर्वोपदेशोक्तलक्षणंतत् तादृशमशनंयस्यसहितमिताशनः गुरुणाउपदिष्टोयोगमार्गःप्राणायामाभ्यासप्रकाः तेनप्राणायामान्समभ्य

सत्यमेतन्नसंशयः ६८ पीठानिकुंभकाश्चित्रादिव्यानिकरणानिचसर्वाण्यपिहठाभ्यासेराजयोगफलावधि ६९ इतिश्रीसहजानंदसन्तानचिं
तामणिस्वात्मारामयोगीन्द्रविरचितायांहठप्रदीपिकायां आसनविधिकथनंनामप्रथमोपदेशः १ अथासनेदृढेयोगीवशीहितमिताशनः गु
रूपदिष्टमार्गेणप्राणायामान्समभ्यसेत् १ चलेवातेचलंचित्तंनिश्चलेनिश्चलंभवेत् योगीस्थाणुत्वमाप्नोतिततोवायुंनिरोधयेत् २ याव
द्वायुःस्थितोदेहेतावज्जीवनमुच्यते मरणंतस्यनिष्क्रांतिस्ततोवायुंनिरोधयेत् ३

मार्गेणसम्यक्उत्साहसधैर्यादिविधिरभ्यसेत् दृढेस्थिरेकुक्कुटादिवर्जितेसिद्धासनादौइतिवायोगा १ प्रयोजनमनुद्दिश्यमंदोपिवर्त्ततेइतिमहदुक्तेप्र
योजनाभावेप्रवृत्त्यभावात् प्राणायामप्रयोजनमाह चलेवातेइति वातेचलेसतिचित्तंचलंभवेत्निश्चलेवातेनिश्चलंभवेत्चित्तमित्यत्रापिसंबध्यते वा
तेचित्तेचनिश्चलेयोगीस्थाणुत्वंस्थिरत्वंदीर्घजीवनत्वमितियावत् ईशत्वंवाआप्नोति ततःतस्माद्वायुंप्राणंनिरोधयेत्कुंभयेत् २ यावदिति देह
शरीरंयावत्कालपर्यंतंजीवनमुच्यतेलोकैः देहप्राणसंयोगस्यैवजीवनपदार्थत्वात् तस्यप्राणस्यनिष्क्रांतिःदेहाद्वियोगःमरणमुच्यतेततःतस्माद्वा
युंनिरोधयेत् ३

मलशुद्धेर्हठशुद्धिजनकत्वं व्यतिरेकेणाह मलाकुलास्विति नाडीषु मलैः आकुलासु व्याप्तासु सत्सु मारुतः प्राणः मध्यगः सुषुम्नामार्गवाही नैव स्यात् अपितु ठवमला
स्वेव मध्यगो भवतीत्यर्थः उन्मनीभावः उन्मन्या भावो भवनं कथं स्यान्न कथमपीत्यर्थः कार्यस्य कैवल्यरूपस्य सिद्धिर्निष्पत्तिः कथं भवेन्न कथंचिदपीत्यर्थः ४ अन्वये
नापि मलशुद्धेर्हठसिद्धिहेतुत्वमाह शुद्धिमेतीति यदा यस्मिन्काले मलैः आकुलं व्याप्तं सर्वं समस्तं नाडीनां चक्रं समूहः शुद्धिं मलराहित्यं एति प्राप्नोति तदैव तस्मि
न्नेव काले योगी योगाभ्यासी प्राणस्य संग्रहणे क्षमः समर्थो जायते ५ मलशुद्धिः कथं भवतीत्याकांक्षायां तच्छोधकं प्राणायाममाह प्राणायाममिति यतो
मलशुद्धिं विना प्राणसंग्रहणे क्षमो न भवति ततस्तस्मात् ईश्वरप्रणिधानोत्साहसाहसादिप्रयत्नाभिभूतविक्षेपालस्यादिराजसतामसधर्मया सात्विकया प्र

मलाकुलासु नाडीषु मारुतो नैव मध्यगः कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवेत् ४ शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलं तदैव जायते योगी प्राण
संग्रहणे क्षमः ५ प्राणायामं ततः कुर्यान्नित्यं सात्विकया धिया यथा सुषुम्नानाडीस्था मलाः शुद्धिं प्रयान्ति च ६ बद्धपद्मासनो योगी प्राणं चंद्रेण
पूरयेत् धारयित्वा यथाशक्ति भूयः सूर्येण रेचयेत् ७ प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः विधिवत्कुंभकं कृत्वा पुनश्चंद्रेण रेचयेत् ८

काशप्रसादशीलया धिया बुद्ध्या नित्यं प्राणायामं कुर्यात् यथा येन प्रकारेण सुषुम्नानाड्यां स्थिताः मलाः शुद्धिं अपगमं प्रयान्ति गच्छन्तीत्यर्थः ६ मलशोधन
प्राणायामप्रकारमाह द्वाभ्यां बद्धपद्मासन इति बद्धं पद्मासनं येन तादृशो योगी प्राणं वायुं चंद्रेण चंद्रनाड्या इडया पूरयेत् शक्तिमनतिक्रम्य यथाशक्ति
धारयित्वा कुंभयित्वा भूयः पुनः सूर्येण सूर्यनाड्या पिंगलया रेचयेत् बाह्यवायोः प्रयत्नविशेषादुपादानं पूरकः जालंधरादिबंधपूर्वकं प्राणनिरोधः कुंभकः
कुंभितस्य वायोः प्रयत्नविशेषाद्वमनं रेचकः प्राणायामाः पूरकरेचकयोर्वेगेन न सर्वथा शनैर्भस्त्रावल्लोहकारस्येव पूरोसलभंत्रममा विनियोगेण रेचकपूरकयो
र्नीयामितयोर्लक्ष्यत्वाभावात् ७ प्राणमिति सूर्येण सूर्यनाड्या पिंगलया प्राणं आकृष्य गृहीत्वा शनैर्मंदं मंदं उदरं जठरं पूरयेत् विधिवद्बंधपूर्वकं कृत्वा पुनः
भूयः चंद्रेण इडया रेचयेत् ८

रामः
११

10

उक्तप्राणायामे विशेषमाह येनेति येन चंद्रेण सूर्येण वा त्यजेत् रेचयेत् तेन पीत्वा तेनैव पूरयित्वा अतिरोधतः अतिशयितेन रोधेन स्वेदकंपादिजननपर्यंतेन सर्वो वि
भक्तिकलुसिलूयेन पूरकः ततोन्येन शनैरेव रेचयेन्न तु वेगतः वेगाड्चने बलहानिः स्यात् येन पूरकः कृतः तेन रेचको न कर्तव्यः येन रेचकः कृतः तेनैव पूरकः कर्तव्य
इति भावः ८ बद्धपद्मासन इत्याद्युक्तमर्थं पिंडीकृत्यानुवदन्प्राणायामस्यावांतरफलमाह प्राणमिति चेद्यदि इडया वाममनाड्या प्राणं पिबेत् पूरयेत् तर्हि नियमि
तं कुंभितं प्राणं भूयः पुनः अन्यया पिंगलया रेचयेत् पिंगलया दक्षणाड्या समीरणं वायुं पीत्वा पूरयित्वा अथो पूरणानंतरं बध्वा कुंभयित्वा वाममया इडया त्यजेत्
रेचयेत् सूर्यचंद्रचंद्रमाश्च सूर्याचन्द्रमसौ तयोः द्वंद्वे चेत्याङ् अनेन उक्तेन विधिना प्रकारेण सदा नित्यं अभ्यासं चंद्रेण पूर्यकुंभयित्वा सूर्येण रेचयेत् सू

येन त्यजेत्तेन पीत्वा धारयेदतिरोधतः रेचयेच्च ततोन्येन शनैरेव न वेगतः ८ प्राणं चेदिडया पिबेन्नियमितं भूयोन्यया रे
चयेत्पीत्वा पिंगलया समीरणमथो बध्वा त्यजेद्वामया सूर्याचन्द्रमसोरनेन विधिनाभ्यासं सदा तन्वतां शुद्धा नाडि
गणा भवंति यमिनां मासत्रयादूर्द्ध्वतः १० प्रातर्मध्यंदिने सायमर्द्धरात्रे च कुंभकान् शनैरशीतिपर्यंतं चतुर्वारं समभ्यसेत् ११

र्येण पूर्यकुंभयित्वा चंद्रेण रेचयेदित्याकारकं तन्वतां विस्तारयतां यमिनां यमवतां नाडिगणाः नाडीसमूहाः मासत्रयादूर्द्ध्वतः मासानां त्रयं मासत्रयं तस्मादुप
रि शुद्धा मलरहिताः भवंति १० अथ प्राणायामाभ्यासकालं तदवधिं चाह प्रातरिति प्रातः अरुणोदयमारभ्य सूर्योदयात् घटिकात्रयपर्यंतं प्रातःकाले
मध्यंदिने मध्याह्ने पंचधा विभक्तस्य दिनस्य मध्यभागे सायं संध्या त्रिनाडीप्रमितार्कमलादधऊर्ध्वं च इत्युक्तलक्षणे संध्याकाले रात्रेरर्द्धं अर्द्धरात्रं तस्मिन्नर्द्ध
रात्रे रात्रेर्मध्यमुहूर्तद्वये च शनैः अशीतिपर्यंतं अशीतिसंख्यावधि चतुर्वारं विधितुल्यकालाध्वनोरत्यंतसंयोग इति द्वितीया चतुर्षु कालेषु एकैकस्मिन्काले
अशीति प्राणायामाः कार्याः अर्द्धरात्रेकमशक्तश्चेत्त्रिसंध्यं कर्तव्या इति संप्रदायः चतुर्वारं कृता भवेदितेदि ३२० विंशत्यधिकशतत्रयपरिमिताः प्राणायामा भवंति

वारत्रयं कृत्वा चेच्चत्वारिंशदधिकं शतद्वयं २४० परिमिता भवंति

कनिष्ठकमध्यमोत्तमानां प्राणायामानां क्रमेण ज्ञापकविभेदानाह कनीयसीति कनीयसि कनिष्ठे प्राणायामे स्वेदः प्रस्वेदो भवेद्भवति स्वेदानुमेयः कनिष्ठः म
ध्यमे प्राणायामे कंपोंगमेजयो भवति कंपानुमेयो मध्यमः उत्तमे प्राणायामे स्थानं ब्रह्मरंध्रं आप्नोति स्थानप्राप्त्यनुमेय उत्तमः ततः तस्मात् वायुं प्राणं निबंधयेत् क
निष्ठादीनां लक्षणमुक्तं लिंगपुराणे प्राणायामस्य मानं तु मात्राद्वादशकं स्मृतं नीचो द्वादशमात्रस्तु सकृदुद्घात ईरितः मध्यमस्तु द्विरुद्घातश्चतुर्विंशतिमात्रकः
मुख्यस्तु यस्त्रिरुद्घातः षट्त्रिंशन्मात्र उच्यते प्रस्वेदकंपनोत्थानजनकश्च यथाक्रमं आनंदो जायते चात्र निद्राघूर्णिस्तथैव च रोमांचो ध्वनिसंविद्धिरंगमोटन
कंपनं भ्रमणं स्वेदजल्पा यः संविन्मूर्छा भवेद्यदा तदोत्तम इति प्रोक्तः प्राणायामः सुशोभन इति घूर्णिश्चिलादोलनं गोरक्षोपि अधमे द्वादश प्रोक्ता मध्यमे
द्विगुणाः स्मृताः उत्तमे त्रिगुणा मात्राः प्राणायामे द्विजोत्तमैरिति उद्घातलक्षणं तु प्राणेनोत्सर्पमाणेन अपानः पीड्यते यदा गत्वा चोर्द्ध्वं निवर्त्तेत एतदुद्
घातलक्षणं मात्रामाह याज्ञवल्क्यः अंगुष्ठांगुलिमोक्षं त्रिर्जानुपरिमार्जनं तालत्रयमपि प्राज्ञा मात्रासंज्ञां प्रचक्षते स्कंदपुराणे एकश्वासमयी मात्रा

कनीयसि भवेत्स्वेदः कंपो भवति मध्यमे उत्तमे स्थानमाप्नोति ततो वायुं निबंधयेत् १२

प्राणायामे निगद्यते एतद्व्याख्यानं योगचिंतामणौ निजावशंगतस्य पुंसो यावता कालेनैकः श्वासो गच्छत्यागच्छति च तावान् कालः प्राणायामस्य मा
त्रेत्युच्यते इति अर्द्धश्वासाधिकद्वादशश्वासावच्छिन्नकालः प्राणायामकालः षड्भिः श्वासैरेकं पलं भवति एवं च सार्द्धश्वासपलद्वयात्मकः कालः प्राणायामका
लो लघुः सार्द्धद्वादशमात्रापि न प्राणायामोऽधमः सस्वोत्तमप्राणायामो ह्युच्यते न च पूर्वोदाहृतलिंगपुराणगोरक्षवाक्यविरोधः तत्र द्वादशमात्रकस्य प्रा
णायामस्याधमत्वोक्तेरिति शंकनीयं जानुप्रदक्षिणीकृत्य न द्रुतं न विलंबितं प्रदद्याच्छोटिकां यावत्तावन्मात्रेति गीयते इति स्कंदपुराणात् अंगुष्ठांगुलि
मोक्षं च जानोश्च परिमार्जनं प्रदद्याच्छोटिकामेकां मात्रासंख्यायते तदेति द्वयोर्वचनान्त्वलिंगपुराणगोरक्षादिवाक्येषु एकच्छोटिकावच्छिन्नस्य का
लस्य मात्रात्वेन विवक्षितत्वात् याज्ञवल्क्यादिवाक्ये तु छोटिकात्रयावच्छिन्नस्य कालस्य मात्रात्वेन विवक्षितत्वात् त्रिगुणस्याधमस्योत्तमत्वं तत्राप्युक्तं

मित्यादिविरोधः सर्वेषुयोगसाधनेषुप्राणायामोमुख्यः तत्सिद्धौप्रत्याहारादीनांसिद्धेस्तदसिद्धौप्रत्याहाराद्यसिद्धेश्च वस्तुतस्तुप्राणायामस्यैवप्रत्याहा
रादिशब्दैर्निगद्यते तथाचोक्तंयोगचिंतामणौ प्राणायामस्यैवाभ्यासक्रमेणवर्द्धमानःप्रत्याहारधारणाध्यानसमाधिशब्दैरुच्यतइति तदुक्तंस्कंदपुराणे
प्राणायामद्विषट्केनप्रत्याहारउदाहृतः प्रत्याहारद्विषट्केनधारणापरिकीर्त्तिता भवेदीश्वरसंगत्वेध्यानद्वादशधारणं ध्यानद्वादशकेनैवसमाधिरभिधीयते य
त्समाधौपरंज्योतिरनंतंस्वप्रकाशकं तस्मिन्दृष्टेक्रियाकांडयातायातंनिवर्त्ततइति तथा धारणापंचनाडीभिर्ध्यानंस्यात्षष्टिनाडिकं दिनद्वादशकेनस्या
त्समाधिःप्राणसंयमादितिच गोरक्षादिभिरप्येवमेवोक्तं अत्रैवंव्यवस्था किंचिदूनद्विचत्वारिंशद्विपलात्मकःकनिष्ठप्राणायामकालः अयमेवैकछोटिकावच्छि
न्नकालस्यमात्रात्वविवक्षयाद्वादशमात्रककालःकिंचिदूनचतुरशीतिविपलात्मकोमध्यमप्राणायामकालः अयमेकछोटिकावच्छिन्नस्यकालस्यमात्रात्व
विवक्षयाचतुर्विंशतिमात्रकः पंचविंशत्युत्तरशतविपलात्मकउत्तमप्राणायामकालः अयमेकछोटिकावच्छिन्नस्यकालस्यमात्रात्वविवक्षयाषट्त्रिंशन्मात्रकः

जलेनश्रमजातेनगात्रमर्दनमाचरेत् दृढतालघुताचैवतेनगात्रस्यजायते १३ अभ्यासकालेप्रथमेशस्तं

कालः छोटिकात्रयावच्छिन्नस्यकालस्यमात्रकत्व वंधंपूर्वकंपंचविंशत्युत्तरशतविपलपर्यंतं यदाप्राणायामस्थैर्यंभवति तदाप्राणायामस्थैर्यंभवति तदाप्रा
णोब्रह्मरंध्रंगच्छतिब्रह्मरंध्रंगतःप्राणोयदापंचविंशतिपलपर्यंतंतिष्ठतितदाप्रत्याहारःयदापंचघटिकापर्यंतंतिष्ठतितदासमाधिर्भवतीतिसर्वंरमणीयं १२
प्राणायामानभ्यसतःस्वेदेजातेविशेषमाह जलेनेति श्रमात्प्राणायामाभ्यासश्रमाज्जातंश्रमजातंतेनजलेनप्रस्वेदेनगात्रस्यशरीरस्यमर्दनंतैलाभ्यंगव
त् आचरेत्कुर्यात् तेनमर्दनेनगात्रस्यदृढतादार्ढ्यंलघुताजाड्याभावः जायतेप्रादुर्भवति १३ प्रथमोत्तराभ्यासयोःक्षीरादिनियमानियमावाह अभ्यासका
लइति क्षीरंदुग्धंआज्यंघृतंतदुक्तंभोजनंशाकपार्थिवादिवत्समासः केवलेकुंभकेसिद्धेभ्यासोदृढोभवतिस्पष्टमन्यसेन १४

सिंहादिवच्छनैरेवप्राणोवश्येन्नसहसेत्याह यथेति यथायेनप्रकारेणसिंहोमृगेंद्रःगजोहस्तीव्याघ्रःशार्दूलःशनैःशनैरेववश्यः स्वाधीनोभवेन्नसहसा तथैवतेनप्र
कारेणसेवितोभ्यस्तःक्रमेणप्राणोवश्योभवेत् अन्यथासहसागृह्यमाणःसाधकंअभ्यासिनंहंतिसिंहादिवत् १५ युक्तायुक्तयोःप्राणायामयोःफलमाह प्राणा
यामेनेति आहारादियुक्तिपूर्वकोजालंधरादिबंधयुक्तोविशिष्टःप्राणायामोयुक्तइत्युच्यते तेनसर्वरोगक्षयःसर्वेषांरोगाणांक्षयोनाशोभवेत् अयुक्तउ
क्तयुक्तिरहितोयोभ्यासः तद्युक्तेनप्राणायामेनसर्वरोगसमुद्भवः सर्वेषांरोगाणांसम्यगुद्भवउत्पत्तिर्भवेत् १६ अयुक्तेनप्राणायामेनकेरोगाभवंतीत्यपे
क्षायामाह हिक्केति हिक्काश्वासकासारोगविशेषाः शिरश्चकर्णौचअक्षिणीचशिरःकर्णाक्षिशिरःकर्णाक्षिणितेषांवेदनाःशिरःकर्णाक्षिवेदनाः विविधाः

क्षीराज्यभोजनं ततोभ्यासेदृढीभूतेनतादृङ्नियमग्रहः १४ यथासिंहोगजोव्याघ्रोभवेद्वश्यःशनैःशनैः तथैवसेवितोवायुरन्यथाहंतिसाधकं १५ प्राणा
यामेनयुक्तेनसर्वरोगक्षयोभवेत् अयुक्ताभ्यासयोगेनसर्वरोगसमुद्भवः १६ हिक्काश्वासश्चकासश्चशिरःकर्णाक्षिवेदनाः भवंतिविविधारोगा
:पवनस्यप्रकोपतः १७ युक्तंयुक्तंत्यजेद्वायुंयुक्तंयुक्तंचपूरयेत् युक्तंयुक्तंचबध्नीयादेवंसिद्धिमवाप्नुयात् १८ यदातुनाडीशुद्धिःस्यात्तथाचिह्न
निबाह्यतः कायस्यकृशताकांतिस्तदाजायेतनिश्चितं १९ यथेष्टंधारणंवायोरनलस्यप्रदीपनं नादाभिव्यक्तिरारोग्यंजायतेनाडिशोधनात्
२० मेदश्लेष्माधिकंपूर्वंषट्कर्माणिसमाचरेत् अन्यस्तुनाचरेत्तानिदोषाणांसमभावतः २०

नानाविधाःरोगाःज्वरादयःपवनस्यवायोःप्रकोपतो
भवंति १७ यतःपवनस्यप्रकोपतोविविधारोगाभवंति अतःयुक्तंयुक्तमितिवायुंप्राणंयुक्तंयुक्तेनेतरेचयेत् चककालेशनैःशनैरेवरेचयन्नवेगतइत्यर्थः
युक्तंयुक्तंनात्यनाधिकंचपूरयेत् युक्तंयुक्तंचजालंधरादिबंधयुक्तंबध्नीयात् कुंभयेत् एवंअभ्यसन्सिद्धिंहठसिद्धिंअवाप्नुयात् आप्नुयात् १८ युक्तेप्राणा
यामेभ्यस्यमानेजायमानायानाडीशुद्धेर्लक्षणमाहद्वाभ्यां यदात्विति यदातुयस्मिन्कालेतुनाडीनांशुद्धिःमलराहित्यंस्यात्तदाबाह्यतःबाह्यानिसर्वाविभाव्यकेकल
सिः चिह्नानिलक्षणानि तथातानितान्यपिचिह्नानिभवंतीत्यर्थः तान्येवाह कायस्येति कायस्यदेहस्यकृशताकार्श्यंकांतिःद्युतिश्चनिश्चितंजायते १९ वायोः
प्राणस्ययथेष्टंबहुकालंधारणंकुंभकेषु अनलस्यजठराग्नेःप्रदीपनंप्रकर्षेणदीप्तिःनादस्यध्वनेःअभिव्यक्तिःप्राकट्यंआरोग्यंअरोगतानानाडिशोधनात्नाडी

नाडीशोधनात्स्वलाहितज्ञानकै ४

12

मेदःश्लेष्मादिकेउपायांतरमाह मेदःश्लेष्माधिकइति मेदश्चश्लेष्माचमेदःश्लेष्माणौ अधिकौयस्यसः तादृशःपुरुषः पूर्वंप्राणायामाभ्यासात्प्राक् नतुप्राणायामा-
भ्यासकालेषट्कर्माणिवक्ष्यमाणानिसमाचरेत्सम्यगाचरेत् अन्यस्तुमेदःश्लेष्माधिक्यरहितस्तुतानिषट्कर्माणिनाचरेत् तत्रहेतुमाह दोषाणांवातपित्तकफानां
समस्यभावःसमभावःसमत्वंतस्मात्दोषाणांसमत्वादित्यर्थः २१ षट्कर्माण्युपदिशति धौतिरितिस्पष्टम् २२ इदंरहस्यमित्याह कर्मषट्कमिति घटस्यशरीरस्य
शोधनंमलापनयनंकरोतीतिघटशोधनकारकंइदंउद्दिष्टं कर्मणांषट्कंधौत्यादिकंगोप्यंगोपनीयंयतःविचित्रगुणसंधायीविचित्रंविलक्षणंगुणंषट्कर्मरूपं
संधातुंकर्तुंशीलमस्येतिविचित्रगुणसंधायीयोगिपुंगवैःयोगिश्रेष्ठैः पूज्यतेसत्क्रियतेगोपनाभावेतुकर्मषट्कमन्यैरपिविदितंस्यादितियोगिनःपूज्यत्वाभा-
वः एतेनेदमेवकर्मषट्कस्यमुख्यंफलमितिसूचितंमेदःश्लेष्मादिनाशस्यप्राणायामैरपिसंभवात् तदुक्तं षट्कर्मयोगमाप्नोतिपवनाभ्यासतत्परइति पूर्वोत्त

मेदःश्लेष्माधिकःपूर्वंषट्कर्माणिसमाचरेत् अन्यस्तुनाचरेत्तानिदोषाणांसमभावतः २१ धौतिर्वस्तिस्तथानेतिस्त्राटकंनौलिकंतथा कपालभातिश्चैता-
निषट्कर्माणिप्रचक्षते २२ षट्कर्मकमिदंगोप्यंघटशोधनकारकं विचित्रगुणसंधायीपूज्यतेयोगिपुंगवैः २३ तत्रधौतिः चतुरंगुलविस्तारंहस्तंपंचदशाय-
तं गुरूपदिष्टमार्गेणसिक्तंवस्त्रंशनैर्ग्रसेत् २४ पुनःप्रत्याहरेच्चैतदुदितंधौतिकर्मतत् काशश्वासप्लीहकुष्ठंकफरोगाश्चविंशति २५

रग्रंथस्याप्येवमेवत्वात्स्याच्च २३ धौतिकर्माह चतुरंगुलमिति चतुर्णामंगुलानांसमाहारःचतुरंगुलंचतुरंगुलंविस्तारोयस्यतत्हस्तानांपंचदशआयतंदी-
र्घंसिक्तंजलार्द्रंवस्त्रंपटंतच्चसूक्ष्मंनूतनंतोल्लीपादेखंड्यालंगुरुणाउपदिष्टोयोमार्गःवस्त्रग्रसनप्रकारः तेनशनैर्मंदंमंदंकिंचित्किंचित्ग्रसेत् प्रथमदिनेहस्त-
मात्रंग्रसेत् द्वितीयदिनेहस्तद्वयं तृतीयदिनेहस्तत्रयंएवंदिनवृद्ध्याहस्तपंचदशमात्रंग्रसेत् तस्यप्रांतंराजदंतमध्येदृढंसंलग्नंकृत्वानौलीकर्मणोदरस्थंवस्त्रं
सम्यक्चालयित्वापुनःशनैःप्रत्याहरेच्चएतद्वस्त्रंउज्झेदिति एतत्धौतिकर्मउदितंकथितंसिद्धैः धौतिकर्मणःफलमाह कासश्वासेति कासश्चश्वासश्च
प्लीहाचकुष्ठंचसमाहारद्वंद्वः कासादयोरोगविशेषाःविंशतिःविंशतिसंख्याकाःकफरोगाश्च २१

ह.प्र.दी.
१४

धौतिकर्मणः प्रभावेन गछंत्येव न संशयः। निश्चितमेतदित्यर्थः। अथ वस्तिकर्माह। नाभिदघ्नेति नाभिप्रमाणं नाभिदघ्नं प्रमाणे दघ्नश्प्रत्ययः तस्मिन्नाभिदघ्ने नाभिप्रमाणे जले नद्यादिनीये पायौ गुदे न्यस्तं निक्षिप्तं नालं वंशनालं येन. कनिष्ठिकाप्रवेशयोग्यरंध्रयुक्तषडंगुलदीर्घवंशनालं गृहीत्वा चतुरंगुलं पायौ प्रवेशयेत् अंगुलिद्वयमितं बहिः स्थापयेत् उत्कटासनं यस्य स उत्कटासनः पार्ष्णिद्वयं स्फिचौ विन्यस्य पादांगुलीभिः स्थितिरुत्कटासनं आधारस्य मूलाधारस्य आकुंचनं यथा जलमंतः प्रविशेत् तथा संकोचनं कुर्यात् अंतःप्रविष्टं जलं नौलिकर्मणा चालयित्वा त्यजेत् तत्क्षालनं वस्तिकर्म उच्यते धौतिवस्तिकर्मद्वयं भोजनात्प्रागेव कर्तव्यं तदनंतरं भोजनं विलंबेन न कार्यं केचित्तु एवं मूलाधारेण वायोराकर्षणमभ्यस्य जले स्थित्वा पायौ नालप्रवेशनमंतरेणैव वस्तिकर्माभ्यसंति तथा करणे सर्वं जलं बहिर्नायाति अतः नानारोगधातुक्षयादिसंभवाच्च नपावस्तिकर्मणैव विधेयं किंच तथासनः पायोन्यस्तनाल इति ब्रूयात्

नाभिदघ्नजले पायौ न्यस्तनालोत्कटासनः। आधाराकुंचनं कुर्यात्क्षालनं वस्तिकर्म तत् २६ गुल्मप्लीहोदरं चापि वातपित्तकफोद्भवाः। वस्तिकर्मप्रभावेन क्षीयंते सकलामयाः २७ धात्विंद्रियांतःकरणप्रसादं दद्याच्च कांतिं दहनप्रदीप्तिं। अशेषदोषोपचयं निहन्यादभ्यस्यमानं जलवस्तिकर्म २८

२६ वस्तिकर्मगुणानाह द्वाभ्यां गुल्मप्लीहोदरमिति गुल्मश्च प्लीहा च रोगविशेषौ उदरं जलोदरं च एतेषां समाहारद्वंद्वः वातश्च पित्तं च कफश्च तेभ्य उद्भवाः एकैकस्माद् द्वाभ्यां सर्वेभ्यो वा जाताः सकलाः सर्वे आमया रोगा वस्तिकर्मणः प्रभावः सामर्थ्यं शक्तिः तेन क्षीयंते नश्यंति २७ धात्विति अभ्यस्यमानं अनुष्ठीयमानं जले वस्तिकर्म जलवस्तिकर्म तद्धातवः त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः सप्त उक्ताः इंद्रियाणि वाक्पाणिपादपायूपस्थानि पंच कर्मेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पंच ज्ञानेंद्रियाणि च अंतःकरणानि मनोबुद्धिचित्ताहंकाररूपाणि तेषां प्रसादो विक्षेपशोधकादि मोहगौरवावरणराहित्यादि राजसतामसधर्मनिवर्तनेन तत्तद्धर्मकाशनादि बाल्यादिमात्त्विकधर्माविर्भावः प्रसादः तं कांतिं द्युतिं दहनस्य जठराग्नेः प्रदीप्तिं प्रवृद्धिं च तथा अशेषाः समस्ता ये दोषाः वातपित्तकफाः तेषां उपचयापचयौ उपचयस्योपलक्षणं अपचय उपचयापचयौ निहन्यात् नितरां हन्यात् दोषसाम्यरूपमारोग्य

रामः
१४

अथनेतिकर्माह सूत्रमिति वितस्तिवितस्तिमितं वितस्तिरित्युपलक्षणमधिकस्यापि यावतासूत्रेणसम्यक्नेतिकर्मभवेतावद्ग्राह्यं स्निग्धं ग्रंथ्यादिरहितं सूत्रं
तन्तुनवधागाद्दशधागं चतुर्दशधागं वा वर्तितं सुदृढं ग्राह्यं नासानाले नासैवनालः सच्छिद्रत्वात् तस्मिन्प्रवेशयेत् मुखान्निर्गमयेत् आगमयेत् तत्प्रकारस्त्वेवं
सूत्रप्रांतं नासानाले प्रवेश्येतरनासापुटं मध्यमांगुल्या निरुध्य पूरकं कुर्यात् पुनर्मुखेन रेचयेत् पुनः पुनरेवं कुर्वतो मुखे सूत्रप्रांतमायाति तत्सूत्रप्रांतं नासाबहि
:स्थं सूत्रप्रांतं च गृहीत्वा शनैश्चालयेदिति चकारादेकस्मिन्नासानाले प्रवेश्य इतरस्मान्निर्गमयेदित्युक्तं तत्प्रकारस्तु एकस्मिन्नासानाले सूत्रप्रांतं प्रवे
श्येतरनासापुटं मध्यांगुल्या निरुध्य पूरकं कुर्यात् पश्चादितरनालेन रेचयेत् पुनः पुनरेवं कुर्वत इतरनासानाले सूत्रप्रांतमायाति तस्य पूर्ववच्चालनं कुर्यादि

अथ नेतिः सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत् मुखान्निर्गमयेच्चैषा नेतिः सिद्धैर्निगद्यते २९ कपालशोधनी चैव दिव्यदृष्टिप्रदा
यिनी जत्रूर्ध्वजातरोगौघं नेतिराशु निहंति च ३० अथ त्राटकं निरीक्षेन्निश्चलदृशा सूक्ष्मं समाहितः अश्रुसंपातपर्यंतमाचार्यैस्त्राटकं स्मृतं ३१
लक्ष्यं

ति अयं प्रकारस्तु बहुवारं कुर्वतः कदाचिद्भवति एषा उक्ता सिद्धैरणिमादिगुणसंपन्नैः तदुक्तं अवाम्भस्तरणेश्वर्याः सिद्धाः सद्भिर्निरूपिता इति नेतिर्नि
गद्यते नेतिरिति कथ्यते २९ नेतिगुणानाह कपालशोधनीति कपालं शोधयति छद्रं मलरहितं कपालं च करोतीति कपालशोधव चकारान्नासानालादी
नामपि स्वच्छत्वधारणे दिव्यां सूक्ष्मपदार्थग्राहिणीं दृष्टिं प्रकर्षेण ददातीति दिव्यदृष्टिप्रदायिनी नेतिर्नेतिक्रिया जत्रुणोः स्कंधसंध्योः ऊर्ध्वं उपरिभा
गो जातः जत्रूर्ध्वजातः स चासौ रोगाणामोघश्च तं आशु झटिति निहंति चकारः पादपूरणे स्कंधो भुजशिरोंसोस्त्री संधी तस्यैव जत्रु वेत्यमरः ३० त्राटकमाह
नि[illegible]दिति समाहितः एकाग्रचित्तोभ्यासी निश्चला चासौ दृक् च दृष्टिस्तया सूक्ष्मं च तल्लक्ष्यं च अश्रूणां सम्यक्पातः संपातः तत्पर्यंतं अनेन निरक्षणस्या
वधिरुक्तः निरिक्ष्येत एषा आचार्यैर्मत्स्येंद्रादिभिरिदं त्राटकं त्राटकं कर्म स्मृतं कथितम् ३१

ह.प्र.टी
१५

त्राटकगुणानाह मोचनमिति नेत्रस्य रोगाः नेत्ररोगाः तेषां मोचनं नाशकं तंद्रा आदिर्येषामालस्यादीनां तेषां कपाटकं कपाटवदंतर्द्धायकं अभिभावकमित्यर्थः तंद्रा
तामसचित्तवृत्तिविशेषः त्राटकं त्राटकाख्यं कर्म यत्नतः प्रयत्नात् गोप्यं गोपनीयं गोपने दृष्टांतमाह यथेति हाटकस्य सुवर्णस्य पेटकं पेटीति लोके प्रसि
द्धं यथा येन प्रकारेण गोप्यते तद्वत् ३२ नौलीकर्माह अमंदेति नतौ नम्रौ अंसौ स्कंधौ यस्य सः नतांसः पुमान् अमंदोतिशयितो यो आवर्त्तस्येव जलभ्रम
स्येव वेगो न वा तेन तुंदं उदरं पिचंडकुक्षी जठरोदरं तुंदं स्तनौ कुचावित्यमरः सव्यं वाम अपसव्यं च सव्यापसव्ये दक्षिणवामभागौ तयोः सव्यापसव्यतः सप्तम्यर्थे त
सिः भ्रामयेत् भ्रमंतं प्रेरयेत् सिद्धैः एषा नौलिः प्रशस्यते कथ्यते ३३ नौलिगुणानाह मंदाग्नीति मंदश्चासौ अग्निश्च जठराग्निः तस्य संदीपनं सम्यक् दीपनं च
पाचनं भुक्तान्नपरिपाकश्च मंदाग्निसंदीपनपाचने आदिर्यस्य तेन मंदाग्निसंदीपनपाचनादि तस्य संधायिका विधात्री आदिशब्देन मलक्षयादि सदैव स

मोचनंनेत्ररोगाणांतंद्रादीनांकपाटकं यत्नतस्त्राटकंगोप्यंयथाहाटकपेटकं ३२ अथ नौलिः अमंदावर्त्तवेगेन तुंडं सव्यापसव्यतः नतांसो भ्रामयेदे
षा नौलिः सिद्धैः प्रशस्यते ३३ मंदाग्निसंदीपनपाचनादिसंधायिकानंदकरी सदैव अशेषदोषामयशोषणी च हठक्रियामौलिरियं च नौलिः ३४
भस्त्रावल्लोहकारस्य रेचपूरौ ससंभ्रमौ कपालभातिर्विख्याता कफदोषविशोषणी ३५ भीः षट्कर्मनिर्गतस्थौल्यकफदोषमलादिकः प्रा

णायामं ततः कुर्यादनायासेन सिद्ध्यति ३६

र्वदैव आनंदकरी सुखकरी अशेषाः समस्ताश्च ते दोषाश्च वातादयः आमयाश्च रोगाः तेषां शोषणी कर्त्री हठस्य क्रियाणां धौत्यादीनां मौलिः मौलिरिवोत्त
मा धौतिकर्मणां नौलीसापेक्षत्वात् इयमुक्ता नौलिः ३४ कपालभातिं तद्गुणांश्चाह भस्त्रावदिति लोहकारस्य भस्त्रा चर्ममयी सा धमनीभूतं चर्म तद्वत्
संभ्रमेण सह वर्त्तमानौ ससंभ्रमौ अमंदौ यौ रेचपूरौ रेचकपूरकौ कपालभातिरिति विख्याता कीदृशी कफदोषविशोषणी कफस्य दोषा विंशति भेदभि
न्नाः तदुक्तं निदाने कफरोगाश्च विंशतिरिति तेषां विशोषणी विनाशनी ३५ षट्कर्मणां प्राणायामोपकारकत्वमाह षट्कर्मेति षट्कर्मभिर्धौत्यादिभिर्नि
र्गतास्थौल्यं स्थूलस्य भावः स्थौल्यं कफदोषा विंशतिसंख्याकाः मलादयश्च यस्य स तथा दोषाधिभावेति कत्रयः आदिशब्देन पित्तादयः प्राणाया
मं कुर्यात् ततस्तस्मात् षट्कर्मपूर्वकात् प्राणायामात् अनायासेन श्रमं विना सिद्ध्यति योग इति शेषः षट्कर्माकरणे तु प्राणायामे समाधिकांस्यादिति भावः ३६

रामः
१५

15

मतभेदेन षट्कर्मणामनुपयोगमाह प्राणायामैरिति प्राणायामैरेवशश्वषट्कर्मव्यवछेदेर्थः सर्वेमलाःप्रशुष्यंतिमला इत्युपलक्षणं स्थौल्यकफपित्ता
दीनांइतिहेतोः केषांचिदाचार्याणांयाज्ञवल्क्यादीनांअन्यत्कर्मषट्कर्मनसंमतंनाभिमतं आचार्यलक्षणमुक्तंवायुपुराणे आचिनोतिचशास्त्रार्थमाचरेत्
स्थापयेत्यपि स्वयमाचरतेयस्मादाचार्यस्तेनचोच्यत इति ३७ गजकरणीमाह उदरगतमिति अपानंपवनंअपानवायुंकंठनालेकंठोनालइवकं
ठनालंतस्मिन् उदीर्यउत्क्षिप्यउदरेगतःप्राप्तःसचासौपदार्थश्चभुक्तपीतान्नजलादिः तंययाउद्वमंतीउद्गिरंतिययायोगिन इत्याध्याहारः क्रमे
णयःपरिचयोभ्यासःतेनवश्यंस्वाधीनंनाडीनांचक्रंयस्यास्सातथा तथाकृयाहठज्ञैःहठयोगाभिज्ञैःगजकरणीति निगद्यतेकथ्यते क्रमपरि
चयवश्यनाडिमार्ग इतिक्वचित्पाठःतस्यायमर्थः क्रमपरिचयेनवश्योनाड्याःशंखिन्याःमार्गःकंठपर्यंतोयस्यांसातथा ३८ प्राणायामोवश्यमभ्यस

प्राणायामैरेवसर्वेप्रशुष्यंतिमला इति आचार्याणांतुकेषांचिदन्यत्कर्मनसंमतं ३७ उदरगतपदार्थमुद्वमंतिपवनमपानमुदीर्यकंठनाले
क्रमपरिचयवश्यनाडिचक्रागजकरणीतिनिगद्यतेहठज्ञैः ३८ ब्रह्मादयोपित्रिदशाःपवनाभ्यासतत्पराः अभूवंनंतकभयात्तस्मात्पवनम
भ्यसेत् ३९ यावद्बद्धोमरुद्देहेतावच्चित्तंनिराकुलं यावद्दृष्टिर्भ्रुवोर्मध्येतावत्कालभयंकुतः ४०

नीयःसर्वोत्तमेऽभ्यस्तत्वान्महाफलत्वाच्चेतिसूचयन्नाहचतुर्भिः ब्रह्मादयइति ब्रह्माआदिर्येषांतेब्रह्मादयस्तेपिकिमुतान्येइत्यर्थः त्रिदशाःदेवाः
अंतंयातीत्यंतकःकालःतस्माद्भयंअंतकभयं तस्मात्पवनस्यप्राणवायोःयोभ्यासःरेचकपूरककुंभकभेदभिन्नप्राणायामाख्यस्तत्परःतस्मिन्तत्पराःअ
वहिताअभूवन्नासन्तस्मात्पवनंअभ्यसेत्प्राणमभ्यसेत् ३९ यावदितियावत्कालंपर्यंतंमरुत् प्राणानिलःदेहेशरीरेबद्धःश्वासोछ्वासक्रियाशून्यः
यावच्चित्तमंतःकरणंनिराकुलमविक्षिप्तंसमाहितं यावद्भ्रुवोर्मध्येदृष्टिःअंतःकरणवृत्तिः दृशिर्ज्ञानसामान्यार्थः तावत्तत्कालपर्यंतं कलय
तीतिकालोंतकस्तस्माद्भयंकुतःनकुतोपीत्यर्थः तथाचवक्ष्यति खाद्यतेनचकालेनबाध्यतेनचकर्मणासाध्यतेनसकेनापियोगीयुक्तःसमाधिने
ति स्वाधीनमृत्युर्भवतीत्यर्थः ४०

विधिवदिति विधिवत्प्राणसंयामैः आसनंजालंधरबंधादिविधियुक्तप्राणायामैः नाडीचक्रे नाडीनांचक्रे समूहे सम्यक् विशोधिते विशेषेण शोधिते निर्मले सति मारुतो वायुः सुषुम्णायाः इडापिंगलयोर्मध्यस्था नाडी तस्या वदनं मुखं भित्वा सुखादनायासात् विशति सुषुम्णांतरिति शेषः ४१ मरुतइति मध्ये सुषुम्णामध्ये संचारः सम्यक् चरणं गमनं मूर्धपर्यंतं यस्य सः मध्यसंचारः तस्मिन्सति मनसः स्थैर्यं ध्येयाकारवृत्तिप्रवाहः जायते याऽभवति यो मनसः सुस्थिरीभावः सुस्थिरीभवनं सैव मनोन्मनी अवस्था मनोन्मनीशब्दस्य मनोन्मनीपर्यायः तथाग्रे वक्ष्यति राजयोगः समाधिश्चेत्यादिना ४२ विचित्रकेषु कुंभकेषु प्रवृत्तिं जनयितुं तेषां मुख्यफलमवांतरफलं चाह तत्सिद्धइति विधानं कुंभकाभ्यासप्रकारः तं जानंतीति विधानज्ञाः तत्सिद्धये उन्मन्यवस्थासिद्धये चित्रान् सूर्यभेदनादीन् नानाविधान्कुंभकान्

विधिवत्प्राणसंयामैर्नाडीचक्रे विशोधिते सुषुम्णावदनं भित्वा सुखाद्विशति मारुतः ४१ मारुते मध्यसंचारे मनःस्थैर्यं प्रजायते यो म
नःसुस्थिरीभावः सैवावस्था मनोन्मनी ४२ तत्सिद्धये विधानज्ञाश्चित्रान्कुर्वंति कुंभकान् विचित्रकुंभकाभ्यासाद्विचित्रां सिद्धिमाप्नुया
त् ४३ अथ कुंभकभेदाः सूर्यभेदनमुज्जायी सीत्कारी सीतली तथा भस्त्रिका भ्रामरी मूर्छा प्लाविनीत्यष्टकुंभकाः ४४ पूरकांते तु क
र्त्तव्यो बंधो जालंधराभिधः कुंभकांते रेचकादौ कर्त्तव्यस्तूड्डियानकः ४५

कुर्वंति विचित्राश्च ते कुंभकाश्च विचित्रकुंभकाः तेषां अभ्यासात् अनुष्ठानात् विचित्रां अणिमादिभेदेन नानाविधां विलक्षणां वा जन्मौषधिमंत्रतपोजाताभ्यः तदुक्तं भागवते जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेदिति आप्नुयादभ्यासीत्याहारादपिं पायेति भावः अथाष्टकुंभकानामभिनिर्दिशति सूर्यभेदनमिति स्पष्टं ४४ अथहठसिद्धावनन्यथासिद्धायरमहत्स्यात्सर्वकुंभकसाधारणयुक्तिमाह त्रिभिः पूरकांतेति जालंधरइत्यभिधानाम यस्य सः जालंधराभिधः बंधः बध्नाति प्राणवायुमिति बंधः कंठाकुंचनपूर्वकं चिबुकस्य हृदि स्थापनं जालंधरबंधः पूरकांते पूरकस्यांते पूरकानंतरं कर्तव्यस्तु शाहानः कुंभकादौ उड्डियानकस्तु कुंभकस्यांते किंचित्कुंभकशेषे रेचकस्यादौ रेचकादौ रेचकात्पूर्वं कर्तव्यः प्रयत्नविशेषेण नाभिप्रदेशस्य पृष्ठत आकर्षणमुड्डियानं बंधः ४५

अधस्तादिति कंठस्य संकोचनं तस्मिन्कृते सति जालंधरबन्धे कृते सतीत्यर्थः आशु अव्यवहितोत्तरमेव अधस्तात् अधःप्रदेशात् आकुंचनेन आधारकुंचनेन मूलबन्धेनेत्यर्थः मध्ये नाभिप्रदेशे पश्चिमतः पृष्ठतः तानं तानेन आकर्षणं तेन उडियानबंधेनेत्यर्थः कृते इत्याकृतेन बंधत्रयेण प्राणो वायुः ब्रह्मनाडीं सुषुम्नां गच्छतीति ब्रह्मनाडिगः सुषुम्नानाडिगामी स्यादित्यर्थः। अत्रेदं रहस्यं यदि श्रीगुरुमुखात् जिह्वाबंधः सम्यक् परिज्ञातः तर्हि जिह्वाबंधपूर्वकेन जालंधरबंधेनैव प्राणायामः सिध्यति वायुप्रकोपो नैव भवति। वपुः कृशत्वं वदने प्रसन्नतेत्यादीनि सर्वाणि लक्षणानि जायंते इति मूलबंधोडियानबन्धौ नोपयुक्तौ नयो जिह्वाबंधपूर्वकेण जालंधरबंधेनाभ्यासि कृत्वा न जिह्वाबंधो न विदितः अथैदधस्तात्कुंचनेनेति श्लोकोक्तरीत्या प्राणायामाः कर्तव्याः त्रयोपि बंधा गुरुमुखात् ज्ञातव्याः मूलबंधस्त्व सम्यक् ज्ञातो नानारोगोत्पादकः तथाहि यदि मूलबंधे कृते धातुक्षयो विभ्रमो ग्निमांद्यं मामाघंगुडिकासमूहाकारं मलस्यैव पुरीषं स्यात्तदा मूलबंधः सम्यक् न स्यादिति बोध्यं यदि तु धातुवृद्धिः सम्यक् मलशुद्धिः अग्निदीप्तिः सम्यक् नादाभिव्यक्तिश्च स्यात्तदा ज्ञेयं मूलबंधः सम्यक् ज्ञात इति ६६ अपानमिति अपानवायुं ऊर्ध्वं उत्थाप्य आधारकुंचनेन प्राणं प्राणवायुं कंठादधः अधोभागे नयेत् प्रापयेत् यः सः योगी योगोस्यास्तीति अभ्यस्यत्वेनेति योगी योगाभ्यासी जरया वार्द्धकेन विमुक्तः विशेषेण मुक्तः सन् षोडशानां अब्दानां समाहारः षोडशाब्दं षोडशाब्दं वयो यस्य सः तादृशो भवेत् यद्यपि पूरकान्ते

अधस्तात्कुंचनेनाशु कंठसंकोचने कृते ॥ मध्ये पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः ॥६६॥ अपानमूर्ध्वमुत्थाप्य प्राणं कंठादधो नयेत् ॥ योगी जराविमुक्तः सन् षोडशाब्दवयो भवेत् ॥६७॥

तु कर्तव्य इत्यादीनां त्रयाणां श्लोकानां एक एवार्थः पर्यवस्यति तथापि पूरकान्ते तु कर्तव्य इत्यनेन बंधानां काल उक्तः अधस्तात्कुंचनेनेत्यनेन बंधानां स्वरूपमुक्तं अपानमूर्ध्वमुत्थाप्येत्यनेन बंधानां फलमुक्तमिति विशेषः जालंधरबंधे मूलबंधे च कृते नाभेरधोभागे आकर्षणात्मको बंधः उडियानबंधो भवेदित्यतः अस्मिन् श्लोके नोक्तः तथा चोक्तं स्तानेश्वरेण गीतावत्साख्यव्याख्यायां मूलबंधे जालंधरबंधे च कृते नाभेरधोभागे आकर्षणात्मको बंधः स्वयमेव भवतीति ॥६७॥ योगाभ्यासक्रमं वक्ष्ये योगिनां योगसिद्धये ॥ उषःकाल समुत्थाय प्रातःकालेथवा गुरुम् ॥१॥ गुरुं नमस्कृत्य शिरसि हृदयेश्चेष्टदेवतां ॥ शौचं कृत्वा दंतशुद्धिं विदध्याद्भस्मधारणं ॥२॥ शुचौ देशे मठे रम्ये प्रतिष्ठाप्यासनं मृदु ॥ तत्रोपविश्य संस्मृत्य मनसा गुरुमीश्वरं ॥३॥ देशकालौ च संस्मृत्य संकल्पविधिपूर्वकं ॥ अद्येत्यादि श्रीपरमेश्वरप्रसादपूर्वकं समाधितत्फलसिद्ध्यर्थं आसनपूर्वकान् प्राणायामादीन् करिष्ये। अनंतं प्रणमेद्देवं नागेशं पीठसिद्धये ॥४॥

ह. प्र. दी.

१७

मणिभ्राजत्फणासहस्रविधृतविश्वंभरामंडलायानंतायनागराजायनमः। ततोभ्यसेदासनानिश्रमेजातेशवासनं। अंतेसमभ्यसेत्तंतुश्रमाभावेतुनाभ्य
सेत्॥७॥ करणीविपरीताख्यांकुंभकात्पूर्वमभ्यसेत्। जालंधरस्यदार्ढ्यार्थंकुंभकेषूपयोगतः। विधायाचमनंकृत्वाकर्मांगंप्राणसंयमं। योगीन्द्रा
दीन्नमस्कृत्यकोर्माच्चशिववाक्यतः। कूर्मपुराणोक्तशिववाक्यं॥ नमस्कृत्याथयोगीन्द्रान्सशिष्यांश्चविनायकं। गुरुंचैवाथमांयोगीयुंजीतसुसमाहित
ः॥ बध्वाभ्यासेत्सिद्धपीठंकुंभकान्वेधपूर्वकं। प्रथमेदशकर्तव्याःपंचवृद्ध्यादिनेदिने॥९॥ कार्याअशीतिपर्यंतंकुंभकाःसुसमाहितैः। यो
गीन्द्रःप्रथमंकुर्यादभ्यासेचंद्रसूर्ययोः॥ अनुलोमविलोमाभ्यांभेदेनप्राकुमनीषिणः॥ सूर्यभेदनमभ्यस्यबंधपूर्वकमेकधीः उज्जायिं
ततःकुर्यात्सीत्कारींशीतलींततः॥११॥ भस्त्रिकांचसमभ्यस्यकुर्यादन्यान्नचापरान्॥ मुद्राःसमभ्यसेद्बुध्यागुरुवक्त्राद्यथाक्रमं॥१२॥
ततःपद्मासनंबध्वाकुर्यान्नादानुचिंतनं॥ अभ्यस्यसकलंकुर्यादीश्वरार्पणमादरात्॥ अभ्यासादुत्थितःस्नानंकुर्यादुष्णेनवारिणा॥
१३॥ स्नात्वासमापयेन्नित्यंकर्मसंक्षेपतःसुधीः। मध्याह्नेपितथाभ्यस्यकिंचिद्विश्रम्यभोजनं॥१४॥ कुर्वीतयोगिनांपथ्यंअपथ्यं
नकदाचन॥ एलांवापिलवंगंवाभोजनांतेचभक्षयेत्॥१५॥ केचित्कर्पूरमिच्छंतितांबूलंशोभनंतथा। चूर्णेनरहितंसत्यंपवना
भ्यासयोगिना॥१६॥ इतिचिंतामणौवाक्यंस्वारस्यंभजतेनहि। केचित्पदेनयस्मात्तुनयोःशीतोष्णहेतुना॥१७॥ भोजनानंतरंकुर्यान्मो
क्षशास्त्रावलोकनं। पुराणश्रवणंवापिनामसंकीर्तनंविभोः॥ सायंसंध्यांविधिंकृत्वायोगंपूर्ववदभ्यसेत्। यदात्रिघटिकाशेषे
दिवसेभ्यासमाचरेत्। अभ्यासानंतरंकार्यंसायंसंध्यातदाबुधैः॥ अर्धरात्रेहठाभ्यासंविदध्यात्पूर्ववद्यमी॥२१॥ विपरीतां
तुकरणींसायंकालार्धरात्रयोः॥ नाभ्यसेद्भोजनादूर्ध्वंयतःसानप्रशस्यते॥२२॥ ॥ २२॥ २२॥ २२॥ ॥ राम:
॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ । ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ राम:॥ ॥१७॥

16

अथदेशाउक्रमेणकुंभकान्विवक्षुःप्रथमोदितंसूर्यभेदनंतकुंभकंश्वाहत्रिभिः आसनइति सुखंददातीतिसुखदंतस्मिन्सुखदेदेशेप्रतिस्थाप्य स्थिरमासनमात्मनः नात्युछ्रितंनातिनीचंचैलाजिनकुशोत्तरमित्युक्तलक्षणेविविक्तेदेशेसुखासनस्थःशुचिःसमग्रीवशिरःशरीरइतिश्रुतेश्चचै चैलाजिनकुशोत्तरेआसनेअस्मिल्लिन्नित्याभ्यस्तं आस्यतेनेनेतिवा तस्मिन्योगीयोगाभ्यासीआसनंस्वस्तिकवीरसिद्धपाद्यन्यतमंसुखद्यत्वात्सिद्धासनमेववा बध्वैवबंधनेनसंपाद्यैवकृत्वैवेत्यर्थः ततःआसनबंधानंतरंदक्षाद्दक्षिणभागस्थायानाडीपिंगलातयावहिःस्थंदेहाद्बहिः वर्तमानंपवनंवायुंशनैःमंदं मंदमाकृष्य पिंगलयामंदंमंदंपूरकंकृत्वेत्यर्थः ४८ आकेशादिति केशानांमर्यादीकृत्येत्याकेशंतस्मात् नखाग्रमामर्यादीकृत्येत्यानखाग्रंतस्मा च्चनिरोधस्यवायोरवरोधस्यावधिमर्यादायस्मिन्कर्मणितत्तथाकुंभयेत् केशपर्यंतंनखपर्यंतंचवायोर्निरोधोयथाभवेत्तथातिप्रयत्नेनकुंभकंकु

आसनेसुखदेयोगीवध्वाचैवासनंततः दक्षनाड्यासमाकृष्यवहिःस्थंपवनंशनैः ४८ आकेशादानखाग्राच्चनिरोधावधिकुंभयेत् ततःशनैः

र्यादित्यर्थः ननुहठान्निरुद्धःप्राणोयंरोमकूपेषुनिःसरेत् देहंविदारयत्येषकुष्ठादिजनयत्यपि ततःप्राणाभ्यासोक्रमेणारण्यहस्तिवत् वन्योग जोगजारिर्वा क्रमेणमृदुतामियात् कोतिशास्त्रनिर्देशान्नचतंपरिलंघयेत् यथाप्राणो[illegible]स्थायंयोगिनाक्रमयोगतः गृहीतःसेव्यमानस्तुविश्व भमुपगच्छतितिवाक्यविरुद्धमतिप्रयत्नेनकुंभकंकुर्यादितिकथमुक्तमितिचेत् नहठान्निरुद्धःप्राणोयमितिवाक्यस्यवलाद्चिरेणजयंकरिष्या मीतिबुद्ध्यारंभस्यववहुभ्यासाभ्यासाक्रूपरत्वात् क्रमेणारण्यहस्तिवदितिदृष्टांतस्वारस्याच्च अतएवसूर्यचंद्रमसोरभ्यासंधारयित्वायथाशक्तिनिधा रयेदितिरोधतइतिचोक्तंसंगच्छतेतस्मात्कुंभकस्त्वतिप्रयत्नपूर्वकंकर्त्तव्यः यथायतिपत्नेनकुंभकःक्रियतेतथातस्मिन्गुणाधिक्यंभवेत् यः थायथाशिथिलःकुंभकस्यात्तथातथागुणाल्पत्वंस्यात् अत्रयोगिनामनुभवोपिप्रमाणं पूरकस्तुशनैःशनैःकार्यःवेगाद्वाकर्त्तव्यःवेगादपिकृतेरर

ह.प्र.टी
१८

केदोषाभावात् रेचकस्तु शनैः शनैः एव कर्त्तव्यः वेगात्कृते रेचके बलहानीप्रसंगात् ततः शनैः शनैरेव रेचयेन्नतु वेगतः इत्याशयेनैकधापृथक्कारोक्तेऽस्य ततोपि
रोधावधिकुंभकानंतरं शनैर्मंदं मंदं सव्ये वामभागे स्थिता नाडी तया सव्यनाड्या इडया पवनं वायुं रेचयेत् बहिर्निःसारयेत् पुनः शनैरित्युक्तिस्तु शनैरेव रेचये
दित्यवधारणार्था तदुक्तं विस्मये च विषादे च दैन्ये चैवावधारणे तथा प्रसादे हर्षे वा वाक्यमेकं द्विरुच्यते इति ४९ कपालशोधनमिति कपालस्य मल
कल्पशोधनं शुद्धिकरं वातजादोषा अशीतिप्रकाराः तान् हंति निवारयतीति वातदोषघ्नं । क्रिमीणां गंडूपदजातानां दोषा विकाराः तान्हरतीति क्रिमिदोषहृत् पुनःपु
नर्भूयोभूयः कार्यं सूर्येणापूर्य कुंभयित्वा चंद्रेण रेचनमितिरीत्या इदं उत्तमं कुंभकं सूर्यभेदनं सूर्यभेदनाख्यं कुंभकं योगिभिरितिशेषः ५० उज्जायी

सव्यनाड्या रेचयेत्पवनं शनैः ४९ कपालशोधनं वातदोषघ्नं क्रिमिदोषहृत् पुनः पुनरिदं कार्यं सूर्यभेदनमुत्तमं ५० अथोज्जायी
मुखं संयम्य नाडीभ्यामाकृष्य पवनं शनैः यथा लगति कंठात्तु हृदयावधि सस्वनं ५१ पूर्ववत्कुंभयेत्प्राणं रेचयेदिडया ततः श्लेष्मदो

नमाहस्सार्द्धेन मुखमिति मुखमास्यं संयम्य संयमं कृत्वा मुद्रयित्वेत्यर्थः कंठात्तु कंठादारभ्य हृदयावधि हृदयमवधिर्यस्मिन् कर्मणि तत्तथा स्वनेन सहितं यथा
स्यात्तथा उभोः क्रियाविशेषणं लगति श्लिष्यति पवन इत्यर्थात् तथा तेन प्रकारेण नाडिभ्यां ईडापिंगलाभ्यां पवनं वायुं शनैर्मंदं आकृष्य आकर्षणं कृत्वा पूरयि
त्वेत्यर्थः प्राणं पूर्ववत् पूर्वेण सूर्यभेदनेन तुल्यं पूर्ववत् आकेशादानखाग्राच्च निरोधावधि कुंभयेदित्युक्तरीत्या कुंभयेत् ततः कुंभकानंतरमिडया वाम
नाड्या रेचयेत्त्यजेत् उज्जायीकरणमाहात्म्यमाह सार्द्धश्लोकेन श्लेष्मदोषहरमिति कंठे कंठप्रदेशे श्लेष्मणो दोषाः श्लेष्मदोषाः कासादयः तान्हरतीति श्लेष्मदो
षहरं तं देहानलस्य देहमध्यगतानलस्य जाठरस्याग्नेर्विवर्द्धनं विशेषेण दीपनं वर्द्धनमित्यर्थः नाडीति नाडीशिराजलं पीतमुदकं उदरं तुदं आसमंतात् देहवर्त्ति
मानाधातवआधवएवः एषामितरेतरद्वंद्वः तेषु गतः प्राप्तो यो दोषो विकारः तं विशेषेण नाशयतीति नाडीजलोदराधातुगतदोषविनाशनं गच्छतामंत्रं:

17

राम:
१८

गमनंकुर्वता तिष्ठतास्थितेनवापिपुंसाउज्जायाख्यंउज्जायीइति आख्यायस्यतत् तुइति अस्यवैशिष्ट्यंद्योतयति कार्यंकर्त्तव्यंउज्जायीतिक्वचित्पाठः गच्छता
तिष्ठतातुबंधरहितःकर्त्तव्यः कुंभकशब्दस्त्रिलिंगःपुंल्लिंगपाठेतुविशेषणेपिपुंल्लिंगपाठःकार्यः ५३ सीत्कारीकुंभकमाह सीत्कामिति वक्त्रेमुखेसीत्कां
सीतस्वसीत्कासीदितिशब्दःसीत्कारस्तांकुर्यात्ओष्ठयोरंतरेसंलग्नयाजीह्वयासीत्कारपूर्वकंमुखेनपूरकंकुर्यादित्यर्थः घ्राणेनैवनाशिकयैवत्यजनेनो
भाभ्यांपुटाभ्यांरेचकःकार्यइत्यर्थः एवशब्देनवक्त्रस्यव्यवच्छेदः वक्त्रेणवायोर्निःसारणंतुअभ्यासानंतरमपिनकार्यंबलहानिकरत्वात् विजृंभिकांरेचकंकुर्या
दित्यत्रापिसंबध्यते कुंभकस्तूक्तोपिसित्कार्याःकुंभकत्वादेवावगंतव्यः अथसीत्कार्याःप्रसंसाम् एवमुक्तप्रकारेण अभ्यासःपोनःपुन्येनानुष्ठानंसएवयो

ष्महरंकंठेदेहानलविवर्द्धनं नाडीजलोदराधातुगतदोषविनाशनं गच्छतातिष्ठताकार्यमुज्जाय्याख्यंतुकुंभकं ५३ अथसीत्कारी
सीत्कांकुर्यात्तथावक्त्रेघ्राणेनैवविजृंभिकां एवमभ्यासयोगेनकामदेवोद्वितीयकः ५४ योगिनीचक्रसंमान्यःसृष्टिसंहारकारकः
नक्षुधानतृषानिद्रानैवालस्यंप्रजायते ५५ भवेत्सत्वंचदेहस्यसर्वोपद्रववर्जितः अनेनविधिनासम्यंयोगिन्द्रोभूमिमंडले ५६

गःयोगसाधनंतस्मात्तेनद्वितीयएवद्वितीयकःकामदेवःकंदर्पःरूपलावण्यातिशयेनकामदेवशादृश्यात् ५४ योगिनीनांचक्रंयोगिनीचक्रंयोगिनीसमूह
तस्यमान्यःसंसेव्यःसृष्टिःप्रपंचोत्पत्तिःसंहारोलयस्तयोःकारकःकर्त्ताक्षुधाभोक्तुमिच्छानतृषाजलपानेच्छानिद्रातुप्रसिद्धैवआलस्यंकाय चित्तगौरवयो
स्तद्वयभावः कायगौरवंकफादिनाचित्तगौरवंतमोगुणेननैवप्रजायतेनैवप्रादुर्भवति एवमभ्यासयोगेनेतिप्रजायतइति च प्रतिवाक्यंसंबध्यते ५५ भ
वेदिति देहस्यशरीरस्यसत्वंबलंचभवेत् अनेनउक्तेनविधिनाअभ्यासविधिनायोगिन्द्रःयोगिनामिन्द्रइवयोगीन्द्रः भूमिमंडलेसर्वैरुपद्रवैर्वर्जितःसर्वोपद्रववर्जि
तोभवेत् सम्यक्सर्ववाक्यंसावधारणमितिन्यायादुक्तफलंभवत्येवेत्यर्थः ५६

शीतलीकुंभकमाह जिह्वयेति जिह्वया ओष्ठयोर्बहिर्निर्गतया विहंगमाधरचंचुशदृश्या वायुंआकृष्य शनैः पूरकं कृत्वेत्यर्थः पूर्ववत् सूर्यभेदनवत्कुंभस्य कुंभकस्य साधनं विधानं कृत्वेत्यध्याहारः सुधीः शोभना धीर्यस्य सः घ्राणरंध्रे घ्राणरंध्राभ्यां नासापुटविवराभ्यां शनकैः शनैरेव अव्ययसर्वनाम्नामित्यकच् पवनं वायुं रेचयेत् ५७ शीतलीगुणानाह गुल्मप्लीहादिकानिति गुल्मश्च प्लीहा च गुल्मप्लीहौ रोगविशेषौ आदिर्येषां ते गुल्मप्लीहादिकास्तान् रोगान् आमयान् ज्वरं ज्वराख्यं रोगं पित्तं पित्तविकारं क्षुधां भोक्तुमिच्छां तृषां जलपानेच्छां विषाणि सर्पादिविषजनितविकारान् शीतली नाम इति प्रसिद्धार्थकमव्ययं इयमुक्ता कुंभिका निहंति नितरां हंति कुंभशब्दः स्त्रीलिंगोपि तथा च श्रीहर्षः उदस्य कुंभीरथ शातकुंभजा इति स्वार्थिकप्रत्यये कुंभीएवकुंभिका इति ५८ भस्त्राकुंभकस्य पद्मासनपूर्वकामेवानुष्ठानात्तदादौ पद्मासनमाह ऊर्वोरिति उपरि उत्ताने ऊर्ध्वमुखे उभे द्वे पादयोः तले अधःप्रदेशौ ऊर्वोः संस्थाप्य सम्यक् स्थापयित्वा वशेत् एतत्पद्मासनं भ

अथ शीतली जिह्वया वायुमाकृष्य पूर्ववत्कुंभसाधनं शनकैर्घ्राणरंध्राभ्यां रेचयेत्पवनं सुधीः ५७ गुल्मप्लीहादिकान्रोगांज्वरं पित्तं क्षुधां तृषां विषाणि शीतली नाम कुंभिकेयं निहंति हि ५८ अथ भस्त्रिका ऊर्वोरुपरि संस्थाप्य उभे पादतले उभे पद्मासनं भवेदेतत्सर्वपापप्रणाशनं ५९ सम्यक्पद्मासनं बद्ध्वा समग्रीवोदरः सुधीः मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत् ६० यथा लगति हृत्कंठे कपालावधि सस्वनं वेगेन पूरयेच्चापि हृत्पद्मावधि मारुतं ६१

वेत् कीदृशं सर्वेषां पापानां प्रदृष्टरोगनाशनं अत्रोपरित्यव्ययं उत्तानवाचकं तथा च कारके प्रमनोरमायां उपर्युपरिबुद्धीनामित्यत्रोपरिबुद्धीनामित्यस्योत्तानबुद्धीनामिति व्याख्यानं कृतं ५९ भस्त्रिकाकुंभकमाह सम्यगिति ग्रीवा च उदरं च ग्रीवोदरं पाण्यंगत्वादेकवद्भावः समं ग्रीवोदरं यस्य सः समग्रीवोदरः सुस्थिता धीर्यस्य सः सुधीः पद्मासनं सम्यक् स्थिरं बद्ध्वा मुखं संयम्य संयतं कृत्वा यत्नेन प्रयत्नेन घ्राणेन घ्राणस्यैकतरेण रंध्रेण प्राणं शरीरांतःस्थितं वायुं रेचयेत् ६० रेचकप्रकारमाह यथेति हृच्च कंठश्च हृत्कंठं तस्मिन् हृत्कंठे समाहारद्वंद्वः कपालावधि कपालपर्यंतं स्वनेन सहितं सस्वनं यथा स्यात्तथा यथा येन प्रकारेण लगति प्राण इति शेषः तथा रेचयेत् हृत्पद्मावधिर्यस्मिन्कर्मणि तत् हृत्पद्मावधि वेगेन तरसा मारुतं वायुं पूरयेत् चापीति पादपूरणार्थं ६१

ता२

पुनरिति तद्वत्सर्ववत्पुनर्विरेचयेत् पुनः पुनः पूरयेदित्यन्वयः उक्तेर्थे दृष्टान्तमाह यथैवेति लोहकारेण लोहविकारकारणां कर्तृभस्त्राग्नेर्धमनसाधनीभूतं चर्म यथैव येनैव प्रकारेण वेगेन चाल्यते ६२ तथैव तेनैव प्रकारेण स्वशरीरस्थं स्वशरीरस्थितं पवनं प्राणं धिया बुद्ध्या चालयेत् रेचकपूरकयोर्निरन्तरावर्त्तनेन चालनस्यावधिमाह यदाश्रमइति यदा यस्मिन्काले देहे शरीरे श्रमो रेचकपूरकयोर्निरन्तरावर्त्तनेनायासो भवेत् तदा तस्मिन्काले यथा येन प्रकारेण पवनेन वायुना लघु क्षिप्रमेव उदरं पूर्णं भवेत् तथा तेन प्रकारेण सूर्येण सूर्यनाड्यापूरयेत् लघु क्षिप्रमरं द्रुतमित्यमरः ६३ पूरकानन्तरं यत्कर्त्तव्यं तदाह धारयेदिति मध्यमातर्जनीभ्यां मध्यमातर्जनीभ्यां विना अंगुष्ठानामिकाकनिष्ठिकाभिर्नासिकां दृढं धारयेत् अंगुष्ठेन दक्षिणनासापुटं निरुध्य अनामिकाक

तथैव स्वशरीरस्थं चालयेत्पवनं धिया यदा श्रमो भवेद्देहे तदा सूर्येण पूरयेत् ६३ यथोदरं भवेत्पूर्णमनिलेन तथा लघु धारयेन्नासिका
मध्येतर्जनीभ्यां विना दृढं ६४ विधिवत्कुंभकं कृत्वा रेचयेदिडयानिलं वातपित्तश्लेष्महरं शरीराग्निविवर्द्धनम् ६५

निष्ठिकाभ्यां वामनाशापुटं निरुध्य नासिकां दृढं गृह्णीयादित्यर्थः ६४ विधिवदिति विधिवत्बंधपूर्वकं कुंभकं कृत्वा इडया चंद्रनाड्या अनिलं वायुं रेचयेत् भस्त्राकुंभकस्यायं परिपाटी वामनासिकाकनिष्ठिकाभ्यां निरुध्य दक्षिणनासिकापुटेन भस्त्रावत् वेगेन रेचकपूरकाः कार्याः श्रमे जाते तेनैव नासापुटेन पूरकं कृत्वांगुष्ठेन दक्षिणनासापुटं निरुध्य यथाशक्ति कुंभकं धारयेत् पश्चादिडया रेचयेत् पुनः दक्षिणनाशापुटं अंगुष्ठेन निरुध्य वामनासिकापुटेन भस्त्रावत् झटिति रेचकपूरकाः कर्त्तव्याः श्रमे जाते तेनैव नासिकापुटेन पूरकं कृत्वाऽनामिकाकनिष्ठिकाभ्यां वामनासिकापुटं निरुध्य यथाशक्ति कुंभकं कृत्वा पिंगलया रेचयेदित्येका रीतिः वामनासिकापुटं अनामिकाकनिष्ठिकाभ्यां निरुध्य दक्षिणनाशापुटेन पूरकं कृत्वा झटित्यंगुष्ठेन दक्षिणना

सिकापुटं निरुध्य वामनासिकापुटेन चरेत् एवं शतधा कृत्वा धर्मे जाते तेनैव पूरयेत् बंधपूर्वकं कुंभकं कृत्वा इडया रेचयेत् पुनः दक्षिणनासापुटकं मंगुष्ठेनानि रुध्य वामनासापुटेन पूरकं कृत्वा झटिति वामनासिकापुटमनामिकाकनिष्ठिकाभ्यां निरुध्य पिंगलया रेचयेत् भस्त्रावत्पुनः पुनरेवं कृत्वा रेचकपूरकाभ्यां श्रमे जाते वामनासापुटेन पूरकं कृत्वा अनामिकाकनिष्ठिकाभ्यां धृत्वा पिंगलया रेचयेदिति द्वितीया रीतिः भस्त्रिकागुणानाह वातपित्तेति वातश्च पित्तं च श्लेष्मं च पा वातपित्तश्लेष्मणाः तान् हरतीति तत्त्वहरं शरीरे देहे योग्निर्जठरानलः तस्य विशेषेण वर्द्धनं दीपनं ६५ क्षिप्रं शीघ्रं कुंडल्याः सुषुप्तायां बोधकं बोधकरं पुनातीति पवनं पवित्रकारकं सुखं ददातीति सुखदं हितं त्रिदोषहरत्वात् सर्वेषां हितं सर्वदा च हितं सर्वेषां कुंभकानां सर्वदा हितत्वेपि सूर्यभेदनोज्जायिना

[illegible]

कुंडलीबोधकं क्षिप्रं पवनं सुखदं हितं ब्रह्मनाडीमुखे संस्थकफाद्यर्गलनाशनं ६६
सम्यग्गात्रसमुद्भूतग्रंथित्रयविभेदकं विशेषेणैव कर्तव्यं भस्त्राख्यं कुंभकं त्विदं ६७

उष्णौ प्रायेण शीतहितौ शीत्कारी शीतल्यौ शीतले प्रायेणोष्णहितौ भस्त्राकुंभकः समशीतोष्णः सर्वदा हितः सर्वेषां कुंभकानां सर्वरोगहरत्वेपि सूर्यभेदनं प्रायेण वातहरं उज्जायी प्रायेण श्लेष्महरः शीत्कारी शीतल्यौ प्रायेण पित्तहरे भस्त्राख्यकुंभकस्त्रिदोषहर इति बोध्यं ब्रह्मनाडी सुषुम्णा ब्रह्मप्रापकत्वात्तथाख्याताः शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति तस्याः मुखे अग्रभागे संस्थः सम्यक् स्थितो यः कफादिरूपोर्गलः प्राणगतिप्रतिबंधकः तस्य नाशनं नाशकर्तृ ६६ सम्यक् दृढीभूतं गात्रोगात्रमध्ये सुषुम्णायामेव सम्यगुद्भूतं जातं यद्ग्रंथीनां त्रयं ग्रंथित्रयं ब्रह्मग्रंथिविष्णुग्रंथिरुद्रग्रंथिरूपं तस्य विशेषेण भेदजनकं अतएवेदं भस्त्राइत्याख्यायत इति भस्त्राख्यं कुंभकं तु विशेषेणैव कर्तव्यं अवश्यं कर्त

व्यमिति शेषः सूर्यभेदनादयस्तु यथासंभवं कर्तव्याः ७

19

भ्रामरीकुंभकमाह वेगादिति वेगात् तरसा घोषं सशब्दं यथा स्यात्तथा भृंगस्य भ्रमरस्य नाद इव नादो यस्मिन् कर्मणि तत् तथा पूरकं कृत्वा भृंग्याः भ्रमर्याः नाद इव ना
दो यस्मिन् तत्तथा मंदं मंदं रेचकं कुर्यात् पूरकानंतरं कुंभकस्तु सामर्थ्यात् कुंभकत्वादेव सिद्धो विशेषाभावान्नोक्तः पूरकरेचकयोस्तु विशेषोस्तीति तावेवोक्तौ एवं कुर्वतां
नामभ्यसनमभ्यासः तस्य योगो युक्तिः तस्मात् योगीन्द्राणां चित्ते काचिदनीर्वाच्या आनंदलीला क्रीडा आनंदलीला जाता उत्पन्ना भवति ६८ मूर्छाकुंभक
माह पूरकांत इति पूरकस्यांते अवसाने अतिशयेन गाढं गाढतरं जालंधराख्यं बंधं बध्वा शनैर्मंदं मंदं रेचयेत् इयं कुंभिका मूर्छनाख्या मनो मूर्छयतीति मू
र्छा मूर्छना इत्याख्या यस्या इति मूर्छनाख्या कीदृशी मनोमूर्छतीति मनोमूर्छा एतेन मूर्छनाया विग्रहदर्शनपूर्वकं फलमुक्तं पुनः कीदृशी सुखप्रदा सुखं ददा
तीति सुखप्रदा ७० प्लाविनीकुंभकमाह अंतरिति अंतः शरीरांतः प्रवर्तितः पूरितः उदारो अतिशयितो यो मारुतः समीरः तेन आसमंतात् पूरितं उदरं येन सः पया

अथ भ्रामरी वेगात् घोषं पूरकं भृंगनादं भृंगीनादं रेचकं मंदमंदं योगींद्राणामेवमभ्यासयोगाच्चित्ते जाता काचिदानं
दलीला ६८ अथ मूर्छा पूरकांते गाढतरं बध्वा जालंधरं शनैः रेचयेन्मूर्छनाख्येयं मनोमूर्छा सुखप्रदा ६९ अथ प्ला
विनी अंतःप्रवर्तितोदारमारुतापूरितोदरः पयस्यगाधेपि सुखात्प्लवते पद्मपत्रवत् ७१ प्राणायामस्त्रिधा प्रोक्तो रेच

स्यगाधेपि अतलस्पर्शेपि पयसि जले पद्मपत्रवत् पद्मपत्रेण तुल्यं सुखात् अनायासात् प्लवते तरति गच्छति ७१ अथ प्राणायामभेदानाह प्राणायाम
इति प्राणस्य शरीरांतः संचारिवायोः आयामनं निरोधनं प्राणायामः प्राणायामलक्षणमुक्तं गोरक्षनाथेन प्राणः स्वदेहजो वायुरायामस्तन्निरोधनमिति रेचकश्च
पूरकश्च कुंभकश्चेति भेदैस्त्रिधा त्रिप्रकारकः रेचकः प्राणायामः पूरकः प्राणायामः कुंभकः प्राणायामश्चेति रेचकलक्षणमाह याज्ञवल्क्यः बहिर्यद्रेचनं वायो
रुदराद्रेचकः स्मृतः रेचकप्राणायामलक्षणं निष्क्रम्य नासाविवरादशेषं प्राणं बहिः शून्यमिवानिलेन निरुच्छ्वसन् तिष्ठति रुद्धवायुः स रेचको नाम महानिरो
धः पूरकलक्षणं वायोरुदरे पूरको हि सः पूरकप्राणायामलक्षणं वाह्येस्थितं घ्राणपुटेन वायुमाकृष्य तेनैव शनैः समंतात् नाडीश्च सर्वाः परिपूरयेद्यः स

सपूरकोनाममहानिरोधः कुंभकलक्षणं संपूर्यकुंभवद्वायोर्धारणंकुंभकोभवेत् अयंकुंभकस्तु पूरकप्राणायामादभिन्नएव नरेचकोनचपूरकोत्रना
सापुटंतावत्स्थितमेववायुं सुनिश्चलंधारयतेक्रमेणकुंभाख्यमेतत्प्रवदंतितज्ज्ञाः अथप्रकारांतरेणप्राणायामंविभजते सहितइति कुंभकोद्विविधःसही
तःकेवलश्चेतिमतोभियोगिनामितिशेषः तत्रसहितोद्विविधःरेचकपूरकः पूरकपूर्वश्च तदुक्तं आरेच्यापूर्यकुर्यात्सवैसहितकुंभकः तत्ररेचकपूर्वकोरे
चकप्राणायामादभिन्नः पूरकपूर्वकःकुंभकःपूरकप्राणायामादभिन्नः केवलकुंभकःकुंभकप्राणायामादभिन्नःप्रत्युक्ताःसूर्यभेदनादयःपूरकपूर्वक
स्यभेदाज्ञातव्याः ७२ सहितकुंभकाभ्यासस्यावधिमाह यावदिति केवलस्यकेवलकुंभकस्यसिद्धिःकेवलसिद्धिर्यावत् यावत्पर्यंतंस्यात्तावत्ता
वत्पर्यंतंसहितंसहितकुंभकंसूर्यभेदनादिकंअभ्यसेत्अनुतिष्ठेत् सुषुम्णाभेदानंतरंयदासुषुम्णांतःश्वासाभवंतितदाकेवलकुंभकःसिध्यतिति

पूरककुंभके। सहितःकेवलश्चेतिकुंभकोद्विविधोमतः ७२ यावत्केवलसिद्धिःस्यात्सहितंतावदभ्यसेत् रेचकंपूरकंमुक्त्वासुखंयद्वायुधार
णं ७३ प्राणायामोयमित्युक्तःसवैकेवलकुंभकः कुंभकेकेवलेसिद्धेरेचपूरकवर्जिते ७४ नतस्यदुर्लभंकिंचित्त्रिषुलोकेषुविद्यते ।

दनंतरंसहितंकुंभकादशविंशतिर्वाकार्याः अशीतिसंख्यास्तुर्मैः केवलकुंभकैरेवकर्तव्यास्तिसामर्थ्ये केवलकुंभकाअशीतेरधिकाःकार्याःकेवलकुंभ
कस्यलक्षणमाह रेचकमिति रेचकंपूरकंमुक्त्वासुखंअनायासंयथास्यात्तथायद्वायोर्धारणंवायुधारणंयत् सःवैइतिनिश्चितंकेवलकुंभकःप्राणाया
मइत्युक्तःकेवलप्रसंज्ञाति केवलइतिरेचोरेचकःरेचश्चपूरकश्चरेचपूरकौताभ्यांवर्जितेरहितेकेवलेकुंभकेसिद्धेसतितस्ययोगीनस्त्रिषुलोकेषु
दुर्लभंदुःप्रापंकिंचित्किमपिनविद्यतेतस्यसर्वंसुलभमित्यर्थः शक्तइति केवलंकुंभकेनकेवलकुंभकाभ्यासेनसक्तःसमर्थः यथेष्टंयथेच्छंवायो
र्धारणंवायुधारणंतस्मात्वायुधारणात् राजयोगपदंराजयोगाख्यंपदंलभते अत्रसंशयोनास्तिनिश्चितमेतदित्यर्थः कुंभकाभ्यासस्यपरंपरया
कैवल्यहेतुत्वमाह कुंभकादिति कुंभकात्कुंभकाभ्यासात्कुंडलीआधारशक्तिस्तस्याःबोधोनिद्राभंगोभवेत् कुंडल्याःबोधःकुंडलीबोधःतस्मात्

कुंडलिबोधतः सुषुम्नायां मध्यनाडी अनिर्गला कफाद्यर्गलरहिता भवेत् हठस्य हठाभ्यासस्य सिद्धिः तया द्वारादिपरंपरया केवलस्यरूपसिद्धिर्जायते ७६ हठ
योगराजयोगसाधनयोः परस्परोपकार्योपकारकत्वमाह हठंविनेति हठयोगं विना राजयोगः न सिध्यति राजयोगं विना हठो न सिध्यति ततः तयोरन्यतरस्य
सिद्धिर्नास्ति तस्मात् निष्पत्तिं राजयोगसिद्धिं आमर्यादीकृत्यानिष्पत्तिनस्याः राजयोगसिद्धिपर्यंतं युग्मं हठयोगराजयोगद्वयं अभ्यसेत् अनुतिष्ठेत्
हठातिरिक्तैसाक्षात्परंपरया वा राजयोगसाधनेषु राजयोगशब्दः जीवनसाधने लांगले जीवनशब्दप्रयोगवत् राजयोगसाधनं च चतुर्थोपदेशे वक्ष्यमाणमु
न्मनीशांभवमुद्रादिरूपं अपरोक्षानुभूत्यामुक्तं पंचदशांगरूपं वाक्यसुधायामुक्तं दृश्यानुविद्धादिरूपं च ७७ हठाभ्यासाद्राजयोगप्राप्तिप्रका

शक्तः केवलकुंभेन यथेष्टं वायुधारणात् ७५ राजयोगपदं चापि लभते नात्र संशयः कुंभकात्कुंडलीबोधः कुंडलीबोधतो भवेत् अनिर्गला सुषुम्ना
च हठसिद्धिश्च जायते ७६ हठं विना राजयोगो राजयोगं विना हठः न सिध्यति ततो युग्ममानिष्पत्तेः समभ्यसेत् ७७ कुंभकप्राणरोधांते कुर्याच्चित्तं नि
राश्रयं एवमभ्यासयोगेन राजयोगपदं व्रजेत् ७८ वपुः कृशत्वं वदने प्रसन्नता नादस्फुटत्वं नयने सुनिर्मले अरोगता बिंदुजयोऽग्निदीपनं नाडी
विशुद्धिर्हठसिद्धिलक्षणं

रमाह कुंभकेति कुंभकेन प्राणस्य वायो रोधस्तस्यांते मध्ये चित्तं मनः करणं निराश्रयं कुर्यात् संप्रज्ञातसमाधौ ज्ञाताया ब्रह्माकारवृत्तेः परवैराग्येण वि
लयं कुर्यादित्यर्थः एवमुक्तरीत्या अभ्यासस्य योगो युक्तिस्तेन योगः संहननोपायध्यानसंगतियुक्तिष्विति कोशः राजयोगपदं राजयोगाख्यं पदं व्र
जेत्प्राप्नुयात् ७९ हठसिद्धिज्ञापकमाह वपुः कृशत्वमिति वपुषो देहस्य कृशत्वं कार्श्यं वदने मुखे प्रसन्नता प्रसादः नादस्य ध्वनेः स्फुटत्वं प्राकट्यं न
यने नेत्रे सुनिर्मले अरोगस्य भावो रोगता आरोग्यं बिंदोर्धातोर्जयः क्षयाभावरूपः अग्नेरौदर्यस्य दीपनं दीप्तिः नाडीनां विशोधनं शुद्धिर्मलापगतः एत
त् हठस्य हठाभ्याससिद्धेर्भाविन्या लक्ष्यतेनेनेति लक्षणं ज्ञापकम् ८० इति श्रीहठप्रदीपिकाव्याख्यायां ज्योत्स्नाभिधायां ब्रह्मानंदकृतायां द्वितीयोपदेशः २

हप्रदी
२२

अथ कुंडल्याः सर्वयोगाश्रयत्वमाह सशैलेति शैलाश्च वनानि च शैलवनानि तैः सह वर्तमानाः सशैलवनाः ताश्च ताः धात्र्यश्च भूम्यः तासां धात्रीणाम् एकत्वेपि देशभेदात् भेदमाश्रित्य बहुवचनं अहीनां सर्पाणां नायकोऽनंतोऽहिनायकः शेषो यथा यद्वत् आधारः आश्रयः तथा तद्वत् सर्वेषां योगतंत्राणां योगतंत्राणि योगोपायास्तेषां कुंडली आधारशक्तिराश्रयः कुंडलीबोधं विना सर्वयोगोपायानां वैयर्थ्यादिति भावः १ कुंडलीबोधस्य फलमाह द्वाभ्यां सुप्तेति सुप्ता कुंडली गुरोः प्रसादेन यदा जागर्ति उद्बुध्यते तदा सर्वाणि पद्मानि षट्चक्राणि भिद्यंते भिन्नानि भवंति ग्रंथयोपि च ब्रह्मग्रंथिविष्णुग्रंथिरुद्रग्रंथयः भिद्यंते भेदं प्राप्नुवंतीत्यर्थः २ प्राणस्येति तदा शून्यपदवी सुषुम्ना प्राणस्य वायोः राज्ञां पंथा राजपथः राजपथमिवाचरतीति राजपथायते राजमार्ग

सशैलवनधात्रीणां यथाधारोऽहिनायकः। सर्वेषां योगतंत्राणां तथाधारो हि कुंडली १ सुप्ता गुरुप्रसादेन यदा जागर्ति कुंडली तदा सर्वाणि पद्मानि भिद्यंते ग्रंथयोपि च २ प्राणस्य शून्यपदवी तदा राजपथायते तदा चित्तं निरालंबं तदा कालस्य वंचनं ३ सुषुम्ना शून्यपदवी ब्रह्मरंध्रं महापथः श्मशानं शांभवी मध्यमार्गश्चेत्येकवाचकाः ४ तस्मात्सर्वप्रयत्नेन प्रबोधयितुमीश्वरीं ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासं समाचरेत् ५

यतेन सुखेन गमनसंभवात् तदा चित्तं आलंबनं आश्रयस्तस्मान्निर्गतं निरालंबं निर्विषयं भवति तदा कालस्य मृत्योर्वंचनं प्रतारं भवति ३ सुषुम्नापर्यायानाह सुषुम्नेति इति उक्तास्सप्त। एकस्य एकार्थस्य वाचकाः एकवाचकाः पर्यायाः इत्यर्थः स्पष्टश्लोकार्थः ४ तस्मादिति यस्मात् कुंडलीबोधेनैव बद्धकमेदादिकं भवति तस्मात् सर्वप्रयत्नेन सर्वेण प्रयत्नेन ब्रह्मणश्चिदानंदलक्षणं तस्य द्वारं प्राप्त्युपायः सुषुम्ना तस्य मुखे अग्रभागे सुखेन सुप्तां द्वारं पिधाय सुप्तां ईश्वरीं कुंडलीं प्रबोधयितुं प्रकर्षेण बोधयितुं मुद्राणां महामुद्रादीनां अभ्यासं आवृत्तिं समाचरेत् सम्यगाचरेत् ५

21

रामः
२२

मुद्राद्दशनि महामुद्रेत्यादिसार्द्धेन सार्द्धार्थाः स्पष्टः मुद्राफलमाह सार्द्धाभ्यां इदमिति इदंमुद्रादशकं जराचमरणमरणे तयोः नाशनं निवारकं
७ आदिनाथेनशम्भुनाउदितंकथितं दिविभवं दिव्यंउत्तमं अष्टौचतानिऐश्वर्याणिच अष्टैश्वर्याणि अणिमामहिमागरिमालघिमाप्राप्तिप्राकाम्यमीशतावशि
शिताख्यानि तत्राणिमा संकल्पमात्रेण प्रकृष्यपरमेपरमाणुवद्देहस्यसूक्ष्मता १ महिमप्रकृष्टपरिमाणाकाशादिवन्महत्वभावः २ गरिमालघुतरस्यापि
तूलादेःपर्वतादिवद्गुरुभावः ३ लघिमागुरुतरस्यापिपर्वतादेस्तूलादिवल्लघुभावः ४ प्राप्तिःसर्वभावसान्निध्यंयथाभूमिस्थएवाङ्गुल्यग्रेणस्पृशतिचंद्रम
सं ५ प्राकाम्यमिच्छानभिघातःयथाउदकइवभूमौनिमज्जत्युन्मज्जतिच ६ ईशिताभूतभौतिकानांप्रभवाप्ययसंस्थानविशेषसामर्थ्यं ७ वशित्वंभू

महामुद्रामहाबंधोमहावेधश्चखेचरी । उड्यानं मूलबंधश्चबंधोजालंधराभिधः ६ करणीविपरीताख्यावज्रोलीशक्तिचालनं । इदंहिमुद्रादशकंजरा
मरणनाशनं ७ आदिनाथोदितंदिव्यमष्टैश्वर्यप्रदायकं वल्लभंसर्वसिद्धानांदुर्लभंमारुतामपि ८ गोपनीयंप्रयत्नेनयथारत्नकरंडकं । क
स्मिंश्चिन्नैववक्तव्यंकुलस्त्रीसुरतंयथा ९ अथमहामुद्रा पादमूलेनवामेनयोनिंसंपीड्यदक्षिणं प्रसारितंपदंकृत्वाकराभ्यांधारयेद्दृढं १०

तभौतिकानांस्वाधीनीकरणं ८ तेषांप्रदायकंप्रकर्षेणददातीतितथासर्वेचतेसिद्धाश्चकपिलादयस्तेषांवल्लभंप्रियं मरुतांदेवानामपिदुर्लभंदुःप्रा
प्यंकिमुतान्येषामित्यर्थः ८ गोपनीयमिति प्रयत्नेनप्रकृष्टेनयत्नेनगोपनीयंगोपनार्हंगोपनेदृष्टांतमाह यथेति रत्नानांहीरकादीनांकरंडकंरत्नक
रंडकं यथायेनप्रकारेणगोप्यमेतद्वत् कस्यापिजनमात्रस्यवाकस्यापिसुहृदोपिनैववक्तव्यंनैववाच्यंकिमुतान्यस्यतत्रदृष्टांतःकुलस्त्रियाःसुरतंकु
लस्त्रीसुरतंसंगमनंयथातद्वत् ९ मुद्रासुप्रथमोद्दिष्टत्वेनमहामुद्रांतावदाह पादमूलेनेति वामेनसव्येनपादमूलंपार्ष्णितेनपादमूलेनवा
मपादपार्ष्णिनेत्यर्थः योनिंयोनिस्थानंगुदमेढ्रयोर्मध्यभागंसंपीड्य आकुंचितवामपादपार्ष्णिनायोनिस्थानंदृढंसंयोज्येत्यर्थः दक्षिणंसव्येतरं

ह.प्र.टी.
२२

पदंचरणंप्रसारितंभूमिसंलग्नपाष्णिकंउर्ध्वांगुलिकंदंडवत्कृत्वा कराभ्यांसंप्रदायाकुंचितकूर्परतर्जनीभ्यांदृढंगाढंधारयेत् अंगुष्ठप्रदेशेगृह्णीयात्
१० कंठइति कंठेकंठदेशेवंधनंसम्यक्आरोप्यकृत्वाजालंधरवंधंकृत्वेत्यर्थः वायुंपवनंऊर्ध्वतः उपरिसुषुम्णायांधारयेत् अनेनमूलवंधःसूचितःल
तुयोनिसंपीडनेनजिह्वावंधेनचालितोर्थः इतिसंप्रदायिका यथादंडेनहतस्ताडितोदंडहतःसर्पःकुंडलीकृताकारःदंडस्याकारइवाकारोयस्य सः
ताहशःकुंडलाकारं त्यक्त्वाशरलइत्यर्थः प्रकर्षेणजायतेभवति तथाकुंडलीआधारशक्तिःसहसाशीघ्रमेव अनृज्वीऋज्वीसंपद्यतेतथाभूता
ऋज्वीभूतासरलाभवेत् तदेति तेउभेइडापिंगलेआश्रयोयस्याःसामरणावस्थाजायतेकुंडलीवोधेसतिसुषुम्णायांप्रविष्टेप्राणेद्वयोःपुटे

कंठेवंधंसमारोप्यधारयेद्वायुमूर्ध्वतः यथादंडहतःसर्पोदंडाकारःप्रजायते ऋज्वीभूतातथाशक्तिःकुंडलीस
हसाभवेत् तदासामरणावस्थाजायतेद्विपुटाश्रयाः १२ ततःशनैःशनैरेवरेचयेन्नतुवेगतः इयंखलुमहामु
द्रामहासिद्धैःप्रदर्शिताः १४ महाक्लेशादयोदोषाःक्षीयंतेमरणादयः महामुद्रांचतेनैववदंतिविबुधोत्तमाः १४

योःप्राणवियोगात् ततस्तदनंतरंशनैःशनैरेवरेचयद्वायुमितिसंवध्यते वेगतस्तुवेगात्तुनरेचनेवलहानीप्रसंगात् एवान्वीतिवाक्यालंकारेइयंमहामु
द्रामहासिद्धैरादिनाथादिभिःप्रदर्शिताप्रकर्षेणदर्शिता॥ १३ महामुद्रायाअन्वर्थतामाह महाक्लेशेति महांतश्चक्लेशाश्चमहाक्लेशाअविद्यास्मि
तारागद्वेषाभिनिवेशाःपंचतेआदयोयेषांतत्कार्याणांशोकमोहादीनांतेदोषाःक्षीयंते मरणमादिर्येषांजरादीनांतेविक्षीयंतेनश्यंतियेप
तःतेनैवहेतुनाकिरिणाकुद्भाविबुधाःतेषूत्तमाविबुधोत्तमाःमहामुद्रांवदंति महाक्लेशान्मरणादींश्चदोषान्मुद्रयति शाम्यतिसमयतीति

कुंडलिनीमुख्य[illegible]र्थः १४

राम:
२२

22

महामुद्राभ्यासक्रममाह चंद्रांगइति चंद्रेणचंद्रनाड्यालक्षितमंगंचंद्रांगंतस्मिन्चंद्रांगेवामांगे तुशब्दःपादपूरणेसम्यगभ्यस्य सूर्येणपिंगल
योपलक्षितमंगंसूर्यांगंतस्मिन्सूर्यांगेदक्षांगेपुनःवामांगाभ्यासनंतरंयावत्यावत्कालपर्यंतंतुल्यावामांगेकुंभकाभ्याससंख्यासमासंख्याभवेत्तावदभ्य
सेत् ततःसंख्यासाम्यानंतरंमुद्रांमहामुद्रांविसर्जयेत् अत्रायंक्रमः आकुंचितवामपादपार्ष्णियोनिस्थानेसंयोज्यप्रसारितदक्षिणपादांगुष्ठमाकुंचि
ततर्जनीभ्यांगृहीत्वाभ्यासोवामांगेभ्यासःअस्मिन्नभ्यासेपूरितेवायुर्वामांगेतिष्ठति आकुंचितदक्षपादपार्ष्णिंयोनिस्थानेनियोज्यप्रसारितवामपादांगु
ष्ठमाकुंचिततर्जनीभ्यांगृहीत्वाभ्यासोदक्षांगेभ्यासःअस्मिन्नभ्यासेपूरितेवायुर्दक्षांगेतिष्ठति १५ महामुद्रागुणानाहत्रिभिः नहीति हियस्मा

चंद्रांगेतुसमभ्यस्यसूर्यांगेपुनरभ्यसेत् यावत्तुल्याभवेत्संख्याततोमुद्रांविसर्जयेत् १५ नहिपथ्यमपथ्यंवारसाःसर्वेपिनीरसाः अपिभुक्तंवि
षंघोरंपीयूषमिवजीर्यते १६ यक्ष्मकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः तस्यदोषाःक्षयंयांतिमहामुद्रांतुयोभ्यसेत् १७ कथितेयंमहामुद्रामहा

सिद्धिकरंनृणां

त्महामुद्राभ्यासिनःपथ्याहारः पथ्यंवाअपथ्यंवानपथ्यापथ्यविचारोस्तीत्यर्थः तस्मात्सर्वेभुक्ताःरसाःकट्वम्लादयःजीर्यंतेइतिविभक्तिपरिणामेना
न्वयः नीरसाःनिर्गतोरसोयेभ्यस्तेतथाभूताःपदार्थाजीर्यंतेघोरमितिदुर्जरंभुक्तंअपिविषंस्वेदमपिपीयूषमिवामृतमिवजीर्यतिजीर्णंभवति किंपुना
न्यदितिभावः १६ यःपुमान्महामुद्रामभ्यसेत्तस्यक्षयोराजयोगःकुष्ठगुदावर्तगुल्मरोगविशेषाः आजीर्णंभुक्तान्नापरिपाकः तानिपुरोगमा
अग्रेसराइतियेषांमेहोदरज्वरादीनांतेतथाभूतादृशादोषाः दोषजनितारोगाःक्षयंनाशंयांतिप्राप्नुवंति १७ महामुद्रामुपसंहरंस्तस्यागोप्यत्वमाह
कथितेति इयंएषामहामुद्राकथिताउक्तामयेतिशेषः कीदृशीनृणांअभ्यसतांनराणांमहत्यश्चताःसिद्धयश्चाणिमाद्याःतासांकरीकर्त्री

इयं प्रकृष्टो यत्नः प्रयत्नः तेन प्रयत्नेन गोपनीया गोपनार्हा यस्य कस्य चित् यस्य कस्यापि न अधिकारिणः सर्वथा सामान्येषु न देया दातुं योग्या न भवती-
त्यर्थः १८ महाबंधमाह पार्ष्णिमिति वामस्य सव्यस्य पादस्य चरणस्य पार्ष्णिं गुल्फयोरधोभागं तद्ग्रंथी घुटिके गुल्फौ पुमान् पार्ष्णिस्तयोरधः इत्यमर
योनिस्थाने गुदमेढ्रयोरंतराले नियोजयेत् नितरां योजयेत् वामः सव्यो यो ऊरुस्तस्य उपरि दक्षिणं चरणं पादं संस्थाप्य सम्यक् स्थापयित्वा तथा शब्दः
पादपूरणे १९ पूरयित्वेति ततः तदनंतरं वायुं पूरयित्वा हृदये चिबुकं दृढं निष्पीड्य गाढं संस्थाप्य एतेन जालंधरबंधः प्रोक्तः योनिं गुदमेढ्रयोरंतरा-
लं कुंच्य अनेन मूलबंधः सूचितः अत्र जिह्वाबंधेन गतार्थत्वान्न कर्तव्यः मनः स्वांतं मध्ये मध्यनाड्यां नियोजयेत् प्रवर्तयेत् २० धारयित्वेति शक्तिमनति-

गोपनीया प्रयत्नेन न देया यस्य कस्यचित् १८ अथ महाबंधः पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत् वामोरूपरि संस्थाप्य द-
क्षिणं चरणं तथा १९ पूरयित्वा ततो वायुं हृदये चिबुकं दृढं निष्पीड्य योनिमाकुंच्य मनो मध्ये नियोजयेत् २० धारयित्वा यथाशक्ति रे-
चयेदनिलं शनैः शव्यांगे तु समभ्यस्य दक्षांगे पुनरभ्यसेत् २१ मतमत्र तु केषांचित् कंठबंधं विवर्जयेत् राजदंतस्थजिह्वायां बंधः शस्तो भवेदिति २२

क्रम्य यथाशक्ति धारयित्वा कुंभयित्वा शनैर्मंदं मंदं अनिलं वायुं रेचयेत् सव्यांगे वामांगे समभ्यस्य सम्यगावर्त्य दक्षांगे दक्षिणांगे पुनः यावत्तुल्या भवे-
त्संख्या तावदभ्यसेत् २१ अथ जालंधरबंधे कंठसंकोचस्यानुपयोगमाह मतमिति केषांचित् आचार्याणां इदं मतं किं तदित्याह अत्र जालंधरबंधे कंठ-
बंधं कंठस्य बंधनं बंधः संको संकोचस्तं विवर्जयेत् विशेषेण वर्जयेत् कुतः यतः दंतानां राजनो राजदंताः राजदंतेषु तिष्ठतीति राजदंतस्था राजदंतमध्यस्था
सा चासौ जिह्वा च तस्यां राजदंतस्थजिह्वायां बंधः तदुपरिभागस्य संबंधः शस्तः कंठाकुंचनापेक्षया प्रशस्तो भवेत् इतिहेतो २२ ७

अयंत्विति अयंतुराजदंतस्यजिह्वायांबंधस्तुसर्वाश्चतानाड्यश्चसर्वनाड्यः तासप्रानेमहत्व' ख्याताः तासांसुषुम्नातिरिक्तानांऊर्ध्वंउपरिवायोर्गतिर्गतिः तस्या
निरोधकःप्रतिबंधकः एतेनबध्नातिहिशिराजालमितिजालंधरोक्तंफलमनेनैवसिद्धमितिसूचितं महाबंधस्यफलमाह अयंखल्विति अयमुक्तःखलुप्रसिद्धः
महाबंधःमहासिद्धीःप्रकर्षेणददातीतितथा २३ कालस्यमृत्योःपाशःबंधस्तेनयोमहाबंधःबंधनंतस्यविशेषेणमोचनेमोक्षणेविचक्षणःप्रवीणःत्रि
सृणांनदीनांवेणीसमुदायःतस्याःसंगमःप्रयागःतंधत्ते केदारंभ्रुवोर्मध्येशिवस्थानंकेदारशब्दवाच्यं तंमनःस्वांतंप्राप‍येत् गतिबुद्धीत्यादिनाअणौ
कर्तुर्मनसःणौकर्मत्वं २४ महाबंधेवज्रकामस्तस्योत्कर्षंतावदाह रूपेति रूपसौंदर्यंचक्षुःप्रियत्वंलावण्यंकांतिविशेषः तदुक्तं मुक्ताफलेषुच्छा

अयंतुसर्वनाडीनामूर्ध्वंगतिनिरोधकः अयंखलुमहाबंधोमहासिद्धिप्रदायकः २३ कालपाशमहाबंधविमोचनविचक्षणः
त्रिवेणीसंगमंधत्तेकेदारंप्रापयेन्मनः २४ रूपलावण्यसंपन्नायथास्त्रीपुरुषंविना महामुद्रामहाबंधौनिष्फलौ
वेधवर्जितौ २५ अथमहावेधः महाबंधस्थितोयोगीकृत्वापूरकमेकधीः वायूनांगतिमाहत्यनिभृतंकंठमुद्रया २६

यायास्तरलत्वमिवांतरे प्रतिभातियदंगेषुतल्लावण्यमिहोच्यते इति ताभ्यांसंपन्नाविशिष्टास्त्रीयुवतिःपुरुषंभर्तारंविनायथायादृशीनिष्फला
तथामहामुद्राचमहाबंधश्चतौवेधेन विनापिप्रत्ययंपूर्वोत्तरपदयोर्लोपोवक्तव्यः इतिभाष्यकारोक्तेर्महच्छब्दस्यलोपः वर्जितौरहितौनिष्फलौ
व्यर्थावित्यर्थः २५ महावेधेति महाबंधमहामुद्रायांस्थितोमहाबंधस्थितः एकाग्रैकाग्राधीर्यस्यसःएकधीः योगीयोगाभ्यासीपूरकंनासापुटा
भ्यांवायोर्ग्रहणंकृत्वाकंठेमुद्राकंठमुद्रातयाजालंधरमुद्रया वायूनांप्राणादीनांगतिंऊर्ध्वाधोगमनादिरूपांनिभृतंनिश्चलंयथाभवतितथाआ

हत्यनिरुध्यकुंभकंकृत्वेत्यर्थः २६

समहस्तेति भूमौ अविहस्तयोर्युग्मं हस्तयुग्मं समं हस्तयुगं यस्य सः समहस्तयुगः भूमिसंलग्नतलौ समौ हस्तौ यस्य तादृशः सन्नित्यर्थः स्फिचौ कटिप्रोथौ
यां स्फिचौ कटिप्रोथावित्यमरः भूमिसंलग्नतलयोर्हस्तयोरवलंबनेन योनिस्थानसंलग्नपार्ष्णिना वामपादेन सह भूमेः किंचिदुत्थापितौ शनैः मंदं संताड
येत्सम्यक्ताडयेत् स्माद्वपुटयोर्द्वयं इडापिंगलयोर्युग्ममतिक्रम्योल्लंघ्य मध्ये सुषुम्णामध्ये गच्छतीति मध्यगः वायुः स्फुरति २७ सोमश्च सूर्यश्चाग्निश्च
सोमसूर्याग्नयः सोमसूर्याग्निशब्दैः तदधिष्ठिता नाड्य इडापिंगलासुषुम्णाख्यास्तासां संबंधः न ह्यामुमेवं धाने तासां संबंधः अमृताय मोक्षाय जायते वै
इति निश्चयेऽव्ययं मृतस्येव प्राणवियुक्तस्यावस्था मृतावस्था समुत्पन्ना भवति इडापिंगलयोः प्राणसंचाराभावात् ततः तदनंतरं वायुं विरेचयेत् ना

समहस्तयुगो भूमौ स्फिचौ संताडयेच्छनैः पुटद्वयमतिक्रम्य वायुः स्फुरति मध्यगः २७ सोमसूर्याग्निसंबंधो जायते चामृता
यवै मृतावस्था समुत्पन्ना ततो वायुं विरेचयेत् २८ महावेधो महाभ्यासान्महासिद्धिप्रदायकः वलीपलितवेपघ्नः से
व्यते साधकोत्तमैः २९ एतत्त्रयं महागुह्यं जरामृत्युविनाशनं वन्हिवृद्धिकरं चैव ह्यणिमादिगुणप्रदं ३० ७

सिकापुटाभ्यां शनैस्त्यजेत् २८ महावेध इति अयं महावेधः अभ्यासात् पुनः पुनरावर्तनात् महासिद्धयोऽणिमाद्यास्तासां प्रदायकः प्रकर्षेण समर्पकः
वली जरया देहे चर्मसंकोचः पलितं जरया केशेषु शौक्ल्यं वेपः कंपनं तान् हंतीति वलीपलितवेपघ्नः अत एव साधकेषु उत्तमाः साधकोत्तमास्तैः सेव्यते अ
भ्यस्यत इत्यर्थः २९ महाबंधादीनां तिसृणामपि गोप्यत्वमाह एतदिति एतत्त्रयं महाबंधादित्रयं महागुह्यं अतिरहस्यं अत्र हेतुगर्भाणि विशेषणानि
हि यस्मात् जरा वार्द्धक्यं मृत्युश्चरमः प्राणदेहवियोगः तयोर्विशेषेण नाशनं वन्हेर्जठरस्य वृद्धिर्दीप्तिस्तस्याः कारणं करं अणिमा आदिर्येषां ते अणिमाद
यः ते च ते गुणाश्च तान् प्रकर्षेण ददातीति अणिमादिगुणप्रदं चकार आरोग्यविज्ञपादिसमुच्चयार्थः एवशब्दोऽवधारणार्थः ३० श्रीगणपतयेनमः

अथतत्त्रयस्य पृथक्साधनविशेषमाह अष्टधेति दिनेदिनेप्रतिदिनं यामेयामेप्रहरे प्रहरेपौनःपुन्येद्विर्वचनं अष्टभिःप्रकारैरष्टधाक्रियतेचशब्दोविशेषे ए
वशब्दोवधारणे एतत्त्रयमित्यव्यापिसंबध्यते कीदृशंपुण्यस्यसंभारःसमूहस्तस्यसंधायिविधायिपुनः कीदृशंपापानामोघःपूरःसमूहस्तिनियावत् तस्य
भिदुरंकलिमलविनाशनंसततम्भ्यसनंतदेवपापनाशनं सम्यक्सांप्रदाकीशिक्षागुरूपदेशोविद्यतेएषांतेनतथातेषांसर्वंदिनेदिनेयामेएषाईदृक्करी
त्याप्रथमंपूर्वंसाधनंस्वल्पंस्वल्पमेवकार्यं ३१ खेचरींविसुरादौतत्स्वरूपमाह कपालेति कपालमूर्द्धकुहरंसुषिरंतस्मिन्कपालकुहरेविपरीतंप्र
तीपंगच्छतीतिविपरीतगापरावृत्तासतीजिह्वारसनास्यात् भ्रुवोरंतर्गताभ्रुवोर्मध्येप्रविष्टादृष्टिर्दर्शनंस्यात् साखेचरीमुद्राभवति कपालकुह

अष्टधाक्रियतेचैवयामेयामेदिनेदिने पुण्यसंभारसंधायिपापौघभिदुरंसदा ३१ सम्यक्शिक्षावतामेवंस्वल्पंप्रथमसाधनं अथखेच
री कपालकुहरेजिह्वाप्रविष्टाविपरीतगा भ्रुवोरंतर्गतादृष्टिर्मुद्राभवतिखेचरी ३२ छेदनचालनदोहैःकलांक्रमेणवर्द्धयेत्तावत् सायाव
द्भ्रूमध्यंस्पृशतितदाखेचरीसिद्धिः ३३ स्नुहीपत्रनिभंशस्त्रंसुतीक्ष्णंस्निग्धनिर्मलं समादायततस्तेनरोममात्रंसमुच्छिनेत् ३४

रेजिह्वाप्रवेशपूर्वकंभ्रुवोरंतर्दर्शनंखेचरीतिलक्षणंसिद्धं ३२ खेचरीसिद्धेर्लक्षणमाह छेदनेति छेदनंअग्रपदमेववक्ष्यमाणंचालनंहस्तयोरंगुष्ठ
तर्जनीभ्यांरसनांगृहीत्वासव्यापसव्यतःपरिवर्त्तनं दोहः करयोरंगुष्ठतर्जनीभ्यांगोदोहनवद्दोहनं तैःकलांजिह्वांतावत्वर्द्धयेद्दीर्घांकुर्यात् तावत्
कीयद्यावत्साकलाभ्रूमध्यंबहिर्भ्रूमध्यंस्पृशतियदातदाखेचर्याःसिद्धिःखेचरीसिद्धिर्भवति ३३ तत्साधनमाह स्नुहीति स्नुहीरुडातस्याःपत्रंदलं
स्नुहिपत्रंपत्रेनसदृशंस्नुहिपत्रनिभंसुतीक्ष्णंअतितीक्ष्णं स्निग्धंचतन्निर्मलंसत्छेदनसाधनंसमादायसम्यगादायगृहीत्वा ततःशस्त्रग्रहणानंतरंते
नशस्त्रेणरोमप्रमाणंरोममात्रंसमुच्छिनेत्सम्यगुच्छिनेत् छिंद्यात् सेनामूलसिलामितिकमध्याहारःमिथेपाप्यथसिंदुरोवज्रस्त्रवकर्त्रीस्नुहीरुडा

[illegible]

ततइति ततश्छेदनानंतरं चूर्णिताभ्यां चूर्णीकृताभ्यां सैंधवं सिंधुदेशोद्भवं लवणं पथ्याहरीतकी ताभ्यां प्रघर्षयेत् कर्षेण घर्षयेत् छिन्नं शिरावद्धं
सप्तदिनपर्यंतं छेदनं सैंधवपथ्याभ्यां घर्षणं। चलायं प्रातर्विधेयं योगाभ्यासिना लवणनिषेधात् उदरापथ्यचूर्णं गृह्णीति मूले सैंधवोक्तिस्तु
हठाभ्यासात्पूर्वं खेचरीसाधनाभिप्रायेण सप्तानां दिनानां समाहारः सप्तदिनं तस्मिन् प्राप्ते गते सति अष्टमे दिन इत्यर्थः येन प्राप्ते पाशे गत्यर्थः
पुनः पूर्वच्छेदनोपेक्षयाधिकं रोममात्रं समुच्छिंदेत् २९ एवमिति एवं क्रमेण पूर्वरीत्या रोममात्रं छेदनं सप्तदिनपर्यंतं तावदेव मासं प्रातः छेदनं घर्षणं च अष्ट-
मे दिने अधिकं छेदनमित्युक्तक्रमेण षण्मासं षण्मासपर्यंतं नित्ययुक्तः सन् समाचरेत् छेदनघर्षणे इति कर्माध्याहारः षण्मासाद्दंततः रसना जिह्वा तस्या
मूलमधोभागः रसनामूलं तत्र या शिरा कपालकुहररसनासंयोगप्रतिबंधकीभूता नाडी सा यावद्बंधनं प्रणश्यति प्रकर्षेण नश्यति ३० छेदनादिना

ततः सैंधवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् २९ एवं क्रमेण षण्मासं नित्ययुक्तः समाचरेत् षण्मासाद्रस-
नामूलशिराबंधः प्रणश्यति ३० कलांपराङ्मुखीं कृत्वा त्रिपथे परियोजयेत् सा भवेत्खेचरीमुद्रा व्योमचक्रं तदुच्यते ३१ रसनामूर्ध्वगां कृत्वा क्षणा-
र्धमपि तिष्ठति विषैर्विमुच्यते योगी व्याधिमृत्युजरादिभिः ३२

जिह्वासौ यत्कर्तव्यं तदाह कलामिति कलां जिह्वां पराङ्मुखं अग्रं यस्याः सा तथा तां पराङ्मुखीं प्रत्यङ्मुखीं कृत्वा तिसृणां नाडीनां पंथाः त्रिपथस्तस्मिन्
त्रिपथे कपालकुहरे परियोजयेत् संयोजयेत् सा त्रिपथे रसनापरियोजनरूपा खेचरीमुद्रा तद्व्योमचक्रमित्युच्यते व्योमचक्रशब्देनोच्यते ३१ अथ खे-
चरीगुणाः रसनामिति ऊर्ध्वं तालुपरि विवरं गच्छतीत्यूर्ध्वगा तां तादृशीं रसनां जिह्वां कृत्वा क्षणार्धं क्षणस्य मुहूर्तस्यार्धं घटिकामात्रमपि खेचरीमुद्रा-
तिष्ठति चेत् तर्हि योगी विषैः सर्पहालाहलादिविषैर्विमुच्यते त्रिशोषे रोगाः मुच्यते व्याधिर्ज्वरादिर्मृत्युर्मरणं प्राणदेहवियोगः जरा वृद्धावस्था ता
आदयो येषां वल्यादीनां तैश्च विमुच्यते उक्तं च प्रकोशे क्षणः उत्सवे नियमे तथा क्षणशब्दो व्यवस्थायां समयेऽपि निगद्यत इति नानार्थः ३२

25

न रोग इति यः खेचरीं मुद्रां वेत्ति तस्य रोगो मरणं न तंद्रा तामसं चेतः करणहानिविशेषः न निद्रा न क्षुधा न चापि पिपासा न मूर्छा चित्तस्य तामसी मूढावस्था
विशेषश्च न भवेत् ४० पीड्यत इति यः खेचरीं मुद्रां वेत्ति स रोगेण ज्वरादिना न पीड्यते प्रमादाज्ज्ञातेनाशुभेन कर्मणा लोकसंग्रहार्थं कृतेन शुभेन च क
र्मणा न लिप्यते कालेन मृत्युना शः न बाध्यते न हन्यते ४१ चित्तमिति यस्माद्धेतोः चित्तं मनः करणं खे भ्रुवोरन्तः खकोशे चरति जिह्वा खे तथैव गगनान्
तश्चरति तेन हेतुना एषा कथिता मुद्रा नाम खेचरीति सिद्धैः कपिलादिभिर्निरूपिता खे भ्रुवोरन्तःस्थव्योम्नि चरति गच्छति चित्तं
जिह्वा च यस्यां सा खेचरीत्यवयवशक्त्या मत्स्यादिनाउक्ते गुणविशेषे श्लोकेषु न्याध्याहीनां पुनरुक्तिस्तेषां श्लोकानां संगृहीतत्वान्न दोषाय ४२ खेच

न रोगो मरणं तंद्रा न निद्रा न क्षुधा तृषा न च मूर्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीं ४० पीड्यते न स रोगेण लिप्यते न च कर्मणा बाध्यते न स
कालेन यो मुद्रां वेत्ति खेचरीं ४१ चित्तं चरति खे यस्माज्जिह्वा चरति खे गता तेनैषा खेचरी नाम मुद्रा सिद्धैर्निरूपिता ४२ खेचर्या
मुद्रितं येन विवरं लंबिकोर्ध्वतः न तस्य क्षरते बिंदुः कामिन्याः श्लेषितस्य च ४३ चलितोपि यदा बिंदुः संप्राप्तो योनिमंडलं व्रजत्यूर्ध्वं
हृतः शक्त्या निबद्धो योनिमुद्रया ४४ ऊर्ध्वजिह्वः स्थिरो भूत्वा सोमपानं करोति यः मासार्द्धेन न संदेहो मृत्युं जयति योगवित् ४५

र्येति येन योगिना खेचर्या मुद्रया लंबिकाया ऊर्ध्वं इति लंबिकोर्ध्वतः सार्वविभक्तिकस्तसिः लंबिकायाः तस्या ऊर्ध्वतः उपरिभागे स्थितं मुद्रितं पिहितं का
मिन्याः युवत्याः आश्लेषितस्य आलिंगितस्यापि च शरीरस्य तस्य बिंदुः वीर्यं न क्षरते न स्रवति ४३ चलित इति चलितोपि स्खलितोपि बिंदुः यदा यस्मिन्
काले योनिमंडलं योनिस्थानं संप्राप्तः संगतः तदेव योनिमुद्रया मेढ्राकुंचनरूपया स्तेन वज्रोलीमुद्राख्यचितापि बद्धः नितरां बद्धः शक्त्या आकर्ष
णशक्त्या हृतः आकृष्टः ऊर्ध्वं व्रजति सुषुम्नामार्गेण बिंदुस्थानं गच्छति ४४ ऊर्ध्वजिह्व इति ऊर्ध्वा लंबिकोर्ध्वविवरोन्मुखा जिह्वा यस्य सः ऊर्ध्वजिह्वः।

।स्थिरोनिश्चलोभूत्वा सोमस्यलंबिकोर्ध्वविवरगलितचंद्रामृतस्यपानंसोमपानंयः पुमान्करोतीतियोगंवेत्तीतियोगवित्सःमासस्यार्द्धेनमासार्द्धेनपक्षेणमृत्युंमरणंजयति अभिभवति नसंदेहः निश्चितमेतदित्यर्थः ४५ नित्यमिति यस्ययोगिनःशरीरंनित्यंप्रतिदिनंसोमकलापूर्णंचंद्रकलामृतपूर्णं तक्षकेणसर्पविशेषेणापिदष्टस्यदंशितस्ययोगिनःशरीरेविषंगरलंनव्याप्नुःस्वंनसर्पतिनप्रसरति ४६ यथावन्हिरग्निःइंधनानिकाष्ठादीनिनमुंचतिदीपकोदीपःतैलवर्त्तिंनमुंचति तथासोमकलापूर्णंचंद्रकलामृतापूर्णंदेहंशरीरंदेहीजीवोनमुंचतिनत्यजति ४७ गोमांसमिति गोमांसशब्दाभिधायिनंवक्ष्यमाणंयोभक्षयेत्नित्यंप्रतिदिनं अमरवारुणीमपिवक्ष्यमाणांपिबेत् तंयोगिनमहंमिनिग्रंथाकारोक्तिः कुलेजातःकुलीनःतंसत्कुलोत्पन्नंमन्ये तदुक्तंब्रह्मवैवर्त्ते कृतार्थौपितरौतेनधन्योदेशःकुलंचतत् जायतेयोगवान्यत्रदत्तमक्षयतांव्रजेत् इत्थंभाषितःस्पष्टःपुण्यकृत्सोविवेकवान् भवकोटिशतोपार्जंपुनातिद्विजसत्तमामिति ब्रह्मांडपुराणे गृहस्थानां

नित्यंसोमकलापूर्णंशरीरंयस्ययोगिनः तक्षकेनापिदष्टस्यविषंतस्यनसर्पति ४६ इंधनानियथावन्हिस्तैलवर्त्तिंचदीपकः तथासोमकलापूर्णं
देहीदेहंनमुंचति ४७ गोमांसंभक्षयेन्नित्यंपिवेदमरवारुणीं कुलीनंतमहंमन्येइतरेकुलघातकः ४८ गोशब्देनोदिताजिह्वातत्प्रवेशोहितालुनि गोमांस
भक्षणंतत्तुमहापातकनाशनं ४९

सहस्रेणवानप्रस्थशतेनच ब्रह्मचारीसहस्रेणयोगाभ्यासीविशिष्यते राजयोगेवामदेवंप्रतिशिववाक्यं राजयोगस्यमाहात्म्यंकोविजानातितत्त्वतः तज्ज्ञानीवसतेयत्रसदेशःपुण्यभाजनं दर्शनादर्चनादस्यत्रिसप्तकुलसंयुताः अज्ञामुक्तिपदंयांतिकिंपुनस्तत्परायणाः अंतर्योगंबहिर्योगंयोजानातिविशेषतः त्वयामयाप्यसोवंद्यःशेषैर्वंद्यस्तुकिंपुनः पितृकर्मणिएककालंद्विकालंवात्रिकालंनित्यमेववा येयुंजंतेमहायोगंविज्ञेयास्तेमहेश्वराः इतिइतरेवक्ष्यमाणगोमांसभक्षणामरवारुणीपानरहिताअयोगिनस्तेकुलघातकाःकुलनाशकाःसत्कुलेजातस्यतस्यजन्मनोवैयर्थ्यात् ४८ गोमांसशब्दार्थमाह गोशब्देति गोशब्देगोइत्याकारकेणशब्देनगोपदेनेत्यर्थः जिह्वारसनाउदिताकथिता तालुनीतिसामीपिकाधारेसप्तमी तालुसमीपोर्ध्वविवरेतस्याःजिह्वायाःप्रवेशः गोमांसभक्षणंगोमांसभक्षणशब्दवाच्यंतत्तुनाहत्यागोमांसभक्षणंतुमहापातकानांस्वर्णस्तेयादीनांनाशनं ४९ ॥ श्रीगणपतयेनमः

26

भमरवारुणीशब्दार्थमाह जिह्वेति जिह्वायाःप्रवेशःलंबिकोर्ध्वविवरेप्रवेशनंतस्मात्संभूतोजातोयोवह्निरूष्मातेनोत्पादितोनिष्पादितःअत्रचंद्रशब्देन
स्थानमुपलक्षते यःसारःभ्रुवोरंतर्वामभागस्थात्सोमात् स्रवतिगलतिसाअमरवारुणीस्यात्अमरवारुणीपदवाच्याभवेत् ५० चुंबंतीति यदिचेत्लंबि
कायंलंबिकोर्ध्वविवरंचुंबंतीस्पृशंतीअनिशंनिरंतरं आस्वरस्यसोमकलाजलस्यस्यंदःस्यंदनंप्रस्रवणंअस्यामस्तीतिरसस्यंदिनी यस्यजिह्वाक्षा
रालवणरसेनसहितासक्षाराकटुकंमरीचादिअम्लंचिंचाफलादिदुग्धंपयःतैःसदृशीसमाना मधुक्षौद्रंआज्यंघृतंताभ्यांतुल्यासमाना तथाशब्दःसमु
च्चयेएतैर्विशिष्टेरसस्यानेकरसवत्त्वान्मधुरत्वात्स्निग्धत्वाच्चजिह्वायाअपिरसस्यंदनेनतथात्वमुक्तं तर्हितस्यव्याधीनांरोगाणांहरणंअपगमःजरायाः
वृद्धावस्थायाःअंतकरणंनाशनं शस्त्राणांआयुधानांआगमःस्वाभिमुखागमनंतस्यउदीरणंनिवारणं अष्टौगुणाअणिमादयस्तेअस्यसंजाताइति

जिह्वाप्रवेशसंभूतवह्निनोत्पादितःखलु चंद्रात्स्रवतियःसारःसास्यादमरवारुणी ५० चुंबंतीयदिलंबिकाग्रमनिशंजिह्वारसस्यंदिनीसक्षारा
कटुकाम्लदुग्धसदृशीमध्वाज्यतुल्यातथा व्याधीनांहरणंजरांतकरणंशस्त्रागमोदीरणंतस्यस्यादमरत्वमष्टगुणितंसिद्धांगनाकर्षणं ५१ मू
र्द्धःषोडशपद्मपत्रगलितंप्राणादवाप्तंहठात्ऊर्ध्वास्योरसनांनियम्यविवरेशक्तिंपरांचिंतयेत् उत्कल्लोलकलाजलंचविमलंधारामयंयःपिबे
न्निर्व्याधिःसन्मृणालकोमलवपुर्योगीचिरंजीवति ५२

अष्टगुणितंअमरत्वंअमरभावःसिद्धानामंगनाःसिद्धांगनाःसिद्धाश्चताअंगनाश्चेतिवातासामाकर्षणंआकर्षणशक्तिःस्यात् ५१ मूर्द्धइति रसनांजि
ह्वांविवरेकपालकुहरेनियम्यसंयोज्य ऊर्ध्वमुखानसायस्यसःऊर्ध्वास्यःअनेनविपरीतकरणीसूचिता परांशक्तिंकुंडलिनींचिंतयन्ध्यायन्सन्प्रा
णात्साधनभूतात्षोडशपत्राणिदलानियस्यतत्षोडशपत्रंतच्चतत्पद्मंच कंठस्थानेवर्तमानंतच्चतत्पद्मंच कंठस्थानेवर्तमानंतस्मिन्गलितंहठात्हठ
योगादवाप्तंप्राप्तंविमलंनिर्मलंधारामयंरूपंउत्कल्लोलंउत्तरंगंचतत्कलाजलंचसोमकलारसंयःपुमान्पिबेत्धारयेत् सःयोगीनिर्गताव्याधयोज्वराद
योयस्मात्सनिर्व्याधिःसन्यद्वानिर्गताविविधास्त्रिविधाआधयोमानसीव्यथायस्मात्सःतादृशःसन् मृणालंबिसमिवकोमलंमृदुलंवपुःशरीरंयस्य
सः मृणालकोमलवपुश्चसन्चिरंदीर्घकालंजीवतिप्राणान्धारयति हठात्हठयोगात्प्राणात्साधनभूतादवाप्तमितिवायोजनाप्राणेरितिकचित्पाठः ५२

यत्प्रालेयइति मेरुवत्सर्वोन्नतात्सुषुम्णा मेरुः तस्य मूर्द्धा उपरिभागस्तस्य अंतरे मध्ये तिष्ठतीति मेरुमूर्द्धांतरस्थं यत् प्रालेयं सोमकलाजलं प्रहितं निहितं यस्मिन् तत्तथा तत्र तत्सुषिरं विवरं तस्मिन् विवरे सुधीः शोभना राजसतमोभ्यामनभिभूतसत्वा धीर्बुद्धिर्यस्य सः तत्वं आत्मतत्वं प्रवदति प्रकर्षेण वदति तस्याः शिखायामध्ये परमात्मा व्यवस्थित इति श्रुतेः आत्मनो विभुत्वेपि खेचरीमुद्रायां तत्राभिव्यक्तेस्तस्मिंस्तत्वमित्युक्तं निम्नगानां नदीनां सरस्वतीनर्मदादिशब्दवाच्यानामिडापिंगलासुषुम्णागांधारीप्रभृतीनां तत्तस्मिन् विवरे तत्समीपे मुखमग्रमस्ति चंद्रात्सोमाद्वपुषः शरीरस्य साराः सारभूतो रसः स्रवति क्षरति तेन चंद्रसारस्रवेण नराणां मनुष्याणां मृत्युर्मरणं भवति अतो हेतोः तत्पूर्वोदितं सुकरणं शोभनं करणं खेचरीमुद्राख्यं बध्नीयात् सुकरणे बद्धे चंद्रसारस्रवणाभावान्मृत्युर्न स्यादिति भावः अन्यथा सुकरणबंधनाभावे कायस्य देहस्य सिद्धिः रूपलावण्यबलवज्रसंहननत्वरूपा न स्यात् ५२ सुषिरमिति पंचधा निस्रोतांसि इडादीनां प्रवाहै-

यत्प्रालेयप्रहितसुषिरं मेरुमूर्द्धांतरस्थं तस्मिंस्तत्वं प्रवदति सुधीस्तन्मुखं निम्नगानां। चंद्रात्सारः स्रवति वपुषस्तेन मृत्युर्नराणां तद्बध्नीयात्सुकरणमथो नान्यथा कार्यसिद्धिः ५२ सुषिरं ज्ञानजनकं पंचस्रोतःसमन्वितं तिष्ठते खेचरी मुद्रा तस्मिन् शून्ये निरंजने ५३ एकं सृष्टिमयं बीजमेका मुद्रा च खेचरी एको देवो निरालंब एकावस्था मनोन्मनी ५४ अथोड्डियानबंधः बद्धो येन सुषुम्णायां प्राणस्तूड्डीयते यतः। तस्मादुड्डियनाख्योयं योगिभिः समुदाहृतः ५५

स्तैः समन्वितं सम्यक् अनुगतं सम्यक्स्रोतःसमन्वितमिति क्वचित्पाठः ज्ञानजनकं अलौकिकावधितात्मसाक्षात्कारजनकं यत्सुषिरं विवरं तस्मिन्सुषिरे अंजनमविद्या तत्कार्यं शोकमोहादिकं च निर्गतं यस्मात्तन्निरंजनं तस्मिन् निरंजने शून्ये सुषिरावकाशे खेचरीमुद्रा तिष्ठते स्थिरीभवति प्रकाशनस्थेयाख्ययोश्चेत्यात्मनेपदं ५३ एकमिति सृष्टिमयं सृष्टिरूपं प्रणवाख्यं बीजमेकं मुख्यं तदुक्तं मांडूक्योपनिषदि ओमित्येतदक्षरमिदं सर्वमिति खेचरीमुद्रा एका मुख्या निरालंबः आलंबनशून्यः एको मुख्यो देवः आलंबनपरित्यागेनात्मनः स्थानात् उन्मनी अवस्था एका मुख्या एकशब्दो मुख्यपरः केवलाद्यन्यपरः बीजादिषु प्रणवादिवन्मुद्रासु खेचरी मुख्येत्यर्थः ५४ उड्डियानबंधं विवक्षुस्तावदुड्डियनशब्दार्थमाह बद्ध इति यतः यस्माद्धेतोः येन बंधेन बद्धः निरुद्धः प्राणः सुषुम्णायां मध्यनाड्यां उड्डीयते सुषुम्णाविहायसा गच्छति तस्मात्कारणात् अयं बंधः योगिभिर्मत्स्येंद्रादिभिः उड्डियनं आख्या अभिधा यस्य स उड्डियनाख्यः समुदाहृतः सम्यक्सुष्ठुतया उदाहृतः कथितः सुषुम्णा

यामुड्डीयते तेन बद्धः प्राणा उड्डीयनं उन्नत्वा डिङ्विहायसा गता
दिव्यस्मात्करणेल्सृद् ५६

27

उड्डीनमिति महांश्चासौ खगश्च महाखगः प्राणः सर्वदा देहावकाशे गतिमत्वात् यस्माद्बंधात् अविश्रांतं यथा स्यात्तथा उड्डीनं विहंगमगतिं कुरुते सुषुम्नायामित्यध्याहार्यं तदेव बंधविशेष एव उड्डियानं उड्डियाननामकः स्यात् तत्र तस्मिन्विशेषे ये बंधः अभिधीयते बंधः स्वरूपं कथ्यते मयेति शेषः ५७ उड्डियानबंधमाह उदरेति उदरे तुंदे नाभेः ऊर्ध्वं चकारादधः उपरिभागे अधोभागे च पश्चिमं तानं पश्चिमताकर्षणं नाभेरूर्ध्वाधोभागौ यथा पृष्ठसंलग्नौ स्यातां तथा तानं तानं तानं तंतानमाकर्षणं कारयेत् कुर्यात् णिजर्थोऽविवक्षितः असौ नाभेरूर्ध्वाधोभागयोस्तानरूपः उड्डियानः उड्डियानाख्यो बंधः कीदृशः मृत्युरेव मातंगो गजः तस्य केशरी सिंहः सिंह इव निवर्त्तकः ५८ उड्डियानं त्विति गुरुर्हितोपदेष्टा तेन गुरुणा उड्डियानं तु सदा सर्वदा सहजं स्वाभाविकं कथितं प्राणस्य बहिर्गमने सर्वदा सर्वस्यैव जायमानत्वात् यस्तु यः पुमान् सततं निरंतरं अभ्यसेत् उड्डियानमित्यत्रापि संबध्यते स तु वृद्धोपि स्थविरोपि तरुणायते तरुण इवाचरति तरुणा-

उड्डीनं कुरुते यस्मादविश्रांतं महाखगः उड्डियानं तदेव स्यात्तत्र बंधोभिधीयते ५७ उदरे पश्चिमं तानं नाभेरूर्ध्वं च कारयेत् उड्डियानो ह्यसौ बंधो मृत्युमातंगकेशरी उड्डीयानं तु सहजं गुरुणा कथितं सदा अभ्यसेत्सततं यस्तु वृद्धोपि तरुणायते ५९ नाभेरूर्ध्वमधश्चापि तानं कुर्यात्प्रयत्नतः षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः ६० सर्वेषामेव बंधानामुत्तमो ह्युड्डियानकः उड्डियाने दृढे बंधे मुक्तिः स्वाभाविकी भवेत् ६१

यते ५९ नाभेरिति नाभेः ऊर्ध्वं उपरिभागे अधश्चापि अधोभागे प्रयत्नतः प्रकृष्टो यत्नः प्रयत्नः तस्मात्प्रयत्नतः यत्नविशेषात् तानं पश्चिमं तानं कुर्यात् पूर्वार्धेनोड्डियानस्वरूपमुक्तं अथ तत्प्रशंसा षः षण्मासपर्यंतं उड्डियानमित्यध्याहारः अभ्यसेत्स नरः पुरुषस्तु तिष्ठेत् स मृत्युं जयत्येव संशयो नात्र संदेहो नास्तीति ६० सर्वेषामिति सर्वेषां बंधानां षोडशाधारबंधानां मध्ये उड्डीयानकः एक उड्डियानकबंध एव स्वार्थे कः प्रत्ययः उत्तमः उत्कृष्टः हि यस्मात् उड्डियाने बंधे दृढे सति स्वाभाविकी स्वभावसिद्धैव मुक्तिर्भवेत् उड्डियानबंधे कृते विहंगमगत्या सुषुम्नायां प्राणस्य मूर्ध्नि गमनात् समाधौ मोक्षमाप्नोतीति वाक्यात्सहजैव मुक्तिः स्यादिति भावः ६१

ह॰प्र॰टी॰
२९

मूलवंधमाह पार्ष्णिभागेनेति पार्ष्ण्योर्भागःगुल्फयोरधःप्रदेशःतेनयोनिंयोनिस्थानंगुदमेढ्रयोर्मध्यभागंसंपीड्यसम्यक्पीडयित्वा गुडंपायुंआकुंचेत्संको-
चयेत् अपानंअधोगतिंवायुंऊर्ध्वंउपरिआकृष्यआकृष्टंकृत्वामूलवंधःअभिधीयतेकथ्यते पार्ष्णिभागेनयोनिस्थानसंपीडनपूर्वकंगुडस्याकुंचनंमूलवं-
धइत्युच्यतइत्यर्थः ६२ अधोगतिमिति यःअधोगतिंअधःअर्वाक्गतिर्यस्य सःतथा तं अपानंअपानवायुंआकुंचनेनमूलाधारस्यसंकोचनेनवलात्ऊर्ध्वग-
च्छतीत्यूर्ध्वगः तंऊर्ध्वगंसुषुम्णायामूर्ध्वगमनशीलंकुरुते वैइतिनिश्चयेऽव्ययंयोगिनोयोगाभ्यासिनः तंमूलवंधंमूलस्यमूलस्थानस्यवंधनंमूलवंधः
तंमूलवंधमित्यन्वर्थंप्राहुः अनेनमूलवंधशब्दार्थउक्तः पूर्वश्लोकेनतस्यप्रकारउक्तइतिपुनरुक्तं ६३ अथयोगविज्ञोक्तरीत्यामूलवंधमाह गुदमिति
पार्ष्णीगुल्फयोरधोभागेनगुडंपायुंसंपीड्यसम्यक्पीडयित्वासंयोजयेत्यर्थः तुशब्दःपूर्वस्मादत्रविशेषद्योतकः यथायेनप्रकारेणसमीरणोवायुःऊर्ध्वं

अथमूलवंधः पार्ष्णीभागेनसंपीड्ययोनिमाकुंचयेद्गुदं अपानमूर्ध्वमाकृष्यमूलवंधोभिधीयते ६२ अधोगतिमपानंवैऊर्ध्वगंकुरुतेवलात् आकुंच-
नेनतंप्राहुर्मूलवंधंहियोगिनः ६३ गुदंपार्ष्ण्यादिसंपीड्यवायुमाकुंचयेद्वलात् वारंवारंयथाचोर्ध्वंसमायातिसमीरणः ६४ प्राणापानौनादविंदू मूल-
वंधेनचैकतां गत्वायोगस्यसंसिद्धिंयच्छतोनात्रसंशयः ६५ अपानप्राणयोरैक्यंक्षयोमूत्रपुरीषयोः युवाभवतिवृद्धोपिसततंमूलवंधनात् ६६

सुषुम्णायाउपरिभागेयातिगच्छति तथातेनप्रकारेणवलात्हठात्वारंवारंपुनःपुनःवायुंअपानंआकुंचयेत्गुडस्याकुंचनेनाकर्षयेत् अयंमूलवंधइतिवाक्या-
ध्याहारः ६४ अथमूलवंधगुणानाह प्राणापानाविति प्राणश्चापानश्चप्राणापानौऊर्ध्वाधोगतिवायूनादोऽनाहतध्वनिःविंदुरनुस्वारःतौमूलवंधेनएकतां
गत्वाएकीभूययोगस्यसंसिद्धिःसम्यक्सिद्धिःतांयोगसिद्धिंयच्छतःदत्तःअभ्यासिनइतिशेषः अत्रअस्मिन्नर्थेसंशयोनसंदेहोनास्तीत्यर्थः अयंभावः मूलवंधे
कृतेअपानःप्राणेनसहैकीभूयसुषुम्णायांप्रविशतिततोनादाभिव्यक्तिर्भवति ततोनादेनसहप्राणापानौहृदयोपरिगत्वानादस्यविंदुनासहैक्यंविधा-
यमूर्ध्निगच्छतःततोयोगसिद्धिः ६५ अपानप्राणयोरिति सततंसततंमूलवंधनात्मूलवंधस्यकरणात् अपानप्राणयोःऐक्यंभवति मूत्रपुरीषयो-
संरितयोःक्षयःपतनंभवति वृद्धोपिस्थविरोपियुवातरुणोभवति ६६

28

रामः
२९

अपानइति मूलवंधनात् अपानेअधोगमनशीलेवायोऊर्ध्वगेऊर्ध्वंगछतीत्यूर्द्ध्वगस्तस्मिन्याते इति वह्निमंडलंवन्हेर्मंडलंत्रिकोणंनाभेरधोभागेस्ति तदुक्तं
याज्ञवल्क्येन देहमध्येशिखिस्थानंतप्तजांबूनदप्रभं ।त्रिकोणंतुमनुष्याणांचतुरश्रंचतुष्पदां मंडलंतुपतंगानांसत्यमेतद्ब्रवीमिते तन्मध्येतुशिखातन्वीस
दातिपावकेइति तदातस्मिन्कालेवायुनाअपानेनआहतासंगतासतीअनलशिखाजठराग्निशिखादीर्घाआयताजायतेवर्द्धतइतिक्वचित्पाठः ६७ ततइति
ततःतदनंतरंवन्हिश्चअपानश्चवन्ह्यपानौउष्णंस्वरूपंयस्यसःतथातंअनलंशिखादैर्घ्यादुष्णस्वरूपंप्राणंऊर्ध्वगतिमनिलंयातःगछतः ततोऽनलशिखादै
र्घ्याउष्णस्वरूपकमितिवायोर्जनितेनप्राणसंगमनेन देहजातोदेहजःज्वलनोग्निःअत्यंतंअधिकंप्रदीप्तोभवति तथेतिपादपूरणे अपानस्योर्द्ध्वगमनेन
दीप्तस्वानलःप्राणसंगमात्यंतदीप्तोभवतीत्यर्थः ६८ तेनेति तेनज्वलनस्यात्यंतप्रदीपनेनसंतप्तासम्यक्तप्तासतीसुप्तानिद्रिताकुंडलिनीशक्तिःस

अपानेऊर्ध्वगेजातेप्रयातेवह्निमंडले तदानलशिखादीर्घाजायतेवायुनाहता ६७ ततोयातोवह्न्यपानौप्राणमुष्णस्वरूपकं तेनात्यंतप्रदीप्तस्तु
ज्वलनोदेहजस्तथा ६८ तेनकुंडलिनीसुप्तासंतप्तासंप्रबुध्यते दंडाहताभुजंगीवनिःश्वस्यऋजुतांव्रजेत् ६९ विलंप्रविष्टेवततोब्रह्मनाड्यंतरंव्रजे
त् तस्मान्नित्यंमूलवंधःकर्त्तव्योयोगिभिःसदा ७० अथजालंधरवंधः कंठमाकुंच्यहृदयेस्थापयेच्चिवुकंदृढं वंधोजालंधराख्योयंजरामृत्युविनाशकः ७१

प्रबुध्यतेसम्यक्प्रबुद्धाभवति दंडेनाहतादंडाहताचासौभुजंगीचसर्पिणीवनिःश्वस्यनिःश्वासंकृत्वाऋजुतांसरलतांव्रजेत्गछेत् ६९ विलंप्रविष्टेति
ततऋजुताप्राप्त्यनंतरंविलंविवरंप्रविष्टाभुजंगीवब्रह्मनाडीसुषुम्णातस्याःअंतरंमध्यंव्रजेत्गछेत् तस्माद्धेतोर्योगिभिःयोगाभिःमूलवंधःनित्यंप्रतिदि
नंसर्वास्मिन्कालेकर्त्तव्यःकर्तुंयोग्यः ७० जालंधरवंधमाह कंठमिति कंठगलविलंआकुंचसंकोच्यहृदयेवक्षःसमीपेचतुरंगुलांतरितप्रदेशेचि
वुकंहनुंदृढंस्थिरंस्थापयेत् अयंकंठाकुंचनपूर्वकंचतुरंगुलांतरितहृदयसमीपेऽधोनमनयत्नपूर्वकंचिवुकस्थानरूपः जालंधरइत्याख्यायतइ
तिजालंधराख्याःजालंधरनामावंधः कीदृशःजराहृद्धावस्थामृत्युर्मरणंतयोःविनाशकः विशेषेणनाशयतीतिविनाशकः विनाशकर्त्ता ७१

ह॰प्र॰टी
३०

जालंधरपदार्थमाह बध्नातीति हि यस्मात् शिराणांनाडीनांजालंसमुदायंबध्नाति अधोगंतुंशीलमस्येत्यधोगामिनभसः कपालकुहरस्य जलममृतंतंचब
ध्नाति प्रतिबध्नाति ततः तस्माज्जलंधरः जालंधरनामकोऽन्वर्थोबंधः जालंतुशिराजालंजलानांसमूहो जालंचरतीतिजालंधरः कीदृशः कंठेगलप्रदेशेयादुः
खौघः विकारजातदुःखसमूहः तस्यनाशनोनाशकर्ता ७२ जालंधरगुणानाह जालंधरइति कंठस्यगलस्यसंकोचनंसंकोचः आकुंचनंतदेवलक्षणं
स्वरूपंयस्यसः कंठसंकोचलक्षणः तस्मिन्तादृशेजालंधरेजालंधरसंज्ञकेबंधेकृतेसतिपीयूषं अमृतं अग्नौजाठरेऽनलेनपततिनक्षरति वायुश्चप्राण
श्चनप्रकुप्यति नाड्यंतरेवायोर्गमनंप्रकोपः तंनकरोतीत्यर्थः ७३ कंठसंकोचनेनेति दृढंगाढंकंठसंकोचनेनैवकंठसंकोचनमात्रेणद्वेनाड्यौइडापिंगले
स्तंभयेत् अयंजालंधरइतिकर्तृपदाध्याहारः इदंकंठस्थानस्थितंविशुद्धाख्यंचक्रंमध्यचक्रंमध्यचक्रंज्ञेयं कीदृशंषोडशाधारबंधनंषोडशसंख्याका

बध्नातिहिसिराजालमधोगामिनभोजलं ततोजालंधरोबंधःकंठदुःखौघनाशनः ७२ जालंधरेकृतेबंधेकंठसंकाचलक्षणे नपीयू
षंपतत्यग्नौनचवायुःप्रकुप्यति ७४ कंठसंकोचनेनैवद्वेनाड्यौस्तंभयेद्दृढं मध्यचक्रमिदंज्ञेयंषोडशाधारबंधनं ७४ मूलस्थानंस
माकुंच्यउड्डियानंतुकारयेत् इडांचपिंगलांबद्ध्वावाहयेत्पश्चिमेपथि ७५ अनेनैवविधानेनप्रयातिपवनोलयं ततोनजायतेमृत्यु

जरारोगादिकंतथा ७५

येआधाराअंगुष्ठाधारादिब्रह्मरंध्रांतास्तेषांबंधनंबंधनकारकं अंगुष्ठगुल्फजानूरुसीवनीलिंगनाभयः हृद्ग्रीवाकंठदेशश्चलंबिकानासिकातथा भ्रूम
ध्यंचललाटंचमूर्द्धाचब्रह्मरंध्रकं एतेहिषोडशाधाराःकथितायोगिपुंगवैः तेष्वाधारेषुधारणायाःफलविशेषोगोरक्षसिद्धांतादवगंतव्यः ७४ उक्त
स्यबंधत्रयस्योपयोगमाह मूलस्थानमिति मूलस्थानंआधारस्थानंसमाकुंच्यसम्यगाकुंच्यउड्डियानंनाभेःपश्चिमतानरूपंबंधंकारयेत्कुर्यात्णि
जर्थोऽविवक्षितः इडापिंगलांगंगायमुनेचबद्ध्वाजालंधरबंधेनेत्यर्थः कंठसंकोचनेनैवद्वेनाड्यौस्तंभयेदित्युक्तेः पश्चिमेपथिसुषुम्णामार्गेवाहयेत्गमन
येत्प्राणमितिशेषः ७५ अनेनेतिअनेनैवउक्तेनैवविधानेनविधिनापवनःप्राणःलयंस्थैर्यंप्रयाति गत्यभावपूर्वकंब्रह्मरंध्रेस्थितिःप्राणस्यलयःततःप्राणस्य
लयान्मृत्युःजरारोगादिकंतथाचार्थेनजायतेनोभवतिआदिपदेनवलितपलितादिकंग्राह्यं ७६

राम:
३०

29

वंधत्रयमिति इदं पूर्वोक्तं वंधत्रयं श्रेष्ठं मोड्याणधारवंधेष्विति प्रशस्तं महासिद्धैर्मत्स्येंद्रादिभिः चकारात् वसिष्ठादिमुनिभिः सेवितं सर्वेषां हठतंत्राणां हठो
पायानां साधनं सिद्धिजनकं योगिनो गोरक्षादयः विदुः जानंति ७७ विपरीतकरणीं विवक्षुस्तदुपोद्घातत्वेन पिंडस्य जराकरणमाह यत्किंचिदिति
दिव्यं उत्कृष्टं सुधामयं रूपं यस्य तदा तस्माद्दिव्यरूपीणश्चंद्रात्सोमात्तालुमूलस्थात् यत्किंचित् यत्किमपि अमृतं पीयूषं श्रवते पतति तत्सर्वं सर्वं तत्पी
युषं सूर्यो नाभिस्थोऽनलात्मकः ग्रसते ग्रसीकरोति तदुक्तं गोरक्षनाथेन नाभिदेशे स्थितो नित्यं भास्करो दहनात्मकः अमृतात्मा स्थितो नित्यं तालुमूले च चंद्र
मा वर्षत्यधोमुखश्चंद्रो ग्रसत्यूर्ध्वमुखो रविः करणं तत्र कर्तव्यं येन पीयूषमाप्यते इति तेन सूर्यकर्तृकामृतग्रसनेन पिंडो देहः जरायुतः जरसा युक्तो भ
वति ७८ तत्रेति तत्र तद्विषये सूर्यस्य नाभिस्थानलस्य मुखवंचनं वंच्यतेनेनेति तादृशं दिव्यमुत्तमं करणं वक्षमाणमुद्राख्यमस्ति तत् गुरूपदेशतः गुरोरुपदेशात्

वंधत्रयमिदं श्रेष्ठं महासिद्धैश्च सेवितं सर्वेषां हठतंत्राणां साधनं योगिनो विदुः ७७ यत्किंचित् श्रवते चंद्रादमृतं दिव्यरूपिणः तत्सर्वं ग्र
सते सूर्यस्तेन पिंडो जरायुतः ७८ तत्रास्ति करणं दिव्यं सूर्यस्य मुखवंचनं गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः ७९ ऊर्ध्वनाभेरधस्ता
लोरूर्ध्वं भानुरधः शशी करणी विपरीताख्या गुरुवाक्येन लभ्यते ८० नित्यमभ्यासयुक्तस्य जठराग्निविवर्द्धिनी आहारो वहुलस्तस्य संपा

ज्ञेयं ज्ञातुं शक्यं शास्त्रार्थानां कोटिभिर्न तु नैव ज्ञातुं शक्यं ७९ विपरीतकरणीमाह ऊर्ध्वनाभेरिति ऊर्ध्वमुपरिभागे नाभिर्यस्य स ऊर्ध्वनाभिः तस्य ऊर्ध्व
नाभेः अधः अधोभागे तालु तालुस्थानं यस्य सः अधस्तालोः योगिनः ऊर्ध्वं उपरिभागे भानुः दहनात्मकः सूर्यो भवति अधः अधोभागे शशी अमृतात्मा चंद्रो भ
वति प्रथमांतपाठे तु यदा तु ऊर्ध्वनाभिः अधस्तालुर्योगी भवति तदा ऊर्ध्वं भानुः अधः शशी भवतीति यदा तदा पदध्याहारेणान्वयः इयं विपरीताख्या विपरी
तनामिका करणी ऊर्ध्वाधःस्थितयोश्चंद्रसूर्ययोरधऊर्ध्वकरणान्नान्वर्था गुरुवाक्येन गुरोर्वाक्येनैव लभ्यते प्राप्यते नान्यथा ८० नित्यमिति नित्यं प्र
तिदिनं अभ्यासे अभ्यसनं तस्मिन् युक्तस्य अवहितस्य यः जठराग्निः उदराग्निस्तस्य विवर्द्धिनी विशेषेण वर्द्धिनीति विपरीतवर्द्धिनीति विपरीतकरणीविशे
षणं तस्य साधकस्य विपरीतकरण्यभ्यासिनः आहारः भोजनं वहुलो यथेच्छः संपाद्यः संपादनीयः चपादपूरणे ८१ छ

घसाधकस्य च ८

Nepal Sanskrit University, Balmiki Campus, Kathmandu

अल्पाहारश्चेति यदि अल्पाहारः अल्पो भोक्तुमिष्टाहरः आहारो भोजनं यस्य तादृशो भवेत्तदा अग्निर्जठरानलो देहं क्षणात् क्षणमात्राद्दहेत् शीघ्रं दहेदीत्यर्थः ऊर्ध्वाधःस्थितयोश्चंद्रसूर्ययोरधऊर्ध्वकरणक्रियामाह अधःशिरा इति अधः अधोभागे भूमौ शिरो यस्य सः अधःशिराः कराभ्यां कटिप्रदेशमवलंब्य बाहुमूलादारभ्य कूर्परपर्यंताभ्यां बाहुभ्यां स्कंधाभ्यां गलपृष्ठनाभिशिरः पृष्ठभागाभ्यां च भूमिमवष्टभ्य अधःशिरा भवेत् ऊर्ध्वं उपरि अंतरिक्षे पादौ यस्य स ऊर्ध्वपादः प्रथमे दिने आरंभदिने क्षणं क्षणमात्रं स्यात् ८० दिने दिने प्रतिदिनं क्षणात् किंचिदधिकं द्विक्षणं त्रिक्षणं एवं दिनक्रमेणाभ्यासेन अभ्यासं कुर्यात् विपरीतकरणीगुणमाह वलितमिति वलितं चर्मशैथिल्यं पलितं केशेषु शौक्ल्यं च षण्मासानां समाहारः षण्मासं तस्मादूर्ध्वं ऊर्ध्वं उपरि नैव दृश्यते नैवावलोक्यते साधकस्य देह इति वाक्याध्याहारः यस्तु साधकः याममात्रं प्रहरमात्रं नित्यं अभ्यसेत् स तु कालजित् कालं मृत्युं जयती

अल्पाहारो यदि भवेदग्निर्दहति तत्क्षणात् अधःशिराश्चोर्ध्वपादः क्षणं स्यात्प्रथमे दिने ८० क्षणाच्च किं
चिदधिकमभ्यसेच्च दिने दिने वलितं पलितं चैव षण्मासोर्ध्वं न दृश्यते याममात्रं तु यो नित्यमभ्यसेत्स तु काल
जित् ८१ अथ वज्रोली स्वेच्छया वर्तमानोपि योगोक्तैर्नियमैर्विना वज्रोलीं यो विजानाति स योगी सिद्धिभाजनं ८२

ति कालजित् कालजेता भवेत् एतेन योगस्य प्रारब्धकर्मप्रतिबंधकत्वमपि सूचितं तदुक्तं विष्णुधर्मे स्वदेहारंभकस्यापि कर्मणः संक्षयावहः यो योग पृथ्विपाल शृणु तस्यापि लक्षणमिति विद्यारण्यैरपि जीवन्मुक्तावुक्तं यथा प्रारब्धं कर्म तत्वज्ञानात् प्रबलं तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलः अत एव योगिनां उद्दालकवीतहव्यादीनां स्वेच्छया देहत्यागः उपपद्यत इति भागवते शुकदेवस्यात्मसमाधिना इति ८१ वज्रोल्यां प्रवृत्तिं जनयितुमादौ तत्फलमाह स्वेच्छयेति योगाभ्यासी वज्रोलीमुद्रां विजानाति विशेषेण स्वानुभवेन जानाति सः योगी योगे योगशास्त्रे उक्ताः योगोक्ताः तैर्योगोक्तैर्नियमैर्ब्रह्मचर्यादिभिः विनाकृते स्वेच्छया वर्तमानोपि व्यवहरन्नपि सिद्धिभाजनं सिद्धीनां अणिमादीनां भाजनं पात्रं भवति ८२

तस्याधनोपयोगवस्तुद्वयमाह तत्रेति तत्रवज्रोल्यभ्यासेवस्तुनोर्द्वयंपदार्थयुग्मंवक्ष्येकथयिष्येकीदृशंवस्तुद्वयंयस्यकस्यचित्यस्यकस्यापिधन
हीनस्य दुर्लभंदुःखेनलब्धुंशक्यंलब्धुमशक्यंदुर्लभमितिवा दुःखस्यार्थेदुष्प्राप्यत्वंनिषेधयोदिति कोशात् किंतद्वस्तुद्वयमित्यपेक्षायामाह क्षीरमिति एकंच
क्षीरंदुग्धंपानार्थं मेहनानंतरमिंद्रियनैर्बल्यात्तद्बलार्थंक्षीरपानयुक्तं केचित्तुअभ्यासकालेआकर्षणार्थमित्याहुः तदयुक्तं तस्यांनलगतस्यघनि
भागेननिर्गमनासंभवात् द्वितीयंवस्तुवशवर्त्तिनीस्वाधीननारीवनिता ८५ वज्रोलीमुद्राप्रकारमाह मेहनेनेति मेहनेनस्त्रीसंगानंतरंबिंदोःक्षरणरंगे
नसाधनभूतेनःपुरुषगुमार अथवानारीअपियोषिदपिशनैःमंदंसम्यक्यत्नपूर्वकंऊर्ध्वाकुंचनंऊर्ध्वउपरिआकुंचनं मेढ्राकुंचनेनबिंदोरूपर्या
कर्षणंअभ्यसेत् वज्रोलीमुद्रासिद्धिंगच्छेत् ८६ अथवज्रोल्याःपूर्वांगप्रक्रियामाह यत्नतइति शस्तःप्रशस्तोयोनालःतेनशस्तनालेनशिसकादिनि
र्मितेननालेनशनैःशनैःमंदंमंदंयथास्यात्तथापन्नार्थफूत्कारःक्रियतेनासौफूत्कारंवज्रकंदरेमेढ्रविवरेवायोःसंचारःसम्यक्वज्रकंदरेचरंगगमनंतत्कार

तत्रवस्तुद्वयंवक्ष्येदुर्लभंयस्यकस्यचित् क्षीरंचैकंद्वितीयंतुनारीचवशवर्त्तिनी ८५ पूर्वांगः मेहनेनशनैःसम्यगूर्ध्वाकुंचनम
भ्यसेत् पुरुषोप्यथवानारीवज्रोलीसिद्धिमाप्नुयात् ८६ यत्नतःशस्तनालेनफूत्कारंवज्रकंदरे शनैःशनैःप्रकुर्वीतवायुसंचारका
रणात्

णात् तद्वितोःप्रकुर्वीतप्रकर्षेणपुनःपुनःकुर्वीत अथवज्रोलीशाधनप्रक्रिया सीसकनिर्मितांस्निग्धांमेढ्रप्रवेशयोग्यांचतुर्दशांगुलमात्रांशला
कांकारयित्वातस्यामेढ्रेप्रवेशनमभ्यसेत् प्रथमेदिनेएकांगुलमात्रांप्रवेशयेत् द्वितीयदिनेद्व्यंगुलमात्रांतृतीयदिनेत्र्यंगुलमात्रं एवंक्रमेणाष्ट
आद्वादशांगुलमात्राप्रवेशेमेढ्रःमार्गशुद्धोभवति पुनःतादृशींचतुर्दशांगुलमात्रांद्व्यंगुलमात्रेवक्रांमूर्ध्वमुखांकारयित्वातांद्वादशांगुलमात्रां
प्रवेशयेत् वक्रमूर्ध्वमुखंद्व्यंगुलमात्रंवहिःस्थापयेत् ततःसुवर्णकारस्याग्निधमनसाधनीभूतनालसदृशंनालंगृहीत्वातदग्रंमेढ्रप्रविष्टितद्वाद
शांगुलस्यनालस्यवक्रोर्ध्वमुखद्व्यंगुलमध्येप्रवेश्यफूत्कारंकुर्वीत तेनसम्यक्मार्गशुद्धिर्भवति ततःकोष्णस्यजलस्यमेढ्रेणाकर्षणमभ्य
सेत् जलाकर्षणेसिद्धे पूर्वोक्तश्लोकरीत्याबिंदोरूर्ध्वाकर्षणमभ्यसेत् बिंद्वाकर्षणेसिद्धेवज्रोलीमुद्रासिद्धिः इयंजितप्राणस्यैवसिध्यतिनान्य

धारेविचरीभुजप्राणनयोभयसिद्धेतुमम्यभवति

एवंवज्रोल्यभ्यासेसिद्धेतदुपकारंसाधनमाह नारीभगेइति नारीभगेस्त्रीयोनौपततीतिपतत् पतंश्चासौबिंदुश्चपतद्बिंदुः तंपतद्बिंदुंरतिकालेपतंतंबिंदुं अभ्या
सेनवज्रोलीमुद्राभ्यासेनऊर्ध्वंउपरिआहरेत्आकर्षयेत् पतनात्पूर्वमेवयदिपतनात्पूर्वंबिंदोराकर्षणंनस्यात्तर्हिपतितमाकर्षयेदित्याह चलितंचेतिचलि
तंनारीभगेपतितंनिजंस्वकीयंबिंदुंचकाराद्रजः ऊर्ध्वंउपरिआकृष्यआहृत्यरक्षयेत्स्थापयेत् ८८ वज्रोलीफलमाह एवमुक्तरीत्याबिंदुंयःसंरक्षयेत्सम्य
ग्रक्षयेत् सयोगवित्योगाभिज्ञःमृत्युंजयतिअभिभवति यतःबिंदोःशुक्रस्यपातेनपतनेनमरणंभवति बिंदोर्धारणंबिंदुधारणंतस्मात्बिंदुधारणंभवना
त्जीवनंभवति तस्माद्बिंदुंसंरक्षयेदित्यर्थः ८९ सुगंधइति योगिनोवज्रोल्यभ्यासिनोदेहेबिंदोःशुक्रस्यधारणंबिंदुधारणंतस्मात्सुगंधःशोभनोगंधःजाय
तेप्रादुर्भवतिदेहेयावत्बिंदुःस्थिरःतावत्कालभयंमृत्युभयंकुतः नकुतोपीत्यर्थः ९० चित्तायत्तमिति हियस्मात्नृणांशुक्रंवीर्यंचित्तायत्तंचित्तेचलेसतिचलत्वा

नारीभगेपतद्बिंदुमभ्यासेनोर्ध्वमाहरेत् चलितंचनिजंबिंदुमूर्ध्वमाकृष्यरक्षयेत् ८८ एवंसंरक्षयेद्बिंदुंमृत्युंजयतियोगवित् मरणंबिं
दुपातेनजीवनंबिंदुधारणात् सुगंधोयोगिनोदेहेजायतेबिंदुधारणात् यावद्बिंदुःस्थिरोदेहेतावत्कालभयंकुतः ९१ चित्तायत्तंनृणांशुक्रं
शुक्रायत्तंचजीवितं तस्माच्छुक्रंमनश्चैवरक्षणीयंप्रयत्नतः ९२ ऋतुमत्यारजोप्येवंनिजंबिंदुंचरक्षयेत् ऋतुमत्यारजोप्येवंनिजंबिंदुंचरक्षये
त् मेढ्रेणाकर्षयेदूर्ध्वंसम्यगभ्यासयोगवित् ९३ अथसहजोली सहजोलिश्चामरोलिर्वज्रोल्याभेदएकतः जलेसुभस्मनिक्षिप्यदग्धगोमय

च्चित्तेस्थिरेस्थिरत्वाच्चित्ताधीनंजीवितंजीवनं शुक्रायत्तंतच्छुक्रेस्थिरेजीवनात् शुक्रेणक्षेमरणाच्छुक्राधीनंतस्माच्छुक्रंबिंदुंमनश्चमानसंचप्रकर्षेणयत्नादिति
प्रयत्नतः रक्षणीयमेव अवश्यंरक्षणीयमित्यर्थः एवंशब्दोभिन्नक्रमः ९२ ऋतुमत्याइति एवंपूर्वोक्तेनाभ्यासेनऋतुर्विद्यतेयस्याःसाऋतुमतीतस्या
ऋतुमत्याःऋतुस्नातायाःस्त्रियोरजःनिजंस्वकीयंबिंदुंचरक्षयेत् पूर्वोक्ताभ्यासंदर्शयतिमेढ्रेणेति अभ्यासोवज्रोल्यभ्यासःसएवयोगोयोगसाधनत्वा
त्तंवेत्तीत्यभ्यासयोगवित्मेढ्रेणशिश्नेनसम्यक्प्रयत्नपूर्वकंऊर्ध्वंउपरिआकर्षयेत् रजोबिंदुंचेतिकर्माध्याहारः अर्थःश्लोकस्थितः ९३ सहजोल्य
मरोल्योर्विवक्षुस्तयोर्वज्रोलीतोविशेषत्वमाह सहजोलिश्चेतिवज्रोल्याभेदोविशेषःसहजोलिःअमरोलिश्चनभवेत्एकतःएकत्वात् एकफलत्वादित्यर्थः
एकशब्दश्चावप्राधान्यंतस्मात्सहजोलिं सहजोलीमाह जलेस्थितिःगोपुरीषाणिगोमयानिदग्धानिचतानिगोमयानितेषुभस्मभवदुत्पत्तिःयस्यतद्दग्धगोमयसंभवं
शोभनंभस्मसुभस्मविभूतिःतत्जलेतोयेनिक्षिप्यतोयमिश्रंकृत्वा
पुनःश्लोकेनान्वेति ९४

वज्रोलीति वज्रोलीप्रकार्यमैथुनं तस्मात् ऊर्द्ध्वं अनंतरं सुखेनैव आनंदेनैव आसीनयोः उपविष्टयोः क्षणात् उत्सवात् मुक्तस्त्यक्तो व्यापारो रतिक्रिया याभ्यां तौ मुक्तव्यापा
रौ तयोः मुक्तव्यापारयोः स्त्री च पुमांश्च स्त्रीपुंसौ तयोः स्त्रीपुंसोः स्वांगलेपनं शोभनान्यंगानि स्वांगानि मूर्द्धललाटनेत्रहृदयस्कंधभुजादीनि तेषु लेपनं ९७ सहजोलि
रिति इयं उक्ता क्रिया सहजोलिरिति प्रोक्ता कथिता योगिभिः कीदृशी सदा श्रद्धेया सदा श्रद्धातुं योग्या अयं सहजोल्याख्यो योग उपायः शुभकरः शुभश्रेयः करो
तीति शुभकरो योगः संहननोपायध्यानसंगतियुक्तिचिन्ताभिधानात् कीदृशो योगः भोगेन स्त्रीसंगेन युक्तोपि मुक्तिदो मोक्षदः ९८ अयं योग इति अयमुक्तो यो
गः पुण्यं विद्यते येषां ते पुण्यवंतः सुकृतिनः तेषां पुण्यवतां धीराणां धैर्यवतां तत्वं वास्तविकं पश्यंतीति तत्वदर्शिनः तेषां तत्वदर्शिनां मत्सरान्निक्रांता निर्मत्सराणा
अन्यगुणद्वेषरहितानां मत्सरोन्यगुणद्वेष इत्यमरः तादृशानां पुंसां सिद्ध्येत् सिद्धिं गच्छेत् मत्सरशालिनां मत्सरवतां न सिद्ध्येत् ९९ अमरोलीमाह पित्तोल्वणत्वा

वज्रोलीमैथुनादूर्ध्वं स्त्रीपुंसोः स्वांगलेपनं आसीनयोः सुखेनैव मुक्तव्यापारयोः क्षणात् ९७ सहजोलिरियं प्रोक्ता श्रद्धेया योगिभिः
सदा अयं शुभकरो योगो भोगयुक्तोपि मुक्तिदः ९८ अयं योगः पुण्यवतां धीराणां तत्वदर्शिनां निर्मत्सराणां सिद्ध्येत न तु मत्सरशा
लिनां ९९ अथामरोली पित्तोल्वणत्वात्प्रथमांबुधारां विहाय निःसारतयांत्यधारां निःसेव्यते शीतलमध्यधारा कापालिके खं

त्वादिति पित्तेनोल्वणा उत्कटा पित्तोल्वणा तस्या भाव। पित्तोल्वणत्वं तस्याः भावः पित्तोल्वणत्वं तस्मात् तथा प्रथमामाद्यामंबुनः शिवांबुनिर्गमसमये किंचित्स्रु
तां धारां त्यक्त्वा निर्गतः सारो यस्याः सा निःसारा तस्या भावो निःसारता तया निःसारतया अंत्यत्वेन अंत्यधारां अंत्यामवरमां या धारा तां विहाय किंचिद्दत्वा धारां त्यक्त्वा
शीतला पित्तादिदोषसाररहिता या मध्यधारा मध्यमा धारा सा निषेव्यते गिरां सेव्यते खंडः खंड योगो विशेषः मनोभिमतो यस्य सः खंडमतः तस्मिन् खंडमते का
पालिकः स्यात् अयं कापालिकस्तस्मिन् कापालिके संप्रदाये खंडकापालिकसंप्रदाये इत्यर्थः अमरोलीप्रसिद्ध्यतीति शेषः ९८ अमरीमिति अमरी शिवांबु यः पु
मान् नित्यं पिबेत् नस्यं कुर्वन् श्वासेनामर्षघ्राणेनोतर्गृह्णन् कुर्वन् रमन् दिने दिने प्रतिदिनं वज्रोलीमेहनेन शनैरिति श्लोकेनोक्तं सम्यक् अभ्यसेत् सा अमरोली
इति कथ्यते कापालिकैरिति शेषः अमरीपानामरीनस्यपूर्विका वज्रोली अमरोलीशब्देन कथ्यत इत्यर्थः ९९

हठप्रदी ६५

Nepal Sanskrit University, Balmiki Campus, Kathmandu

ह.प्र.टी
३२

अभ्यासादिति अभ्यासात् अमरोल्यभ्यासात् निःसृतां निर्गतां चांद्रीं चंद्रस्येयं चांद्री तां चांद्रीसुधां विभूत्या भस्मना सह साकं मिश्रयेत् संयोजयेत् उत्तमांगेषु शिरःकपा
लनेत्रस्कंधकंठहृदयभुजादिषु धारयेत् भस्ममिश्रितां चांद्रीमिति शेषः दिव्या अतीतानागतवर्त्तमानव्यवहितविप्रकृष्टपदार्थदर्शनयोग्या दृष्टिर्यस्य सः दिव्यदृष्टिर्दि
व्यदृक् प्रजायते प्रकर्षेण जायते अमरीसेवनप्रकारविशेषाः शिवांबुकल्पादवगंतव्याः १०० पुंसो वज्रोलीसाधनमुक्त्वा नार्यास्तदाह पुंसो बिंदुमिति सम्यक् अ
भ्यासस्य सम्यगभ्यसनस्य पाटवं पटुत्वं तस्मात् पुंसः पुरुषस्य बिंदुं वीर्यं समाकुंच्य सम्यगाकृष्य नारी स्त्री यदि रजः वज्रोल्या वज्रोलीमुद्रया रक्षेत् सापि नारी योगि
नी प्रशस्तयोगवती ज्ञेया पुंसो बिंदुं समाकुंच्येति पाठे पश्चात् रजसो विशेषणं १ नार्याः क्रियां वज्रोल्याः फलमाह तस्या इति तस्या वज्रोल्यभ्यसनशीलाया ना
र्या रजः किंचित्किमपि स्वल्पमपि नाशं न गच्छति नष्टं न भवति पतनं न प्राप्नोतीत्यर्थः अत्र संशयो न संदेहो न तस्याः नार्याः शरीरे नादश्च बिंदुतामेव गच्छति मू

अभ्यासान्निःसृतां चांद्रीं विभूत्या सह मिश्रयेत् धारयेदुत्तमांगेषु दिव्यदृष्टिः प्रजायते १०० पुंसो बिंदुं समाकुंच्य सम्यगभ्यासपाटवात् यदि नारी
रजो रक्षेद्वज्रोल्या सापि योगिनी १ तस्याः किंचिद्रजो नाशं न गच्छति न संशयः तस्याः शरीरे नादश्च बिंदुतामेव गच्छति २ स बिंदुस्तद्रजश्चैव ए
कीभूत स्वदेहगौ वज्रोल्यभ्यासयोगेन सर्वसिद्धिं प्रयच्छतः ३ रक्षेदाकुंचनादूर्ध्वं या रजः सा हि योगिनी अतीतानागतं वेत्ति खेचरी च भवेद्ध्रु
वं ४ देहसिद्धिं च लभते वज्रोल्यभ्यासयोगतः अयं पुण्यकरो योगो भोगे भुक्तेपि मुक्तिदः ५

लाधारादुत्थितो नादः हृदयोपरि बिंदुभावं गच्छ
ति बिंदुनाशहेतुर्न भवतीत्यर्थः अमृतसिद्धौ बीजं च पौरुषं प्रोक्तं रजश्च स्त्रीसमुद्भवं अनयोर्विह्ययोगेन सृष्टिः संजायते नृणां यदाभ्यंतरतो योगस्तदा यो
गीति गीयते बिंदुश्चंद्रमयः प्रोक्तो रजः सूर्यमस्तथा अनयोः संगमादेव जायते परमं पदं स्वर्गदो मोक्षदो बिंदुर्धर्मदोऽधर्मदस्तथा तन्मध्ये देवताः सर्वास्ति
ष्ठंते सूक्ष्मरूपतः इति २ समबिंदुरिति स पुंसो बिंदुः तद्रजः नार्या रजश्चैव वज्रोलीमुद्रया अभ्यासो वज्रोल्यभ्यासः स एव योगः तेन एकीभूय मिलित्वा स्वदे
हगौ स्वदेहगतौ सर्वसिद्धिं प्रयच्छतः दत्तः ३ रक्षेदिति या नारी आकुंचनात् योनिसंकोचनात् ऊर्ध्वं उपरि रजः स्थाने नीता रजो रक्षेदिति प्रसिद्धं योगशा
स्त्रे सा योगिनी अतीतं गतं अनागतं च अतीतानागतं भूतं भविष्यं च वस्तु वेत्ति ध्रुवमिति निश्चितं खे अंतरिक्षे चरतीति खेचरी अंतरिक्षचरी भवेत् ४

32

राम:
३२

देहसिद्धिमिति वज्रोल्यभ्यासस्य योगोपयुक्तिः तस्मात् देहसिद्धिः रूपलावण्यबलवज्रसंहननत्वं तल्लभते अयं योगः वज्रोल्यभ्यासयोगः पुण्यकृत् अदृष्टवि-
शेषजनकः कीदृशो योगः भुक्तमिति भोगो विशेषः तस्मिन्भुक्तेपि मुक्तिदः मोक्षदः ५ शक्तिचालनं विवक्षुस्तदुपोद्घातत्वेन तया कुंडलीपर्यायान् तया मोक्षद्वारविभेद-
नादिकं चाह सप्तभिः कुटिलांगीति कुटिलांगी १ कुंडलिनी २ भुजंगी ३ शक्तिः ४ ईश्वरी ५ कुंडली ६ अरुंधती ७ · एते सप्त शब्दाः पर्यायवाचकाः एकार्थवाचकाः ६
उद्घाटयेदिति यथा येन प्रकारेण पुमान् कुंचिकया पाटर्गलीसरणसाधनीभूतया हठात् बलात् कपाटं अररं उद्घाटयेत् उत्सारयेत् हठादिति देहली-
दीपन्यायेनोभयत्रासनवध्यते तथा तेन प्रकारेण योगी हठात् हठाभ्यासात् कुंडलीन्या शक्त्या मोक्षद्वारं मोक्षस्य द्वारं प्रापकं सुषुम्णामार्गं विभेद-
यत् विशेषेण भेदयेत् तयामानंममृतत्वमेतीति श्रुते ७ येनेति आमयो रोगः जन्यं दुःखं दुःखमात्रोपलक्षणं तस्यान्निर्गतं निरामयं दुःखमात्ररहितं ब्रह्म

अथ शक्तिचालनं कुटिलांगी कुंडलिनी भुजंगी शक्तिरीश्वरी कुंडल्यरुंधती चैते शब्दाः पर्यायवाचकाः उद्घाटयेत्कपाटं तु यथा कुंचिकया हठात् कुंड-
लिन्या तथा योगी मोक्षद्वारं विभेदयेत् ७ येन मार्गेण गंतव्यं ब्रह्मस्थानं निरामयं मुखेनाछाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ८ कंदोर्द्धे कुंडली शक्तिः सु-
प्ता मोक्षाय योगिनां बंधनाय च मूढानां यस्तां वेत्ति स योगवित् ९ कुंडली कुटिलाकारा सर्पवत्परिकीर्तिता सा शक्तिश्चालिता येन स मुक्तो नात्र संशयः १०

स्थानं ब्रह्माविर्भावजनकं स्थानं स्थानं ब्रह्मरंध्रं तस्याशिखायामध्ये परमात्मा व्यवस्थित इति श्रुतेः येन मार्गेण सुषुम्णामार्गेण गंतव्यं गमनार्हमस्ति तद्द्वारं तस्य
मार्गस्य द्वारं प्रवेशमार्गं मुखेन आस्येनाछाद्य प्रसुप्ता परमेश्वरी कुंडलिनी प्रसुप्ता निद्रितास्ति ८ कंदोर्ध्व इति कुंडली शक्तिः कंदोर्ध्वे कंदस्योपरिभागे योगिनां
मोक्षाय सुप्ता मूढानां बंधनाय सुप्ता योगिनस्तां चालयित्वा मुक्ता भवंति मूढास्तदज्ञानात् बद्धास्तिष्ठंतीति भावः तां कुंडलिनीं यो वेत्ति स योगवित् सर्वयोगयो-
गतंत्राणां कुंडल्याश्रयत्वादिति भावः ९ कुंडलीति कुंडली शक्तिः सर्पवत् भुजंगवत् कुटिलाकारः स्वरूपं यस्याः सा कुटिलाकारा कुंडलाकारा परिकीर्तिता
कथिता योगिभिः सा कुंडली शक्तिः येन पुंसा चालिता मूलाधारादूर्ध्वं नीता स मुक्तः अज्ञानबंधान्निर्मुक्तः अत्र अस्मिन्नर्थे संशयो न संदेहो नास्तीत्यर्थः ततो

र्ध्वमायन्नमृतत्वमेतीति श्रुते १०

ह.प्र.टी.
३४

गंगायमुनयोरिति गंगायमुनयोराधाराधेयभावेन तयोर्भावनाद्वा गंगायमुने इडापिंगले तयोर्मध्ये सुषुम्नामार्गे तपस्विनीं निरशनस्थितः बालरंडां बालरंडाश
ब्दवाच्यां कुंडलीं बलात्कारेण हठेन गृह्णीयात् तस्या गंगायमुनयोर्मध्ये ग्रहणं विष्णोः सर्वव्यापकस्यात्मनो वा परमं पदं परमपदप्रापकं ॥११ गंगायमुनापदा
र्थमाह इडेति इडा वामनिश्वासा नाडी भगवती षडैश्वर्यादिमती गंगा गंगापदवाच्या पिंगला दक्षिणनिश्वासा यमुना यमुनाशब्दवाच्या नदी इडापिंगलयोर्मध्ये
मध्यगता या कुंडली सा बालरंडा बालरंडाशब्दवाच्या ॥१२ शक्तिचालनमाह पुच्छ इति सुप्तां निद्रितां तां भुजंगीं तां कुंडलीनीं पुच्छे प्रगृहीत्वा उद्बोधयेत् सा श
क्तिः कुंडली निद्रां विहाय हठाद् ऊर्ध्वमुत्तिष्ठेदित्यन्वयः एतद्रहस्यं गुरुमुखादवगंतव्यं ॥१३ अवस्थितेति अवस्थिता अवाक्स्थिता मूलाधारे स्थिता फ
णावती भुजगी सा कुंडली सूर्यादापूर्य सूर्यात् पूरणं कृत्वा परिधानस्य युक्तिः परिधानयुक्तिस्तया परिधानयुक्त्या प्रगृह्य गृहीत्वा सायं सूर्यास्तमनये प्रातः
सूर्योदयवेलायां नित्यमहरहः प्रहरस्य यामस्यार्धं प्रहरार्धं प्रहरार्धमेव प्रहरार्धमात्रं मुहूर्तद्वयमात्रं परिचालनीया परितः चालयितुं योग्या परिधानयुक्ति

गंगायमुनयोर्मध्ये बालरंडां तपस्विनीं बलात्कारेण गृह्णीयात्तद्विष्णोः परमं पदं ॥११ इडा भगवती गंगा पिंगला यमुना नदी इडापिंगलयोर्मध्ये बा
लरंडा च कुंडली ॥१२ पुच्छे प्रगृह्य भुजगीं सुप्तामुद्बोधयेच्च तां निद्रां विहाय सा शक्तिरूर्ध्वमुत्तिष्ठते हठात् ॥१३ अवस्थिता चैव फणावती सा प्रातश्च
सायं प्रहरार्धमात्रं प्रपूर्य सूर्यात्परिधानयुक्त्या प्रगृह्य नित्यं परिचालनीया ॥१४ ऊर्ध्वं वितस्तिमात्रं तु विस्तारं चतुरंगुलं मृदुलं धवलं प्रोक्तं वेष्टितं

[illegible]

ईशिकाद्बोध्या ॥१५ कंदसंपीडनेन शक्तिचालनं विवक्षुरादौ कंदस्य स्थानं स्वरूपं चाह ऊर्ध्वमिति मूलस्थानाद्वितस्तिमात्रं वितस्तिप्रमाणम् ऊर्ध्वं उपरि नाभिमे
ढ्रयोर्मध्ये तेन कंदस्य स्थानमुक्तं तथा चोक्तं गोरक्षशतके ऊर्ध्वं मेढ्रादधो नाभेः कंदयोनिः खगांडवत् तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिरिति
याज्ञवल्क्यः गुदात्तु द्व्यंगुलादूर्ध्वं मेढ्रात्तु द्व्यंगुलादधः देहमध्यं तयोर्मध्यं मनुजानामितीरितं कंदस्थानं मनुष्याणां देहमध्यान्नवांगुलं चतुरंगुलविस्तारमायतं त
थाविधं अंडाकृतिवदाकारं भूषितं तत्त्वगादिभिः चतुष्पदां तिरश्चां च द्विजानां तुंडमध्यमे इति गुदाद्व्यंगुलोपरि मध्यं एकांगुलं मध्यं तस्मान्नवांगुलं कंदस्थानमिति
त्वाद्द्वादशांगुलप्रमाणं वितस्तिमात्रं जातं चतुरंगुलीनां समाहारश्चतुरंगुलं चतुरंगुलप्रमाणो विस्तारः विस्तारो दैर्घ्यस्याप्युपलक्षणं चतुरंगुलं दीर्घं च मृदुलं
कोमलं धवलं शुभ्रं वेष्टितं वेष्टने वस्त्रं गांडाकारीकृतं यदंबरं वस्त्रं तस्य लक्षणं स्वरूपं यस्य तादृशं प्रोक्तं कथितं कंदस्वरूपं योगिभिरिति शेषः ॥ १५

33

राम:
३४

सतीति॥ वज्रासने स्थिरासने कृते सति कराभ्यां हस्ताभ्यां गुल्फौ पादग्रंथी तयोर्देशौ प्रदेशौ तयोः समीपगुल्फाभ्यां किंचिदुपरितनग्रंथी घुटिके गुल्फावित्यमरः
पादौ चरणौ दृढं गाढं धारयेत् गृह्णीयात् चकाराद्धस्ताभ्यां तत्र कंदस्थाने कंदं प्रपीडयेत् प्रकर्षेणापीडयेत् गुल्फादूर्ध्वं कराभ्यां पादौ गृहीत्वा नाभेरधोभागे
कंदं पीडयेदित्यर्थः १६ वज्रासनेइति वज्रासने स्थितो योगी कुंडलीं चालयित्वा शक्तिचालनमुद्रां कृत्वेत्यर्थः अनंतरं शक्तिचालनानंतरं भस्त्रां भस्त्राख्यं
कुंभकं कुर्यात् एवं स्थिता कुंडलिशक्तिं आशु शीघ्रं प्रबोधयेत् प्रबुद्धां कुर्यात् वज्रासने शक्तिचालनस्य पूर्वं विधानेपि पुनर्वज्रासनोपदानं शक्तिचालनानं
तरं भस्त्रायां वज्रासनमेव कर्तव्यमितिनियमार्थं १७ भानोरिति भानोर्नाभिदेशस्थस्य सूर्यस्य आकुंचनं कुर्यात् नाभेराकुंचनेनैव तस्याकुंचनं भवति ततः भानो
राकुंचनात् कुंडलीशक्तिं चालयेत् मृत्योर्वक्त्रं मुखं प्राप्तस्यापि प्राप्तः स्थापितस्य पुंसः मृत्युभयं कालभयं कुतः न कुतोपीत्यर्थः १८ मुहूर्तद्वयमिति मुहूर्तयोर्द्वय

सति वज्रासने पादौ कराभ्यां धारयेद्दृढं गुल्फदेशसमीपे च कंदं तत्र प्रपीडयेत् १६ वज्रासने स्थितो योगी चालयित्वा च कुंडलीं कुर्यादनंतरं भ
स्त्रां कुंडलीमाशु बोधयेत् १७ भानोराकुंचनं कुर्यात्कुंडलीं चालयेत्ततः मृत्युवक्त्रगतस्यापि तस्य मृत्युभयं कुतः १८ मुहूर्तद्वयपर्यंतं निर्भयं
चालनादसौ ऊर्ध्वमाकृष्यते किंचित्सुषुम्णायां समुद्गता १९ तेन कुंडलिनी तस्याः सुषुम्णाया मुखं ध्रुवं जहाति तस्मात्प्राणोयं सुषुम्णां व्र
जति स्वतः २० तस्मात्संचालयेन्नित्यं सुखसुप्तामरुंधतीं तस्याः संचालनेनैव योगी रोगैः प्रमुच्यते २१ येन संचालिता शक्तिः स योगी सि
द्धिभाजनं किमत्र बहुनोक्तेन कालं जयति लीलया २२

युगं घटिकाचतुष्टयात्मकं तत्पर्यंतं तदवधि निर्भयं निःशंकं चालनात् असौ शक्तिः सुषुम्णायां समुद्गता सती किंचिदूर्ध्वं आकृष्यते आकृष्टा भवति १९
तेनेति तेन ऊर्ध्वाकर्षणेन कुंडलिनी तस्याः प्रसिद्धायाः सुषुम्णायाः मुखं प्रवेशमार्गं ध्रुवं निश्चितं जहाति त्यजति तस्मात् तन्मार्गत्यागात् अयं प्राणवायुः स्व
तः स्वयमेव सुषुम्णां व्रजति गच्छति कुंडलिन्या सुषुम्णामुखस्य त्यागेन तस्य निर्गलत्वादिति भावः २१ तस्मादिति यस्मात् शक्तिचालनेन प्राणः सुषुम्णां व्रजति
तस्मात् सुखेन सुप्ता सुखसुप्ता तां सुखसुप्तां अरुंधतीं शक्तिं नित्यं प्रतिदिनं सम्यक् चालयेत् तस्याः शक्तेः संचालनेनैव संचालनमात्रेण योगी रोगैः कासश्वा
सज्वरादिभिः प्रमुच्यते रोगमुक्तो भवति २१ येनेति येन योगिना शक्तिः कुंडली संचालिता स योगी सिद्धीनामणिमादीनां भाजनं पात्रं भवति अत्र अस्मिन्नर्थे बहु
प्रलपनेन किं न किमपीत्यर्थः। कालं मृत्युं लीलया अनायासेनैव ज
यत्यभिभवतीत्यर्थः २२

ह०प्र०टी
२५

ब्रह्मचर्येति ब्रह्मचर्यं योषादिभिः सहोपस्थसंयमः तस्मिन् रतस्य तत्परस्य नित्यं सर्वदा हितं पथ्यं मितं चतुर्थांशवर्जितं अश्नातीति तस्य कुंडल्यभ्यासः शक्तिचालनाभ्यासः सस्तद्योगः सोस्यास्तीति तस्य मंडलात् चत्वारिंशद्दिनात्मकात् अंतः सिद्धिः प्राणायामसिद्धिर्दृश्यते २४ कुंडलीमिति कुंडलीचालयित्वा शक्तिचालनं कृत्वा अथानंतरमेव भस्त्रां भस्त्राख्यं कुंभकं कुर्यात् नित्यं प्रतिदिनमेवं क्रमप्रकारेणाभ्यसतो यमिनो योगिनः यमभीः यमाद्भयं कुतः न कुतोपीत्यर्थः योगिनो देहत्यागस्य स्वादिति तात्पर्यं २५ द्वासप्ततीति द्वाभ्यामधिकासप्ततिर्द्वासप्ततिः द्वासप्ततिसंख्याकानि सहस्राणि द्वासप्ततिसहस्राणि तेषां तत्संख्याकानां नाडीनां मलशोधने कर्तव्ये सति कुंडल्यभ्यसनातः शक्तिचालनाभ्यासात् अन्ये विना कुतः प्रक्षालनोपायः न कुतोपि शक्तिचालनाभ्यासेनैव सर्वासां नाडीनां मलशोधनं भवतीत्यभि २ २६ इयं त्विति इयं मध्यमा नाडी सुषुम्णा योगिनां हठाभ्यासेन आसनं स्वस्तिकादि प्राणसंयमः प्राणायामः मुद्रा महामुद्रादिकानि सरला ऋज्वी भवेत् २७ अभ्या

ब्रह्मचर्यरतस्यैव नित्यं हितमिताशिनः मंडलाद्दृश्यते सिद्धिः कुंडल्यभ्यासयोगिनः २३ नालादक्षिणमार्गवाहिपवनात्प्राणोतिदीर्घात्कृतध्वंशांभः परिपूरितो मृततनुः प्राग्धूतिकायात्मनः छित्वा कालविशालवह्निवसगं ब्रह्मरंध्रनाडीगतं ते कायं कुरुते पुनर्नवतरं छिन्नद्रुमस्कंधवत् २४ कुंडलीं चालयित्वा तु भस्त्रां कुर्याद्विशेषतः एवमभ्यसतो नित्यं यमिनो यमभीः कुतः २५ द्वासप्ततिसहस्राणां नाडीनां मलशोधनं कुतः प्रक्षालनोपायः कुंडल्यभ्यसनादृते २६ इयं तु मध्यमा नाडी दृढाभ्यासेन योगिनां आसनप्राणसंयाममुद्राभिः सरला भवेत् २७ अभ्यासे तु विनिद्राणां मनो धृत्वा समाधिना रुद्राणी वा परा मुद्रा भद्रां सिद्धिं प्रयच्छति २८ राजयोगं विना पृथ्वी राजयोगं विना निशा राजयोगं विना मुद्रा विचित्रापि न शोभते २९ ७

पुमी

सतीति समाधिना इतरवृत्तिनिरोधरूपेणैकाग्र्येण मनो धृत्वा अंतःकरणं धारणानिष्ठं कृत्वा अभ्यासे मनः स्थितेयत्ते विगता निद्रा एषां तेन था निद्रा पदमा यस्योल्लक्षणं अनया सामा निम्यर्थः रुद्राणि सांभवी मुद्रा वा अथवा परा अन्या उन्मन्यादिका भद्रां शुभां सिद्धियोगसिद्धिं प्रयच्छति ददाति एतेन हठयोगोपकारको राजयोगः प्रोक्तः २८ राजयोगं विनाऽसनादीनां वैयर्थ्यमौपचारिकं श्लेषेणाह राजयोगमिति सर्ववृत्तिनिरोधपूर्वगोचरधारावाहिकनिर्विकल्पकवृत्ती राजयोगः हठं विना राजयोग इत्युक्तस्तं विना तत्साधनाभ्यासो वा तं विना न राजते पृथ्वी शब्देन स्थैर्यगुणयोगादासनं लक्ष्यते तन्न राजते न शोभते राजयोगं विना परमपुरुषार्थरूपफलासिद्धेरिति हेतुरग्रेपि योजनीयः राजयोगं विना निशेव निशा कुंभको न राजते निशायां प्रायेण जनसंचाराभावान्निशाऽश

35

राम:
३५

क्षेन् मारुतसंचाराभावलक्षणः कुंभको लक्ष्यते राजयोगं विना मुद्रा महामुद्रादिरूपा विचित्रापि विविधापि विलक्षणापि वा न राजते न शोभते पक्षांतरे राजो नृप
स्य योगो राजयोगः राजसंबंधः तं विना पृथ्वी भूमिर्न राजते शास्तारं विना भूमौ नानोपद्रवसंभवात् राजचंद्रः सोमोस्माकं ब्राह्मणानां राजेति श्रुतेः तस्य योगं सं
बंधं विना निशा रात्रिर्न राजते राजयोगं विना नृपसंबंधं विना मुद्रा राजभिः पत्रेषु क्रियमाणलांछनविशेषः विचित्रापि पृथ्वी पक्षे रत्नादिजनकत्वेन विलक्षणा
निशापक्षे ग्रहनक्षत्रादिभिर्विचित्रापि मुद्रापक्षे रेखाभिर्विचित्रापि न राजते २९ मारुतस्य मारुतस्य वा सर्वविधि कुंभकमुद्राविधानं मनोयुक्तं मनसा
युक्तं समभ्यसेत् सम्यगभ्यसेत् मनीषिणा बुद्धिमता पुंसा इतरत्र मारुतस्य विधेरन्यस्मिन् विषये मनोवृत्तिः मनसो वृत्ति वृत्तिः न कर्तव्या न कार्या ३० मुद्रा उपसं
हरती इतीति आदिनाथेन सर्वेश्वरेण शंभुना शं सुखं भवत्यस्मादिति शंभुस्तेन इत्युक्तरीत्या दश दशसंख्याकाः प्रोक्ताः कथिताः तासु मुद्रासु मध्ये एकैकापि

मारुतस्य विधिं सर्वं मनोयुक्तं समभ्यसेत् इतरत्र न कर्तव्या मनोवृत्तिर्मनीषिणा ३० इति मुद्रा दश प्रोक्ता आदिनाथेन शंभुना एकैका तासु य
मिनां महासिद्धिप्रदायिनी ३१ उपदेशं हि मुद्राणां यो दत्ते सांप्रदायिकं स एव श्रीगुरुः स्वामि साक्षादीश्वर एव सः ३२ तस्य वाक्यपरो भूत्वा मु
द्राभ्यासे समाहितः अणिमादिगुणैः सार्द्धं लभते कालवंचनं इति स्वात्मारामगोविंदविरचितायां हठप्रदीपिकायां मुद्राविधानं नाम तृती

प्रत्येकापि या काचन मुद्रा यमिनां यमवतां योगिनां महासिद्धिप्रदायिनी अणिमादिप्रदात्री कैवल्यप्रदात्री वा २ ३१ मुद्रोपदेष्टारं गुरुं प्रशंसति उपदेश
मिति यः पुमान् मुद्राणां महामुद्रादीनां संप्रदायात् योगिनां गुरुपरंपरारूपादागतं सांप्रदायिकं उपदेशं दत्ते ददाति स एव स पुमानेव श्रीगुरुः श्रीमान् गुरु
ः सर्वगुरुत्वाः श्रेष्ठ इत्यर्थः स्वामी प्रभुः साक्षात्प्रत्यक्षं ईश्वर एव सः ईश्वराभिन्न एव स इत्यर्थः ३१ तस्येति तस्य मुद्राणामुपदेष्टुर्गुरोः वाक्यपरः वाक्य आसनकुंभका
द्यनुष्ठानविषयकं मुक्ताहारविहारचेष्टादिविषयकं च तस्मिन् परस्तत्परः तत्परश्च आदरवान् आदरश्चावहितत्वया करणं भूत्वा संभूय मुद्राणां महामुद्रादीनां अभ्या
से समाहितः सावधानः पुरुषः अणिमादिगुणैः अणिमादिसिद्धिभिः सार्द्धं साकं कालस्य मृत्योर्वंचनं प्रतारणं लभते प्राप्नोति इति श्रीहठप्रदीपिकाव्याख्यायां ब्रह्मा
नंदकृतायां ज्योत्स्नाभिधायां मुद्राकथनं नाम तृतीयोपदेशः ३ ना

Nepal Sanskrit University, Balmiki Campus, Kathmandu

नाथभगवन् शिवायगुरूपिणे गुरवेदेशिकाययद्वागुरवे सर्वान्तर्यामितयानिखिलोपदेष्टे शिवायईश्वराय तथाचपातंजलंसूत्रं पूर्वेषामपिगुरुःकालेनानवछे
द्यात्नमःप्रह्वीभावोस्तु कीदृशायशिवायगुरवेनादबिंदुकलात्मनेकांस्यघंटानिर्ह्रादिवदनुरणनंनादः बिंदुरनुस्वारोत्तरभाविध्वनिःकलानादैकदेशाताःआत्मास्वरूप
यस्यसः तथातस्मै नादबिंदुकलात्मना विवर्तमानायेत्यर्थः यद्वानादबिंदुकलात्मनिशिवेगुरौनित्यंप्रतिदिनंपरायणः अवहितमानस् एतेनगुरावनुसंधानपरायणः
सूक्तं पूर्वपादेनगुरुशिवयोरभेदःसूचितः अंजनंमायोपाधिस्तद्रहीतंनिरंजनंशुद्धं यद्यतेगम्यतेयोगिभिरितिपदंब्रह्म याति प्राप्नोति तथाचवक्ष्यति नादानुसंधा
नसमाधिभाजामित्यादिना समाधिक्रमंप्रतिजानीतेअथेति अथआसनकुंभकमुद्राकथनानंतरं इदानींअस्मिन्नवसरेसमाधिक्रमंप्रत्याहारादिरूपंप्रवक्ष्यामि
प्रवर्षेणविविच्यवक्ष्यामीत्यन्वयः कीदृशंसमाधिक्रमंप्रहारास्मोहाराउत्तमं श्रीआदिनाथोक्तपादकोटिसमाधिप्रकारेषूत्कृष्टंपुनःकीदृशं मृत्युकालेहति मृत्यु
प्रनिवारयती मृत्युघ्नंस्वेछ्यादेहत्यागजनकंसवज्ञानोदयमनोनाशवासनाक्षयेःसुखस्यजीवन्मुक्तिसुखस्यउपायप्राप्तिसाधनंपुनःकीदृशंपरंब्रह्मानंदक

नमःशिवायगुरवेनादबिंदुकलात्मने निरंजनपदंयातिनित्यंयत्रपरायणः १ अथेदानींप्रवक्ष्यामिसमाधिक्रममुत्तमं मृत्युघ्नंचसुखोपायंब्र
ह्मानंदकरंपरं २

रं प्रारब्धकर्मक्षयेसतिजीवब्रह्मणोरभेदे आत्यंतिकब्रह्मानंदावाप्तिदेहमुक्तिकरं तत्रनिरोधसमाधिनाचित्तस्यसंस्काराशेषव्रत्तिनिरोधेशांतयोरमू
ढावस्थानिहत्तोजीवन्नेवहिविद्वान्हर्षशोकाभ्यांविमुच्यतइत्यादिश्रुत्युक्तानिर्विकाररूपवस्थितिस्वरूपाजीवन्मुक्तिर्भवति परममुक्तिस्तुप्राण
भोगांतेअंतःकरणगुणानांप्रतिप्रसवेनोपाधिकरूपात्यंतिकनिवृत्त्यावात्यंतिकंस्वरूपावस्थानं प्रतिप्रसवश्चित्थं व्युत्थाननिरोधसमाधिसंस्कारामन
सिलीयतेमनोस्मितायांअस्मितामहतिमहान्प्रधानइतिचित्तगुणानांप्रतिप्रसवःप्रतिसर्गस्वकारणेलयस्तत्रजीवन्मुक्तस्यव्युत्थानेब्रह्मणोहंमनुश्चाहमित्या
दिव्यवहारदर्शनात् चित्तादिभिरौपाधिकभावजननात् अस्तेनुत्थस्येवस्वरूपस्थितिश्चेत्तसंप्रज्ञातसमाधावनुभूतात्मसंस्कारस्यनिरोधसंस्कारस्यचतदानीम
त्वात् ताभ्यांचव्युत्थानसंस्कारस्यदग्धबीजकसत्वात् व्युत्थानव्यवहारस्यातात्विकत्वनिश्चयात् अतात्विकात्मभावस्याविकारित्वात्प्रयोजनकत्वात् अ
न्नेत्युत्थस्यदधिभावस्तुतात्विकइतिद्रष्टानवेअस्माच्चतथस्यतुअंतःकरणोपाधिकोहंब्रह्मास्मीत्यादिव्यवहारस्फाटिकस्यजपाकुसुमसन्निनोपाधिरक्तिमेव
नतात्विकःजपाकुसुमापगमेस्फाटिकस्यस्वरूपास्थितिवत् अंतःकरणस्यसकलवृत्तिनिरोधेस्वस्वरूपावस्थितिरमुनेवपुरुषस्य २

क५

समाधिपर्यायान्विशेषेणाह राजयोग इत्यादिना श्लोकद्वयेन स्पष्टं ३ ४ त्रिभिः समाधिमाह सलील इति यद्वद्यथा सैंधवं सिंधुदेशोद्भवं लवणं सलिले जले यो
गतः संयोगात् साम्यं सलिलसाम्यं सलिलैकाकारत्वं भजति प्राप्नोति तथा तद्वत् आत्मा च मनश्चात्ममनसी तयोः आत्ममनसोरैक्यं एकाकारता आत्मनि धारि
तं मनः आत्माकारं सदात्मसाम्यं भजति तादृशमात्ममनसोरैक्यं समाधिः अभिधीयते समाधिशब्देनोच्यत इत्यर्थः ५ यदा संक्षीयत इति यदा यस्मिन्काले जित
प्राणस्य योगिनः कुंभकाले प्राणः शरीरान्तर्वर्तिवायुः कुंभकेन निरुद्धस्तन्निकः प्राणःसिद्धिक्षीण इत्युच्यते संक्षीयते सम्यक्क्षीणो भवति मानसं च मनश्च प्रलीय

राजयोगसमाधिश्चउन्मनीचमनोन्मनी अमरत्वंलय[illegible]शून्याशून्यंपरंपदं ३ अमनस्कंतथाद्वैतंनिरालंबंनिरंजनं जीवन्मु
क्तिश्चसहजातुर्याचेत्येकवाचकाः सलिलेसैंधवंयद्वत्साम्यंभजतियोगतः तथात्ममनसोरैक्यंसमाधिरभिधीयते ५
यदासंक्षीयतेप्राणोमानसंचप्रलीयते तदासमरसत्वंचसमाधिरभिधीयते ६

ते प्रकर्षेण लयं प्राप्नोति आत्मनि स्थितस्य मनसः आत्माकारतालयः तदा तस्मिन्काले समरसत्वं एकाकारत्वं मनसश्चात्मनि स्थितस्यात्माकारपरिणा
मेनात्माकारत्वं जपाकुसुमस्य स्फटिके जपाकुसुमाकारत्ववत् तथा च पातंजलसूत्रं क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदंज
नता समापत्तिः चकारेण समरसत्वस्य स्थैर्यं समुच्चीयते अनयैव पातंजलभाष्ये विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते यो
गपक्षे वर्तते इत्युक्तं इत्थं च आत्माकारमनोवृत्तेः स्थिरीभावः समाधिरभिधीयत इत्यर्थः उक्ताभ्यां द्वाभ्यां श्लोकाभ्यां संप्रज्ञातः समाधिरुक्तः सम्य

कसंशयविपर्ययरहितत्वेनप्रज्ञायतेप्रकर्षेणापरोक्षतयानुभूयतेभाव्यस्यस्वरूपमनेनेतिसंप्रज्ञातःसमाधिर्भावनाविशेषःभावनाचभाव्यस्यविषयां
तरपरिहारेणचेतसिपुनःपुनर्निवेशनं संचप्रज्ञातःसालंबनःसबीजोलयश्चेतिसंप्रज्ञातस्यप्रसिद्धाःपर्याया ६ तत्सममिति तत्समंपूर्वोक्तसमंद्वयो
:उभयोःजीवात्मा अंतःकरणोपहितंचैतन्यं परमात्मासच्चिदानंदलक्षणंदेशकालवस्तुपरिच्छेदशून्यंचैतन्यंतयोरैक्यंअभेदः ऐक्यंविशिनष्टिप्रनष्टसर्व

तत्समंचद्वयोरैक्यंजीवात्मपरमात्मनोः प्रनष्टसर्वसंकल्पंसमाधिःसोभिधीयते ७

संकल्पमिति प्रकर्षेणनष्टानिरुद्धाःसर्वेध्यातृध्यानध्येयादिरूपाःसंकल्पाःसम्यक्कल्पनायस्मिन्तत्तादृशंऐक्यंपुंल्लिंगपाठेसमाधेर्विशेषणं सयोगशास्त्र
प्रसिद्धःसमाधिःनिर्बीजःसमाधिःअभिधीयतेकथ्यते तथाचपातंजलंसूत्रंतस्यापिनिरोधेसर्वनिरोधान्निर्बीजःसमाधिरिति अनेनासंप्रज्ञातःसमाधिरुक्त
अन्वर्थश्चायंनकिमपिसध्यातृध्यानध्येयरूपत्वादिनाप्रज्ञायतेस्मिन्नित्यसंप्रज्ञातःअसंप्रज्ञातोनिरालंबोनिर्बीजोराजयोगो निरोधश्चेत्यसंप्रज्ञातस्यप्र

१ सिद्धाःपर्याया

अथराजयोगशंसा राजयोगस्येति राजयोगस्योनंतरमेवोक्तस्यमहात्म्यंप्रभावंतत्वतःवस्तुतः कोवाजानाति नकोपिजानातीत्यर्थः तत्वतोवक्तुमशक्यत्वादेकदेशेनराजयोगप्रभावमाह ज्ञानंस्वस्वरूपापरोक्षानुभवमुक्तिर्विदेहमुक्तिः स्थितिर्निर्विकारस्वरूपावस्थितिरूपाजीवन्मुक्तिः सिद्धिरणिमादिर्गुरुवाक्येन गुरुवचसालभ्यतेराजयोगादितिशेषः ८ दुर्लभइति विषिण्वंत्यवध्नंतिप्रमातारंस्वसंगेनेतिविषयाऐहिकादारादयः आमुष्मिकाःसुधादयःतेषां त्यागोभोगेच्छाभावःदुर्लभःतत्वदर्शनमात्मापरोक्षानुभवः दुर्लभसहजावस्यातुर्यावस्थासद्गुरोर्दृष्टिःस्थिरायस्यविनैवदृश्यमितिवक्ष्यमाणस्य करुणांदयांविनेति सर्वत्रसंबध्यते दुर्लभालब्धुमशक्याः दुःस्यात्कष्टनिषेधयोरितिकोशः तत्कृपयातुसर्वसुलभमितिभावः ९ विविधैरिति वि

राजयोगस्यमहात्म्यंकोवाजानातितत्वतः ज्ञानंमुक्तिःस्थितिःसिद्धिर्गुरुवाक्येनलभ्यते ८ दुर्लभोविषयत्यागोदुर्लभंतत्वदर्शनं
दुर्लभासहजावस्थासद्गुरोःकरुणांविना ९ विविधैरासनैःकुंभैर्विचित्रैःकरणैरपि प्रबुद्धायांमहाशक्तौप्राणःशून्येप्रलीयते
१० उत्पन्नशक्तिबोधस्यत्यक्तनिःशेषकर्मणः योगिनःसहजावस्थास्वयमेवप्रजायते ११

विधैरनेकविधैरासनैर्मत्स्येंद्रादिपीठैः विचित्रैर्नानाविविधैःकुंभैःकुंभकैःविचित्रैरितिकाकाक्षिगोलकन्यायेनोभयत्रसंबध्यते विचित्रैरनेकैःप्रकारकैःकरणैर्हठसिद्धोपकारकैःमहामुद्रादिभिः महाशक्तौकुंडलिन्यांप्रबुद्धायांगतनिद्रायांसत्यांप्राणोवायुःशून्येब्रह्मरंध्रेप्रलीयते प्रलयंप्राप्नोति व्यापाराभावःप्राणस्यप्रलयः १० उत्पन्नेति उत्पन्नोजातःशक्तिबोधःकुंडलीबोधोयस्यतस्यत्यक्तानिपरिहृतानिनिःशेषाणिसमग्राणिकर्माणियेनतस्ययोगिनः आसनेनकायिकव्यापारस्त्यक्तः प्राणेंद्रियेषुव्यापारस्तिष्ठति कुंभकेनप्राणनिरोधे प्राणेंद्रियव्या

पा

पारेत्यक्तेमनसिव्यापारंत्यजति प्रत्याहारधारणाध्यानसंप्रज्ञातसमाधिभिः मानसिकेव्यापारेत्यक्तेबुद्धेर्व्यापारंत्यजति असंगोह्ययंपुरुषइतिश्रुतेरपरिणामि
श्चपुरुषः सत्वगुणात्मिकापरिणामिनीबुद्धिरितिपरवैराग्येणदीर्घकालंसंप्रज्ञाताभ्यासेनैवबुद्धिव्यापारेपरित्यक्तेनिर्विकारस्वरूपावस्थितिर्भवति सैवसह
जावस्थातुर्यावस्थाजीवन्मुक्तिः स्वयमेवप्रयत्नांतरंविनैवप्रज्ञायतेप्रादुर्भवति येनस्येन्येनंमन्येतितितिः संगःप्रज्ञयाभवेदितिवचनात् ११ सुषुम्णेति प्राणेवा
यौसुषुम्णावाहिनिमध्यनाडीप्रवाहिनिसति मानसेअंतःकरणेशून्येदेशकालवस्तुपरिच्छेदरहितेब्रह्मणिविशति तदातस्मिन्कालेयोगवित्चित्तवृत्तिनिरो
धज्ञः सर्वाणिप्रारब्धानिनिर्मूलानिकरोतिनिर्मूलयति निर्मूलशब्दात्तत्करोतीतिणिच् १२ समाध्यभ्यासेनप्रारब्धकर्मणोप्यभिभावाज्जितकालयोगिनं

सुषुम्णावाहिनिप्राणेशून्येविशतिमानसे तदासर्वाणिकर्माणिनिर्मूलयतियोगवित् १२ अमरायनमस्तुभ्यंसोपिकालस्त्वयाजितः
पतितंवदनेयस्यजगदेतच्चराचरं १२ चित्तेसमत्वमापन्नेवायौव्रजतिमध्यमे तदामरोलीवज्रोलीसहजोलीप्रजायते १४

नमस्करोति अमरायेतिनास्तिमरोयस्यतस्मैअमरायचिरंजीविनेतुभ्यंयोगिनेनमः सोपिदुर्वारोपिकालोमृत्युस्त्वयायोगिनाजितोअभिभूतः इदं
वाक्यंनमस्कारेहेतुः कः यस्यकालस्यवदनेमुखेपतितंदृश्यमानंचराचरंस्थावरंजंगमंजगत्संसारःपतितंसोपिजगद्भक्षयितेत्यर्थः पूर्वोक्तममरोल्
यादिकंसमाधिसिद्धावेवसिध्यतीतिसमाधिनिरूपणानंतरंसमाधिसिद्धेनतत्सिद्धिरित्याह चित्तइति चित्तेअंतःकरणेसमत्वंध्येयाकारवृत्तिप्रवाहवत्वं
आपन्नेप्राप्तेसति वायौप्राणेमध्यमेसुषुम्णायांव्रजतिसतीतिचित्तसमत्वेहेतुः तदातस्मिन्कालेअमरोलीवज्रोलीसहजोलीचपूर्वोक्ताप्रजायते
नाजितप्राणस्यनवाजितचित्तस्यसिध्यतीतिभाव १४

37

हठाभ्यासंविनाज्ञानमोक्षश्चनसिध्यतीत्याह ज्ञानमिति यावत्प्राणोजीवतिअपिशब्दादिंद्रियाणिजीवंति नतुम्रियते यावत्मनोनम्रियतेकिंतुजीवत्ये
व इडापिंगलाभ्यांवहनंप्राणस्यजीवनं स्वस्वविषयग्रहणमिंद्रियाणांजीवनं नानाविषयाकारवृत्युत्पादनंमनसोजीवनं तदभावस्तेषांमरणमत्रविव
क्षितंनतुस्वरूपतस्तेषांनाश तावत्मनसिअंतःकरणेज्ञानंआत्मापरोक्षानुभवःकुतःसंभवति नकुतोपि प्राणेंद्रियमनोवृत्तीनांज्ञानप्रतिबंधकत्वादि
तिभावः प्राणोमनःइदंद्वयंयोगीविलयंनाशनंयेत्सःमोक्षआत्यंतिकस्वरूपावस्थानलक्षणंगच्छतिप्राप्नोति ब्रह्मरंध्रेनिर्व्यापारस्थितिःप्राणस्यल
यःध्येयाकारावेशाद्विषयांतरेणापरिणमनंमनसोलयःअन्यःअलीनप्राणोलीनमनाश्चकथंचित् उपायशतेनापिनमोक्षप्राप्नोतीत्यर्थः तदुक्तं
योगबीजे नानाविधैर्विचारैस्तुनसाध्यंजायतेमनः तस्मात्तस्यजयोपायंःप्राणस्यजयएवहीति नानामार्गैस्तुदुःप्रापंकैवल्यंपरमंपदंसिद्धिमा

ज्ञानंकुतोमनसिसंभवतीहतावत्प्राणोविजीवतिमनोम्रियतेनयावत् प्राणोमनोद्वयमिदंविलयंनयेद्योमोक्षंसगच्छतिनरोनकथंचिदम १५

र्गैरलभ्येतनान्येथाशिवभाषितमितिच सिद्धमार्गोयोगमार्गः एतेनयोगंविनाज्ञानंमोक्षश्चनसिध्यतीतिसिद्धं श्रुतिस्मृतीति हासपुराणादिषु
वेदंप्रसिद्धं तथाहि अथतद्दर्शनाभ्युपायोयोगइति तद्दर्शनमात्मदर्शनं अध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीति श्रद्धाभक्तिध्या
नयोगादवेहि इति यदापंचावतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनविचेष्टतितामाहुःपरमांगतिं तांयोगमितिमन्यंतेस्थिरामिंद्रियधारणां अप्रमत्त
स्तदाभवतीति यदात्मतत्वेनतुब्रह्मतत्वंदीपोपमेनेहयुक्तःप्रपश्येत् अजंध्रुवंसर्वतत्वैर्विशुद्धंज्ञात्वादेवंमुच्यतेसर्वपाशैः ब्रह्मणोत्वामहसओमित्या
त्मानंयुंजीतेति त्रिरुन्नतंस्थाप्यसमंशरीरंहृदींद्रियाणिमनसासंनिवेश्य ब्रह्मोडुपेनप्रतरेतविद्वान्स्रोतांसिसर्वाणिभयावहानीति ओमित्ये
वध्यायथआत्मानंस्वपाशाःश्रुतपःयतिधर्मप्रकारेणमुमुक्षुःव्रतभावनवेशेतयोगेनपरमात्मनःदेहद्वयंविहायाशुमुक्तोभवतिबंधनात् याज्ञवल्क्यस्मृ

तोइज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयंतुपरमोधर्मोयद्योगेनात्मदर्शनं महर्षिमातंगः अग्निष्टोमादिकान्सर्वान्विहायद्विजसत्तमः योगाभ्यास
रतःशांतःपरंब्रह्माधिगच्छति ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणांचपावनं शांतयेकर्मणामन्यद्योगान्नास्तिविमुक्तये दक्षस्मृतौ व्यतिरेकमुखेनोक्तं स्वसंवेद्य
हितत्सुखंकुमारीस्त्रीसुखंयथा अयोगीनैवजानातिजात्यंधोहियथाघटं इत्यादिःस्मृतयः महाभारतेयोगमार्गप्रसंगेव्यासः अपिवर्णावकृष्टस्तुनारी
वाधर्मकांक्षिणी तावप्येतेनमार्गेणगच्छेतांपरमांगतिं यदिवासर्वधर्मज्ञोयदिवाप्यनृतःपुमान् यदिवाधार्मिकश्रेष्ठोयदिवापापकृत्तमः यदिवापु
रुषव्याघ्रोयदिवाक्लैब्यधारकः तरत्येवमहादुःखंजरामरणसागरं अपिजिज्ञासमानोपिशब्दब्रह्मातिवर्तते इतिभगवद्गीतायां युजन्नेवंसदात्मानं
योगीनियतमानसः शांतिंनिर्वाणपरमांमत्संस्थामधिगच्छति यत्सांख्यैःप्राप्यतेस्थानमित्यादिच आदित्यपुराणे योगात्संजायतेज्ञानंयोगोम
य्येकचित्तता स्कंदपुराणे आत्मज्ञानेनमुक्तिःस्यात्तच्चयोगादृतेनहि सचयोगश्चिरकालमभ्यासादेवसिध्यति कूर्मपुराणेशिववाक्यं अतःपरंप्र
वक्ष्यामियोगपरमदुर्लभं येनात्मानंप्रपश्यंतिभानुमंतमिवेश्वरं योगाग्निर्दहतिक्षिप्रमशेषंपापपंजरं प्रसन्नंजायतेज्ञानंज्ञानान्निर्वाणमृच्छति ग
रुडपुराणे तथायतेतमतिमान्यथास्यान्निर्वृतिःपरा योगेनतन्यतेसातुनचान्येनतुकेनचित् भवतापप्रतप्तानांयोगोहिपरमौषधं पारावर
प्रशक्ताधीर्यस्यनिर्वेदसंभवा सचयोगाग्निनादग्धसमस्तक्लेशसंचयः निर्वाणंपरमंनित्यंप्राप्नोत्येवनसंशयः संप्राप्तयोगसिद्धिस्तुपूर्णोय
स्त्वात्मदर्शनात् नकिंचिद्दृश्यतेकार्य्यंतेनैवसकलंकृतं आत्मारामसदापूर्णःसुखमात्यंतिकंगतः अतस्तस्यापिनिर्वेदपरानंदमयस्यच तपसा
भावितात्मानोयोगिनःसंयतेंद्रियाः प्रतरंतिमहात्मानोयोगेनैवमहार्णवं विष्णुधर्मे यच्छ्रेयः सर्वभूतानांज्ञानंसम्युपकारकं अपिकीट
पतंगानांनृणांश्रेयःपरंवदत्सुमुक्षः कपिलःपूर्वंदेवैर्देवर्षिभिस्तथा योगएवपरंश्रेयस्तेषामित्युक्तवान्पुरा वासिष्ठेदुःसहारामसंसारविषवेगवि-
षूचिका योगगारुडमंत्रेणपावनेनोपशाम्यति ननुतत्त्वमस्यादिवाक्यैरप्परोक्षज्ञानंसंभवतीति किमर्थमतिश्रमसाध्येयोगेभ्यासःकार्यः

नचवाक्यजन्यज्ञानस्यापरोक्षत्वेप्रमाणासंभवइतिवाच्यं तत्त्वमस्यादिवाक्यजन्यंज्ञानमपरोक्षंअपरोक्षविषयकत्वात्चाक्षुषघटादिप्रत्यक्षवदित्यनुमानस्यप्रमाण
त्वात् नचविषयगतापरोक्षत्वस्यदुर्निरूपत्वाद्धेत्वसिद्धिरितिवाच्यं अज्ञानविषयत्वतत्तादात्म्यापन्नत्वात्मकरूपस्यतस्यसुनिरूपत्वात् यथाहिघटादौचक्षुः
संनिकर्षेणांतःकरणस्यतद्देशायांदधिष्ठानचैतन्यमाज्ञाननिवृत्तौतत्स्वचैतन्यस्याज्ञानविषयत्वंतद्घटस्याज्ञानविषयचैतन्यतादात्म्यापन्नत्वंतथातत्त्वमस्यादिवा
क्येनक्तत्वचैतन्याकारांतःकरणवृत्त्युत्थापनेसतितदज्ञानस्यनिवृत्तत्वेनचैतन्यस्याज्ञानाविषयत्वात् चैतन्यस्यापरोक्षत्वमितिनहेत्वसिद्धिः नचाप्रयोज
कत्वं ज्ञानगतापरोक्षत्वंप्रतिअपरोक्षविषयकत्वेनप्रयोजकत्वात् नत्विंद्रियजन्यत्वंमनसइंद्रियत्वाभावेनसुखादिप्रत्यक्षेव्यभिचारात् अथवाअभिव्य
क्तचैतन्याभिन्नतयाभासमानत्वंविषयस्यापरोक्षत्वं अभिव्यक्तत्वंचनिवृत्तावरणकत्वं परोक्षवृत्तिस्थलेचावरणनिवृत्त्यभावान्नातिव्याप्तिः सर्पादि
भ्रमजनकदोषवतस्तुनायंसर्पःकिंतुरज्जुरितिवाक्येनजायमानावृत्तिस्तुनावरणंनिवर्तयतीतितत्रपरोक्षएवविषयः वेदांतवाक्यजन्यंचज्ञानंआवर
णनिवर्तकत्वादपरोक्षमेव मननादेःपूर्वमुत्पन्नंपरन्त्वज्ञाननिवर्तकंप्रमाणासंभावनादिदोषसामान्याभावविशिष्टस्यैवतस्यज्ञाननिवर्तकत्वात् किं
चतत्त्वौपनिषदंपुरुषंपृच्छामीतिश्रुतिप्रतिपन्नमुपनिषन्मात्रगम्यत्वंयोगगत्वेनुपपन्नंस्यात् तस्मात्तत्त्वमस्यादिवाक्यादेवपरोक्षमितिचेन्न अनु
मानस्याप्रयोजकत्वात् नचप्रत्यक्षंप्रतितूक्तापरोक्षविषयत्वेनप्रयोजकत्वात् तन्मूलकुतर्केणाप्रयोजकत्वशंकानिवृत्तिरितिवाच्यं लाघवात्जन्य
प्रत्यक्षसामान्यंप्रतिइंद्रियत्वेनकारणतयातज्जन्यत्वस्यैवप्रयोजकत्वात् नित्यानित्यसाधारणप्रत्यक्षत्वेतुनाकिंचित्प्रयोजकमितित्वन्मतेतुप्रत्य
क्षविशेषेइंद्रियकारणंतद्विशेषेचशब्दविशेषइतिकार्यकारणभावद्वयस्यात् नचमनसोनिंद्रियत्वं मनइंद्रियत्वेबाधकाभावात् इंद्रियाणांमनो
नाथइतितुमनुष्यमेवोद्दिश्यपमनुष्याणामयंराजेत्यादिवत् इंद्रियेष्वेवकिंचिदुत्कर्षबुद्धीतिनतुतस्यानिंद्रियत्वं तत्त्वंचषष्ठत्वादौपाधिविशेष

णएवअतएवकर्मेंद्रियं गुपाय्वादि मनोनेत्रादिधींद्रियमिति प्रत्यक्षं स्यादैंद्रियकमप्रत्यक्षमतींद्रियमिति च शाब्दिकप्रमाणभूतकोशोपि इंद्रियप्रमाणकत्ता
न्स्याप्रत्यक्षत्वं वदन्मननस्य इंद्रियत्वज्ञापकः संगच्छते इंद्रियाणि दशैकं चेति गीतावचनमपि च मननस्य इंद्रियत्वे प्रमाणं किंच तत्त्वमस्यादिवाक्यजन्यं ज्ञानं शा
ब्दशाब्दजन्यत्वात् यजेतेत्यादिवाक्यजन्यज्ञानवदित्यनेनापरोक्षविरोधिशाब्दत्वसाधकेन सत्प्रतिपक्षः नचेदमप्रयोजकं शाब्दं प्रत्येव शाब्दस्य जनकत्वेन ला
घवमूलकानुकूलतर्कात् तन्मते तु शाब्देपि प्रत्यक्षस्वीकारेण कार्यकारणभावद्वयकल्पने गौरवं अपि च मनननिदिध्यासनाभ्यां पूर्वमप्युत्पन्नं तत्त्वम
नेपरोक्षमपिज्ञाननिवर्त्तकमित्यज्ञाननिवृत्तिं प्रत्यप्रतिबद्धज्ञानत्वेनैव हेतुत्वमिति गौरवं मनननिदिध्यासनपरिपाकेनासंभावनादिमलरहितेनांतः
करणेनात्मनि दृष्टे सति दर्शनमात्रादेवाज्ञाननिवृत्तेर्न कश्चित् गौरवप्रकाशः एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मद
र्शिभिः यच्छेद्वाङ्मनसी प्राज्ञस्ताभ्यां ज्ञाननिवृत्त्यर्थकेन मनुगुरुत्वात् प्रत्युत तर्ह्यपि नैकं वेदान्तिस्य मन्तुपदेशेन संमतो यमर्थ इति न कश्चिद्विवाद
इति यद्वि मननादेः पूर्वमुत्पन्नज्ञानं परोक्षमेव तेनाप्रतिबद्धत्वकृतगौरवमिति मतमाद्रियते तथापि श्रवणादिभिः मनःसंस्कारे सिद्धे अव्यवहितोत्तर
मात्मदर्शनसंभवात् तदुत्तरं वाक्यस्मरणादिकल्पने महद्गौरवापादकमेव तत्तु न वयं केवलेन तर्केण शाब्दजन्यज्ञानस्यापरोक्षत्वमसदाम किंतु कृत्स्ना
पि तथाहि तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतावौपनिषदत्वं पुरुषस्योपनिषज्जन्यबुद्धिविषयत्वमात्रं न प्रत्यक्षादिगम्यत्वे औपनिषदत्वव्यवहारा
पत्तेः यथाहि द्वादशकपालेष्वष्टानां कपालानां सत्त्वेपि द्वादशसंख्याकानामष्टाकपालादिव्यवहाराः यथा वा द्विपुत्राणामेकपुत्रादिव्यवहारः तथात्रा
पि नान्यत्र तथाव्यवहार इति उपनिषन्मात्रगम्यत्वमेव मत्वर्थार्थः तत्र मनोगम्यत्वेनुपपन्नमिति चेन्न नहि त्वयैवोपनिषद्भिन्नं तर्ककारणत्वेन
व्यावर्त्यते शाब्दापरोक्षवादिना तयापि आत्मापरोक्षे मनआदीनां कारणत्वस्यांगीकारात् किंतु पुराणादिशास्त्रांतरमेव श्रोतव्यः श्रुतिवाक्येभ्यः

इतिस्मरणात्तस्यचार्थोनमार्पितंमनसइतिनकिंचिदेतत् प्रमाणांतरव्याहतौतात्पर्यकल्पनंचात्मापरोक्षेशब्दस्यप्रमाणत्वेसिद्धेऽवक्लृप्तमुचितं शब्दांतरव्या
हतितात्पर्यंतुश्रुत्यादिसिद्धंनतत्त्वात्कल्प्यपितुमुचितमेव ऽवास्थितेमनसैवानुद्रष्टव्यंमनसैवेदमाप्तव्यमित्यादिश्रुतयोव्याजत्वेनप्रतिपादिताभवेयुः यत्तु
कैश्चिदुक्तंदर्शनशक्तिंप्रतिमनोमात्रस्योपादानत्वपरतयाताःश्रुतयोनविरुध्यंतइति तदपीदविचारासहंयतःप्रमाणाकांक्षायांप्रवृत्ताःकथमुपादान
पराभवेत् सकामःसंकल्पोविचिकित्सेत्यादिश्रुत्यासावधारणयासर्वासांवृत्तीनांमनोमात्रोपादानकत्वबोधिते आकाशाभावेनोपादानतात्पर्यकत्वे
नवर्णयितुंकथंशक्येरन् पूर्वद्वितीयवल्याप्रणवस्यब्रह्मबोधकत्वेनोक्तेस्तस्याप्यपरोक्षहेतुत्वमितिशंकानिवारणेपितुमनसैवानुद्रष्टव्यमित्यादिसावधा
रणवाक्यानीत्येवंवर्णयितुंशक्यानिस्युरित्यलमतिवाग्जालेन वस्तुतस्तुयोगिनांसमाधौस्वविप्रकृष्टपदार्थज्ञानंसर्वज्ञत्वप्रसिद्धंनपरोक्षंतदानीं
परोक्षसामग्र्यभावात् नापिस्मरणंतेषांपूर्वविशिष्याननुभवात् नापिसुखादिज्ञानवत्साक्षिरूपंअपितिप्रांतात् नापिस्मरणंतेषांपूर्वविशिष्या
ननुभवात् नापिसुखादिज्ञानवत्साक्षिरूपंअपितिप्रांतात् नाप्यप्रमाणकंप्रमाणसामान्यकरणनियमात् नापिचक्षुरादिजन्यंतेषामसंनिकर्षा
त्ः तस्मान्मानसिकिप्रमैवसावाच्येतिमनइंद्रियत्वंप्रमाणत्वंचदुरपह्नवमेवेति येपियोगकल्पोःसडवयंकल्पयंतितेषामपिपूर्वोक्तदूषणावगणात्
दवस्थराव तस्मात्योगजन्यसंस्कारसंचिवमनोमात्रगम्यआत्मेतिसिद्धं नचकामिनीभावयतोव्यवहितकामिनीसाक्षात्कारस्येवभावनाजन्यत्वेनात्मसाक्षा
त्कारस्याप्रमात्वप्रसंगःअबाधितविषयत्वात्दोषजन्यत्वाभावाच्च कामिनीसाक्षात्कारस्यतुबाधितविषयत्वाद्दोषजन्यत्वाच्चाप्रमात्वंनभावनाजन्य
त्वात् नचभावनासमाधेर्ज्ञानजनकत्वेप्रमाणांतरापातःतस्यामनःसहकारित्वात्प्रमाणनिरूपणनिपुणैर्नैयायिकादिभिरपियोगजप्रत्यक्षस्या
लौकिकप्रत्यक्षेन्तर्भावःउक्तःयोगजालौकिकसंनिकर्षेणयोगिनोव्यवहितविप्रकृष्टसूक्ष्मार्थमात्मानमपियथार्थंपश्यंति तथाचपातंजलेसूत्रे

ऋतंभरातत्रप्रज्ञा॰ श्रुतानुमानप्रज्ञाभ्यामन्यविषयाविशेषार्थत्वात् तत्रसमाधियाप्रज्ञासा ऋतंसत्यमेवधृत्वयाथार्थ्यंविभर्त्तीतिऋतंभरेतिप्रथमसूत्रार्थः स
माधिप्रज्ञाश्रुतानुमानप्रज्ञाभ्यांश्रुतंश्रवणंशाब्दबोधःअनुमननंअनुमानयौक्तिकंज्ञानं तद्रूपप्रज्ञाभ्यांअन्यविषयाअतिरिक्तविषया कुतःविशेषार्थत्वात्
विशेषोनिर्विकल्पोर्थोविषयोयस्यास्तातथातस्याभावस्तथा त्वंतस्मात्शब्दस्यपदार्थतावच्छेदकपुरस्कारेणैवानुमानस्यव्यापकतावच्छेदकपुरस्कारेणै
वधिजनकत्वनियमेनतद्ग्रहणायोग्यविशेष्यमात्रपरत्वात् इत्यर्थः अत्रपादद्वयपरंमूलभाष्यं श्रुतमागमविज्ञानंतत्सामान्यविषयं नह्यागमेनशक्योवि
शेषोभिधातुं कस्मात्नहिविशेषेणकृतसंकेतःशब्दइत्यारभ्यसमाधिप्रज्ञानिर्ग्राह्यःसविशेषोभूतसूक्ष्मगतोवापुरुषगतोवेति योगविज्ञानतिष्ठो विर
क्तोपिधर्मज्ञोपिजितेंद्रियः विनायोगेनदेवोपिनमोक्षंलभतेप्रिये किंचतदेवसक्तःसहकर्मणैतिलिंगंमनोयत्रनिषक्तमस्येतिश्रुतेः कारणंगुणसंगोस्य
सदसद्योनिजन्मसु इतिस्मृतेश्चदेहावसानसमयेयत्रगुणगृद्धोभवतितामेवयोनिंजीवःप्राप्नोतीतियोगहीनस्यजन्मांतरस्यादेवः मरणसमयेस
मुग्धस्यवैक्लव्यस्यायोगिनाधारयितुमशक्यत्वात् तदुक्तंयोगबीजे देहावसानसमयेचित्तेयद्यद्विभावयेत् तत्तदेवभवेज्जीवइत्येवंजन्मकारणं देहांते
किंभवेज्जन्मतन्नजानंतिमानवाः तस्माज्ज्ञानंचवैराग्यंजनयश्चकेवलंश्रमः पिपीलिकायदालग्नादेहेज्ञानाद्विमुच्यते असौकिंवृश्चिकैर्दष्टोदेहान्तेवाकथं
सुखी योगिनांतुयोगबलेनांतकालेप्यात्मभावनयामोक्षएवेतिनस्याज्जन्मांतरं तदुक्तंभगवता॰ प्रयाणकालेमनसाचलेनभक्त्यायुक्तोयोगबलेन
चैवेत्यादिना शतंचैकाचहृदयस्यनाड्यइत्यादिश्रुतेश्च ननुतत्त्वमस्यादिवाक्यस्यापरोक्षज्ञानजनकत्वेनविचारस्यवैयर्थ्यमेवेतिशंक्यंवाक्यविचा
रजन्यज्ञानस्ययोगद्वारापरोक्षज्ञानसाधनत्वात् अतएवयोगबीजेगौरिश्वरसंवादेमहाज्ञानिनतः किंचित्सिध्यते देव्युवाच ज्ञानिनस्तुमृतायेवै
तेषांभवतिकीदृशी गतिःकथयदेवेशकारुण्यामृतवारिधे इश्वरउवाच देहांतेज्ञानिनांपुण्यात्पापात्फलमाप्यते यादृशंतुभवेत्तत्तद्भुक्त्वाज्ञा

40

राम:
४९

नीपुनर्भवेत् पश्चात्पुण्येन लभते सिद्धेन सहसंगतिं ततः सिद्धस्य कृपया योगी भवति नान्यथा ततो नश्यति संसारो नान्यथा शिवभाषितं देव्युवाच ज्ञा
नादेहि मोक्षं वदंति ज्ञानिनंतरा नकथं सिद्धियोगेन योगः किं मोक्षदो भवेत् ईश्वर उवाच ज्ञानेनैव हि मोक्षो हि तेषां वाक्यं तु नान्यथा सर्वे वदंति खड्गेन
जयो भवति तर्हि किं विना युद्धेन वीर्येण कथं जयमवाप्नुयात् तथा योगेन रहितं ज्ञानं मोक्षाय नो भवेत् ननु जनकादीनां योगमंतरेणाप्यप्रतिबद्धज्ञान
मोक्षयोः श्रवणात्कथं योगादेवाप्रतिबद्धज्ञानमोक्षभागीति चेदुच्यते तेषां पूर्वजन्मानुष्ठितयोगसंस्कारादज्ञानप्राप्तिरिति पुराणेषूच्यते तथाहि
जैगीषव्यो यथा विप्रो यथा चैवासितादयः क्षत्रिया जनकाद्याश्च तुलाधारादयो विशः संप्राप्ताः परमां सिद्धिं पूर्वाभ्यस्तयोगतः धर्मव्याधादयः
सप्तशूद्राः पैलवकादयः मैत्रेयी सुलभा शार्ङ्गी शांडिली च तपस्विनी एते चान्ये च बहवो नीचयोनिगता अपि ज्ञाननिष्ठा परां प्राप्ताः पूर्वाभ्यस्तस्व
योगतः इति किंच पूर्वजन्मानुष्ठितयोगाभ्यासपुण्यतारतम्येन केचिद्ब्रह्मत्वे केचिद्ब्रह्मपुत्रत्वे केदेवर्षित्वं केचिद्ब्रह्मर्षित्वं केचिन्मुनित्वं केचिद्रूप
त्वं च प्राप्ताः संतस्तत्रोपदेशमंतरेणैवात्मसाक्षात्कारवंतो बभूवुः यथा हिरण्यगर्भवसिष्ठनारदसनत्कुमारवामदेवशुकादयो जन्मसिद्धा इत्येवपु
राणादिषु श्रूयते यत्तु ब्राह्मणस्य मोक्षाधिकारिति श्रूयते पुराणादौ तद्योगिपरं तदुक्तं गरुडपुराणे योगाभ्यासो नृणां येषां नास्ति
जन्मांतरादतो योगस्य प्राप्तये तेषां शूद्रवैश्यादिकः क्रमः स्त्रीत्वाच्छूद्रत्वमभ्येति ततो वैश्यत्वमाप्नुयात् ततश्च क्षत्रियो विप्रः क्रियाहीनस्ततो
भवेत् अनुष्ठानस्ततो पश्चात्कर्मन्यासी ततः परं ततो ज्ञानित्वमभ्येति योगी मुक्तिं क्रमाल्लभेदिति शूद्रवैश्यादिक्रमात् योगीभूत्वा मुक्तिं
लभेदित्यर्थः इत्थं योगे सर्वाधिकारश्रवणाद्योगोपपन्नतत्त्वज्ञानेन सर्वस्य मुच्यत इति सिद्धं योगिनस्तु शूद्रस्यापि न शूद्रादिक्रमः श्रुतीनां
श्रीमतां गेहे योगभ्रष्टोभिजायते अथ योगिनामेव त्यादिभगवद्वचनादित्यलं १५ प्राणमनसोःस्थैर्यं विना मोक्षो नास्तीत्युक्तं तत्र प्राण

लपेनमनसोपिलपासिध्पसोनिनिमनुपरितिमाहु।

प्राणमनसोर्लयं विना मोक्षो नास्तीत्युक्तं तत्र प्राणलयेन मनसोपि लयः सिध्यतीति तदुपायमाह ज्ञात्वेति सदैव सर्वदैव सुस्थाने शोभने स्थाने सुराज्ये धार्मिके देशे इत्याद्युक्तलक्षणे स्थित्वा स्थितिं कृत्वा वा स्थितिं कृत्वेत्यर्थः सुषुम्णाया मध्यनाडी तस्याः सद्भेदं शोभनं भेदनप्रकारं ज्ञात्वा गुरुमुखाद्विदित्वा वायुं प्राणं मध्यगं मध्यनाडीसंचारिणं कृत्वा ब्रह्मरंध्रे मूर्द्धावकाशे निरोधयेत् नितरां रुद्धं कुर्यात् प्राणस्य ब्रह्मरंध्रे निरोधो लयः प्राणलये जाते मनोपि लीयते तदुक्तं वार्तिके अभ्यासेन परिस्पंदे प्राणानां क्षयमागते मनः प्रशममायाति निर्वाणमवशिष्यत इति प्राणमनसोर्लये तत्तद्भावनाविशेषरूपसमाधिसहकृतेनांतःकरणेनाबाधितात्मसाक्षात्कारो भवति तदा जीवन्मुक्तः पुरुषो भवति १६ प्राणलये काललयो भवतीत्याह सूर्याचंद्रमसाविति सूर्यश्च चंद्रमाश्च सूर्याचंद्रमसौ देवताद्वंद्वे चेत्यानङ् रात्रिश्च दिवा च रात्रिंदिवं अचतुरेत्यादिना निपातितः रात्रिंदिवं आत्मा स्वरूपं यस्य सः रात्रिंदिवात्मकः तं रात्रिंदिवात्मकं कालं समयं धत्तो विधत्तः कुरुतः सुषुम्ना सरस्वती कालस्य सूर्याचंद्रमसोभ्यां कृतस्य रात्रिंदिवात्मकस्य समयस्य भोक्त्री भक्षिका विनाशिका एतत्तु गुह्यं रहस्यं उदाहृतं कथितं अयं भावः सार्द्धघटिकाद्वयं सूर्यो भवति सार्द्धघटिकाद्वयं चंद्रो वहति यदा सूर्यो वहति तदा दिनमुच्यते यदा चंद्रो वहति तदा रात्रिरुच्यते पंचघटिकामध्ये रात्रिंदिवात्मकः कालो भवति लौकिकाहोरात्रमध्ये योगिनां द्वादशाहोरात्रात्मकः कालव्यवहारो भवति तादृशकालमानेन जीवनामायुर्गणनाति यदा सुषुम्णामार्गेण ब्रह्मरंध्रे वायुर्लीनो भवति तदा रात्रिंदिवात्मकस्य कालस्याभावादुक्तं भोक्त्री सुषुम्णा कालस्येति यावद्ब्रह्मरंध्रे वायुर्लीयते तावद्योगी न आयुर्वर्द्धते दीर्घकालाभ्यस्तसमाधिर्योगी पूर्वमेव मरणकालं ज्ञात्वा ब्रह्मरंध्रे वायुं नीत्वा कालं निवारयति स्वेच्छया देह

ज्ञात्वा सुषुम्नासद्भेदं कृत्वा वायुं च मध्यगं स्थित्वा तदैव सुस्थाने ब्रह्मरंध्रे निरोधयेत् १६
सूर्याचंद्रमसौ धत्तः कालं रात्रिंदिवात्मकं भोक्त्री सुषुम्णा कालस्य गुह्यमेतदुदाहृतं १७

त्यागंवकरोतानि ०

द्वासप्ततीति पंजरे पंजरवन्नशिरास्थिभिर्बद्धे शरीरे द्वाभ्यामधिका सप्ततिर्द्वासप्ततिः द्वासप्ततिसंख्यानि सहस्राणि द्वासप्ततिसहस्राणि नाडीनां शिराणां द्वारा
णि वायुप्रवेशमार्गाः संति सुषुम्णा मध्यनाडी शांभवी शक्तिरस्ति शं सुखं भवत्यस्माज्ज्ञानादिति शंभुरीश्वरस्तस्यायं शांभवी ध्यानेन शंभुप्रापकत्वात् शंभो
राविर्भावजनकत्वाद्वा शांभवी यद्वा शं सुखरूपो भवति तिष्ठतीति शंभुरात्मा तस्येयं शांभवी चिदभिव्यक्तिस्थानत्वात् ध्यानेनात्मसाक्षात्कारहेतुत्वाच्च
शेषा इडापिंगलाद्यस्तु निरर्थकाः सर्वा निर्गतोऽर्थः प्रयोजनं याभ्यस्ता निरर्थकाः पूर्वोक्तप्रयोजनाभावात् १८ वायुरिति यस्मात्परिचितोभ्यस्तो वायुः तस्मा
दग्निना जठराग्निना सह कुंडलीं शक्तिं बोधयित्वा अनिरोधतः अप्रतिबंधात् सुषुम्णायां सरस्वत्यां प्रविशेत् वायोः सुषुम्णाप्रवेशार्थमभ्यासः कर्तव्य

द्वासप्ततिसहस्राणि नाडिद्वाराणि पंजरे सुषुम्णा शांभवी शक्तिः शेषास्त्वेव निरर्थकाः १८ वायुः परिचितो यस्मादग्निना सह कुंडलीं
बोधयित्वा सुषुम्णायां प्रविशेदनिरोधतः १९ सुषुम्णावाहिनी प्राणे सिध्यत्येव मनोन्मनी अन्यथा त्वितराभ्यासाः प्रयासायैव यो
गिनां २० पवनो बध्यते येन मनस्तेनैव बध्यते मनश्च बध्यते येन पवनस्तेन बध्यते २१ हेतुद्वयं तु चित्तस्य वासना च समीरणः

इत्यर्थः १९ सुषुम्णेति प्राणे सुषुम्णावाहिनि सति मनोन्मनीऽमन्यवस्था सिध्यत्येव अन्यथा प्राणे सुषुम्णावाहिन्यसति इतराभ्यासाः सुषु
म्नेतराद्यभ्यासाः योगिनां योगाभ्यासिनां प्रयासायैव श्रमायैव भवंतीत्यर्थः २० पवन इति येन योगिना पवनः प्राणवायुर्बध्यते बद्धः क्रियते तेनै
व योगिना मनः बध्यते येन मनः बध्यते तेन पवनः पवनयोरेकतरबंधेऽपरबंधः भवतीत्यर्थः २१ हेतुद्वयं तु चित्तस्येति चित्तस्य प्रवृत्तौ हेतुद्वयं कारणा
द्वयमस्ति किं तदित्याह वासना भावनाख्याः संस्काराः समीरणः प्राणवायुश्च तयोर्वासनासमीरणयोः एकस्मिन्नष्टे सति क्षीणे सति तौ द्वावपि
विनश्यतः अयमाशयः वासनाक्षये समीरणचित्ते क्षीणे चित्तवासने क्षीणे भवतः चित्तक्षीणे समीरणवासने क्षीणे भवतः तदुक्तं वासिष्ठे

42

राम
४३

द्वेबीजेरामचित्तस्यप्राणस्पंदनवासने एकस्मिंश्चतयोर्नष्टेक्षिप्रंद्वेअपिनश्यतः तत्रैवव्यतिरेकेणोक्तं यावद्विलीनंनमनोनतावद्वासनाक्षयः नक्षीणा
वासनायावच्चित्तंतावन्नशाम्यति नयावत्तत्वविज्ञानंनतावच्चित्तसंक्षयः यावन्नचित्तोपशमोनतावत्तत्ववेदनं यावन्नवासनानाशस्तावत्तत्वागमः कुतः
यावन्नतत्वसंप्राप्तिर्नतावद्वासनाक्षयः तत्वज्ञानंमनोनाशोवासनाक्षयएवच मिथःकारणतांगत्वादुःसाध्यानिस्थितान्यतः त्रयस्तेसमंयावन्नत्वभ्य
स्तामुहुर्मुहुः तावन्नतत्वसंप्राप्तिर्भवत्यपिसमाशतैः मनइति यत्रयस्मिन्नाधारेमनःविलीयेतपवनस्तत्रतस्मिन्नाधारेलीयते यत्रयस्मिन्नाधारे
पवनोलीयतेतत्रतस्मिन्नाधारेमनःविलीयतइत्यन्वयः २३ दुग्धांबुवदिति दुग्धांबुवत्क्षीरनीरवत् संमिलितौसम्यक्मिलितौतौउभौद्वावपिमान

तयोर्विनष्टएकस्मिंस्तौद्वावपिविनश्यतः २२ मनोयत्रविलीयेतपवनस्तत्रलीयते पवनोलीयते यत्रमनस्तत्रविलीयते २३ दुग्धांबुवत्संमिलि
तावुभौतौतुल्यक्रियौमानसमारुतौहि यतोमरुत्तत्रमनःप्रवृत्तिर्यतोमनस्तत्रमरुत्प्रवृत्तिः २४ तत्रैकनाशादपरस्यनाशः
एकप्रवृत्तेरपरप्रवृत्तिः अध्वस्तयोश्चेंद्रियवर्गवृत्तिः प्रध्वस्तयोर्मोक्षपदस्यसिद्धिः २५

समारुतौमानसंचमारुतश्चमानसमारुतौचित्तप्राणौतुल्यक्रियौतुल्यासमाक्रियाप्रवृत्तिर्ययोस्तादृशौभवतः तुल्यक्रियात्वमेवाह यतइति य
तःयत्रसार्वविभक्तिकस्तसिः यस्मिंश्चक्रेमरुद्वायुःप्रवर्ततेतत्रतस्मिंश्चक्रेमनःप्रवृत्तिःमनसःप्रवृत्तिर्भवति यतःयस्मिंश्चक्रेमनःप्रवर्ततेतत्रत
स्मिंश्चक्रेमरुत्प्रवृत्तिः मरुतःवायोःप्रवृत्तिर्भवति तदुक्तंवासिष्ठे अविनाभाविनीनित्यंजंतूनांप्राणचेतसी कुसुमामोदवन्मिश्रेतिलतैलेइवस्थिते
कुरुतश्चविनाशेनकार्यंमोक्षाख्यमुत्तममिति २४ तत्रेति तत्रतयोर्मानसमारुतयोर्मध्येएकस्यमानसस्यमारुतस्यवानाशात्क्षयात् अपरस्य

अन्यस्यमारुतस्यमानसस्यवानाशोलयोभवति एकप्रवृत्तेःएकस्यमानसस्यमारुतस्यवाप्रवृत्तेर्व्यापारात् अपरप्रवृत्तेःअपरस्यमारुतस्यमानसस्यवाप्रवृत्तिर्व्यापारोभवति अध्वस्तयोःअलीनयोर्मानसमारुतयोःसतोःइंद्रियवर्गवृत्तिःइंद्रियसमुदायस्यस्वस्वविषयेप्रवृत्तिर्भवति प्रध्वस्तयोःप्रलीनयोस्तयोःसतोर्मोक्षपदस्यमोक्षाख्यपदस्यसिद्धिर्निष्पत्तिर्भवति तयोर्लयेपुरुषस्यस्वस्वरूपेवस्थानादित्यर्थः तत्रापिसाध्यःपवनस्यनाशःषडंगयोगादिनिषेवणेन मनोविनाशस्तुगुरुप्रसादान्निमेषमात्रेणसुसाध्यएवयोगवासिष्ठेमूलश्लोकस्यायमन्तरश्लोकः २५ रसस्येति रसस्यपारदस्यमनसोमानसस्यचस्वभावतःस्वभावात्चंचलत्वंचाचल्यमस्ति रसःपारदोबद्धश्चेत् मनश्चित्तंबद्धंचेत्भूतलेपृथिवीतलेकिंनसिध्यतिसर्वंसिध्यतीत्यर्थः २६ तदेवाह मूर्छितइति ओषधीविशेषयोगेनग

रसस्यमनसश्चैवचंचलत्वंस्वभावतः रसोबद्धोमनोबद्धंकिंनसिध्यतिभूतले २६ मूर्छितोहरतेव्याधीन्मृतोजीवयतिस्वयं बद्धःखे
चरतांधत्तेरसोवायुश्चपार्वति २७ मनःस्थैर्येस्थिरोवायुस्ततोबिंदुःस्थिरोभवेत् बिंदुःस्थैर्यात्सदासत्वंपिंडस्थैर्यंप्रजायते २८

तचापल्योरसमूर्छितःइत्युच्यते हेपार्वतीतिपार्वतीसंबोधनंश्रवणार्थं मूर्छितोरसःपारदःवायुःप्राणश्चव्याधीन्रोगान्हरतेनाशयति भस्मीभूतोरसोब्रह्मरंध्रेलीनोवायुश्चमृतःस्वयमात्मनात्वयत्तासामर्थ्येनेत्यर्थः जीवयतिदीर्घकालंजीवनंकरोतिक्रियाविशेषेणगुटिकाकारःकृतोरसोबद्धःभ्रूमध्यादौधारणाविशेषेणधृतोवायुर्बद्धः खेचरतांआकाशगतिंधत्तेकरोतीत्यर्थः तदुक्तंगोरक्षशतके यद्भिन्नांजनपुंजसंनिभमिदंवृत्तंभ्रुवोरंतरे तत्त्वंवायुमयंयकारसहितंतत्रेश्वरोदेवता प्राणंतत्रविलीयपंचघटिकाश्चित्तान्वितंधारयेदेषाखेगमनंकरोतियमिनांस्याद्वायवीधारणेति २७ मनःस्थैर्यइति मनसःस्थैर्येसतिवायुःप्राणःस्थिरोभवेत् ततोवायुस्थैर्यात्बिंदुर्वीर्यंस्थिरोभवेत् बिंदोःस्थैर्यात्सदासर्वदासत्वंबलंपिंडस्थैर्यंदेहस्थैर्यंप्रजायते २८

इंद्रियाणामिति इंद्रियाणांश्रोत्रादीनांमनोंतःकरणंनाथःप्रवर्तकःमनोनाथोमनसोनाथःमारुतःप्राणःमारुतस्यप्राणस्यलयोमनोविलयोनाथःसलयो
मनोलयोःनादआश्रितःनादेमनोलीयतइत्यर्थः २९ सोयमिति सोयमेवास्त्वेतल्लयमेवमोक्षाख्यःमोक्षपदवाच्यः मतांतरेअन्यमतेमास्तुवा चित्तलय
स्यसुषुप्तावपिसत्वात्मनःप्राणयोर्लयेसतिकश्चिदनिर्वाच्यःआनंदःसंप्रवर्तते सम्यक्प्रवृत्तोभवतिअनिर्वाच्यानंदाविर्भावेजीवन्मुक्तिसुखंभवत्येवेति
भावः ३० प्रनष्टेति श्वासश्चनिश्वासश्चश्वासनिश्वासौप्रनष्टौप्रनीनौश्वासनिश्वासौयस्मिन्सः तथाबाह्यस्यवायोरंतःप्रवेशनंश्वासः अंतःस्थित
स्यवायोर्बहिर्निःसारणंनिश्वासः प्रध्वस्तःप्रकर्षेणध्वस्तोनष्टोविषयाणांशब्दादीनांग्रहोग्रहणंयस्मिन् निर्गताचेष्टाकायक्रियायस्मिन्निर्गतोविकारों

इंद्रियाणांमनोनाथोमनोनाथस्तुमारुतः मारुतस्यलयोनाथःसलयोनादमाश्रितः २९ सोयमेवास्तुमोक्षाख्योमास्तुवापिमतांतरे मनःप्रा
णलयेकश्चिदानंदःसंप्रवर्तते ३० प्रनष्टःश्वासनिःश्वासप्रध्वस्तविषयग्रहः निश्चेष्टोनिर्विकारश्चलयोजयतियोगिनां ३१ उच्छिन्नसर्व
संकल्पोनिःशेषाशेषचेष्टितः स्वावगम्योलयःकोपिजायतेवागगोचरः ३२ यत्रदृष्टिर्लयस्तत्रभूतेंद्रियसनातनी साशक्तिर्जीवभूतानांद्वे

तःकरणक्रियायस्मिन् एतादृशोपियोगिनांलयोंतःकरणस्यध्येयाकारापत्तिर्जयतिसर्वोत्कर्षेणवर्तते ३१ उच्छिन्नेति उच्छिन्नानष्टाःसर्वेसंक
ल्पाःमनःपरिणामाःयस्मिन्सःतथा निर्गतःशेषोयेभ्यस्तानिनिःशेषाणिअशेषचेष्टितानियस्मिन्सतथास्वेनैवअवगंतुंशक्यःस्वावगम्यः
वाचामगोचरोऽविषयःकोपिविलक्षणोलयःजायतेयोगिनांप्रादुर्भवति ३२ यत्रदृष्टिरिति यत्रयस्मिन्विषयेब्रह्मणिदृष्टिरंतःकरणवृत्तिस्त
त्रैवलयोभवति भूतानिपृथिव्यादीनिइंद्रियाणिश्रोत्रादीनिसनातनानित्रिशाश्वतानियस्यांसासत्कार्यवादेअविद्यायांकार्यजातस्यसत्वात् जी
वभूतानांप्राणिनांशक्तिरविद्याद्वेअलक्ष्येब्रह्मणिलयंगतेयोगिनामितिशेषः ३३

लयइति लयःलयइतिप्राहुःवदंतिवृद्धाःलयस्यलक्षणंलयस्वरूपंकीदृशंइतिप्रश्नपूर्वकंलयस्वरूपमाह अपुनरिति अपुनर्वासनोत्थानात्पुनर्वासनोत्थानाभावाद्वि
षयविस्मृतिः विषयाणांशब्दादीनांध्येयाकारेणस्यविषयस्यवाविस्मृतिर्लयः लयशब्दार्थइत्यर्थः ३४ वेदेति वेदाश्चत्वारःशास्त्राणिषट्पुराणान्यष्टादशसामान्यगणिका
इववेश्याइव बहुपुरुषगम्यत्वात्एकाशांभवीमुद्रैवकुलवधूरिवकुलस्त्रीवगुप्ता पुरुषविशेषगम्यत्वात् ३५ चित्तलयास्याप्राणालयसाधनीभूतमुद्राविवक्षत्वेनशांभवी
मुद्रामाह अंतर्लक्ष्यमिति अंतःआधारादिब्रह्मरंध्रांतेषुचक्रेषुमध्येस्वाभिमतेचक्रेलक्ष्यंअंतःकरणस्यबहिर्देहाद्बहिःप्रदेशेदृष्टिश्चक्षुःसंबंधःकीदृशीदृष्टिः निमेषोन्मेष
वर्जितानिमेषपक्ष्मसंयोगःउन्मेषपक्ष्मसंयोगविश्लेषःताभ्यांवर्जितारहिताचित्तस्यध्येयाकारावेशेनिमेषोन्मेषवर्जितादृष्टिर्भवति साउक्ताएषामुद्राशांभवीशंभोरियंशां

लयोलयइतिप्राहुःकीदृशंलयलक्षणं अपुनर्वासनोत्थानाल्लयोविषयविस्मृतिः ३४ वेदशास्त्रपुराणानिसामान्यगणिकाइव
एकैवशांभवीमुद्रागुप्ताकुलवधूरिव ३५ अंतर्लक्ष्यंबहिर्दृष्टिर्निमेषोन्मेषवर्जिता एषासाशांभवीमुद्रावेदशास्त्रेषुगोपिता ३६
अंतर्लक्ष्यविलीनचित्तपवनोयोगीयदावर्ततेदृष्ट्यानिश्चलतारयाबहिरधःपश्यन्नपश्यन्नपि।

भवीशिवप्रियाशिवाविर्भावजनिकावाभवति कीदृशीवेदशास्त्रेषुगोपितावेदेषुअवादिषुशास्त्रेषुसांख्ययोगपातंजलादिषुगोपितारक्षिता ३६ शांभवीमुद्रामभिनी
यदर्शयति अंतर्लक्ष्यइति यदायस्यामवस्थायांअंतःअनाहतपद्मादौयल्लक्ष्येसगुणेश्वरमूर्त्यादिकं तत्त्वमस्यादिवाक्यलक्ष्यंजीवेश्वराभिन्नमहं ब्रह्मास्मीतिवाक्या
र्थभूतंब्रह्मवा तस्मिन्विलीनोविशेषेणलीनौचित्तपवनौमनोमारुतौयस्यसतथायोगीवर्तते निश्चलतारयानिश्चलातास्थिरातारकनीनिकायस्यांतदृष्ट्या
बहिर्देहाद्बहिःप्रदेशेपश्यन्नपिचक्षुःसंबंधंकुर्वन्नपिअपश्यन्बाह्यविषयग्रहणमकुर्वन् वर्ततेआस्तेखल्वितिवाक्यालंकारेइयमुक्ताशांभवीमुद्राशांभवीनामि
कामुद्रयतिक्लेशानितिमुद्राभवति साशांभवीमुद्रागुरोर्देशिकस्यप्रसादात्प्रीतिपूर्वकादनुग्रहाल्लब्धाप्राप्ताप्रागिदमितिवक्तुमशक्यंशांभवंभवाइदंशांभवंशांभवीमु

द्रयाभासमानंपदं पद्यतेगम्यतेयोगिभिरितिपदमात्मस्वरूपंशून्याशून्यविलक्षणंध्येयाकारवृत्तेःसद्भावात् शून्यविलक्षणंतस्याअपिभानाभावाच्छून्यविलक्षणंतत्वं
वास्तविकंवस्तुस्फुरतिप्रतीयते ३७ श्रीशांभव्याइति श्रीशांभव्याश्रीमत्याःशांभवीमुद्रायाःखेचर्याःखेचरीमुद्रायाश्चअवस्थाधामभेदःअवस्थावस्थितिःधामस्थानंदे
शः तयोर्भेदात् शांभव्यावहिर्दृष्ट्यावस्थितिः खेचर्याभ्रूमध्यदृष्ट्याऽवस्थितिः शांभव्यांहृदयंभावनादेशःखेचर्यांभ्रूमध्यस्वदेशःतयोर्भेदाभ्यांशून्येदेशकाल
वस्तुपरिच्छेदशून्ये सजातीयविजातीयगतभेदशून्येवा चित्सुखरूपिणीचिदानंदस्वरूपिणीआत्मनी चित्तलयानंदचित्तलयादानंदःभवेत्स्यात् श्रीशां

मुद्रेयंखलुशांभवीभवतिसालब्धाप्रसादाद्गुरोःशून्याशून्यविलक्षणंस्फुरतितत्तत्त्वंपदंशांभवं ३७ श्रीशांभव्याश्चखेचर्याअ
वस्थाधामभेदतः भवेच्चित्तलयानंदःशून्यचित्सुखरूपिणी ३८ तारेज्योतिषिसंयोज्यकिंचिदुन्नमयेद्भ्रुवौ पूर्वयोगंमनोयुं
जंन्नुन्मनीकारकःक्षणात् ३९ केचिदागमजालेनकेचिन्निगमसंकुलेः केचित्तर्केणमुह्यंतिनैवजानंतितारकं ४०

भवीखेचर्योरवस्थाधामरूपसाधनांशेभेदः नतुचित्तलयानंदरूपफलांशइतिभावः ३८ उन्मनीमुद्रामाह तारेइति तारेनेत्रयोकनीनिकेज्योतिषिता
रयोर्नासाग्रेयोजनात्मकासमानेनेजक्षिप्तसंयोज्यसंयुक्तंकृत्वा भ्रुवोःकिंचित्स्वल्पंउन्नमयेत्ऊर्ध्वंनमयेत् पूर्वःपूर्वोक्तःअंतर्लक्ष्यंवहिर्दृष्टिरित्याकार
कः योगोयुक्तिर्यस्मिन् तत्तादृशंमनान्तकरणं युंजन्युक्तंकुर्वन्योगीक्षणात्मुहूर्तात्उन्मनीकारकःउन्मन्यवस्थाकारकोभवति ३९
उन्मनीमंतरायत्सरणोपायोनास्तीत्याह केचिदिति केचित्सात्वतंत्रादिविदःआगछंतिबुद्धिमारोहंत्यर्थाअस्मादित्यागमा सात्वतंत्रादयस्तेषां

हठप्र
४६

जालैर्जालवद्बंधनसाधनैस्तत्तुच्छैः फलैः मुह्यंति मोहं प्राप्नुवंति तत्रासक्ता वध्यंत इति भावः केचिद्वैदिकाः निगमसंकुलैः निगमानां निगमोक्तानां संकुलैः
:फलबाहुल्यैर्मुह्यंति केचिद्वैनाशिकादयः तर्केण स्वकल्पयुक्तिविशेषेण मुह्यंति तारयतीति तारकः तं तारकं तरणोपायं नैव जानंति उक्तोन्मन्येव तरणो
पायस्तं न जानंतीत्यर्थः ४० अर्धोन्मीलितेति अर्द्धं उन्मीलिते उर्द्धोन्मीलिते अर्द्धोन्मीलिते लोचने येन सः अर्द्धोन्मीलितलोचनः अर्द्धोद्घाटितलोचन इत्यर्थः
स्थिरं निश्चलं मनो यस्य सः स्थिरमनाः नासायाः नाशिकाया अग्रे अग्रभागे नाशिकाया द्वादशांगुलपर्यंते वा दत्ते अर्पिते ईक्षणे नेत्रे येन सः नासाग्रदत्तेक्षणः त
थाह वसिष्ठः द्वादशांगुलपर्यंते नासाग्रे विमलेंबरे संविद्दृशोः प्रशाम्यंत्योः प्राणस्पंदो निरुध्यत इति निस्पंदस्य निश्चलस्य भावो निस्पंदभावः कायेंद्रियमन

अर्द्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षणश्चंद्रार्कावपि लीनतामुपनयन्निस्पंदभावेन यः ज्यो
तीरूपमशेषबीजमखिलं देदीप्यमानं परं तत्त्वं तत्पदमेति वस्तु परमं वाच्यं किमत्राधिकम् ४१

सां निश्चलत्वं तेन चंद्रार्कौ चंद्रसूर्यौ अपि लीनतां लीनस्य भावो लीनता लयः तं उपनयन् प्रापयन् कार्येंद्रियमनसां निश्चलत्वेन प्राणसंचारमपि स्तंभयंनि .45
त्यर्थः तदुक्तं प्राक् मनो यत्र विलीयते इत्यादि एवं उक्तविशेषणसंपन्नो योगी ज्योतिरिति वाखिलप्रकाशकं रूपं यस्य सः तथा तं अशेषबीजं आका
शाप्रपंचनिदानं सर्वकारणं अखिलं पूर्णं देदीप्यमानं अतिशयेन दीप्यत इति देदीप्यमानं तं तथा स्वप्रकाशं परं कार्येंद्रियमनसां साक्षिणं त राम:
त्वमरणारोपितवालविकल्पमित्यर्थः तत्तादृशमिति वक्तुमशक्यं पद्यते योगिभिरिति पदं परमं सर्वोत्कृष्टं वस्तु आत्मस्वरूपं एति प्राप्नोति उन्मन्यवस्थायां स्व ४६
स्वरूपावस्थितो योगी भवतीत्यर्थः अत्र अधिकं किं वाच्यं अपरं वस्तु प्राप्यमित्यत्र किं वक्तव्यमित्यर्थः ४१

उन्मनीभावनायाः कालनियमभावमाह दिवानेति दिवासुर्यसंचारे लिंगं सर्वकारणमात्मानं तस्मात्स्मादात्मादात्मान आकाशः संभूत इत्यादिश्रुतेः नपूजयेत् नभा
वयेत् ध्यानमेवात्मपूजनं तदुक्तं वासिष्ठे ध्यानोपहार एवात्मा ध्यानमस्य महार्चनं विनातेनेतरेणायमात्मालभ्यत एव नो इति रात्रौ चंद्रसंचारे चैव पूजयेन्नैव भाव
येत् चंद्रसूर्यसंचारे चित्तस्थैर्याभावात् चले वाते चलं चित्तमित्युक्तत्वात् दिवारात्रिनिरोधतः सूर्यचंद्रौ निरुध्य ल्यवलोपे पंचमी तस्यास्तसिल् सर्वदा सर्वस्मिन्
काले लिंगमात्मानं पूजयेत् भावयेत् सूर्यचंद्रयोर्निरोधे कृते सुषुम्नायां गतेन मनसः स्थैर्यात् तदुक्तं सुषुम्नां गते वायौ मनःस्थैर्यं प्रजायत इति
४२ खेचरीमाह सव्येति सव्यदक्षिणनाडीस्थो वामनडितरणाडीस्थः मारुतो वायुः यः यत्र मध्ये चरति यस्मिन् मध्यप्रदेशे गच्छति तस्मिन् स्थाने तस्मिन्प्रदेशे

दिवा न पूजयेल्लिंगं रात्रौ चैव न पूजयेत् सर्वदा पूजयेल्लिंगं दिवारात्रिनिरोधतः ४२ अथ खेचरी सव्यदक्षिणनाडिस्थो मध्ये
चरति मारुतः तिष्ठते खेचरी मुद्रा तस्मिं स्थाने न संशयः ४३ इडापिंगलयोर्मध्ये शून्यं चैवानिलं ग्रसेत् तिष्ठते खेचरी मुद्रा
तत्र सत्यं पुनः पुनः ४४ सूर्याचंद्रमसोर्मध्ये निरालंबांतरे पुनः संस्थिता व्योमचक्रे या सा मुद्रा नाम खेचरी ४५

खेचरी मुद्रा प्रतिष्ठते स्थिरा भवति प्रकाशनस्थेयाख्ययोश्चेत्यात्मनेपदं न संशय उक्तेऽर्थे संदेहो नास्तीत्यर्थः ४३ इडापिंगलयोरिति इडापिंगल
योः सव्यदक्षिणनाड्योर्मध्ये यत् शून्यं खं कर्म अनिलं प्राणवायुं यत् ग्रसेत् सूर्ये प्राणस्य स्थिरीभाव एव ग्रसनं तत्र तस्मिन् शून्ये खेचरी मुद्रा तिष्ठते पुनः
पुनः सत्यमिति योजना ४४ सूर्याचंद्रमसोरिति सूर्याचंद्रमसोरिडापिंगलयोर्मध्ये निरालंबं यदंतरमवकाशः तत्र पुनः पादपूरणे व्योम्नां खानां
चक्रे समूहाये भ्रूमध्ये सर्वधारणां समन्वयात् तदुक्तं पंचस्रोतः समन्वितमिति या संस्थिता सा मुद्रा खेचरी नाम ४५ ॥ ४५

Nepal Sanskrit University, Balmiki Campus, Kathmandu

हठप्र
५७

सोमादिति सोमाचंद्राद्यत्रयस्यांखेचर्यांधारामृतधाराउदिताउद्गतासासाखेचरीसाक्षात्शिववल्लभाशिवस्यप्रियेतिरहस्यवादिनः अतुलांनिरुपमांदिव्यां
सर्वश्रेष्ठांसुषुम्नांसुषुम्णांपश्चिमेमुखेपश्चिममार्गेपूरयेत् जिह्वयेतिशेषः ४६ पुरस्ताच्चैवेति पुरस्ताच्चैवपूर्वतोपिपूर्येतसुषुम्णामार्गोजिह्वयेतिशेषः यदितर्हिनिश्चितानाम
संदिग्धाखेचरीमुद्राखेचर्याख्यामुद्राभवतीति यदिपुरस्तान्मार्गेणनपूर्येततर्हिकेवलंमार्गेणपश्चिमतःपूर्येततर्हिमूढावस्थाजायतेकामंनिश्चिताखेचरीतिभावः खे
चरीमुद्राअपिअभ्यस्तासतीउन्मनीसंप्रजायते चित्तस्यध्येयाकारावेशस्यतुर्यावस्थामवस्थाम ४७ भ्रुवोरिति भ्रुवोर्मध्येभ्रुवोरंतरालेशिवस्थानंशिवस्य
ईश्वरस्यस्थानंशितस्यसुखरूपस्यात्मनोवास्थानमितिशेषः तत्रतस्मिन्शिवेनमनोलीयतेशिवाकारवृत्तिप्रवाहवद्भवति तच्चित्तलयस्थानंतुर्यंपदं

सोमाद्यत्रोदिताधारासाक्षात्साशिववल्लभाः पूरयेदतुलांदिव्यांसुषुम्णांपश्चिमेमुखे ४६ पुरस्ताच्चैवपूर्येतनिश्चिताखेचरीभवेत् अ
भ्यस्ताखेचरीमुद्राप्युन्मनीसंप्रजायते ४७ भ्रुवोर्मध्येशिवस्थानंमनस्तत्रविलीयते ज्ञातव्यंतत्पदंतुर्यंतत्रकालोनविद्यते ४८ अभ्य
सेत्खेचरींतावद्यावत्स्याद्योगनिद्रितः संप्राप्तयोगनिद्रस्यकालोनास्तिकदाचनः ४९ निरालंबमनःकृत्वानकिंचिदपिचिंतयेत्

याव
जाग्रत्स्वप्नसुषुप्त्यपेक्षतुर्यावस्थारूपंज्ञातव्यं तत्रतस्मिन्पदेकालोमृत्युर्नविद्यते यद्वासूर्यचंद्रयोर्निरोधादायुःक्षयकारकःकालःसमयोनविद्यतइ
त्यर्थः तदुक्तंभोक्त्रीसुषुम्णाकालस्येति ४८ अभ्यसेदितितावत्खेचरीमुद्रांअभ्यसेत् यावत्योयोगनिद्रितः योगःसर्ववृत्तिनिरोधःसएवनिद्रायोगनिद्रा
अस्यसंजाताइति योगनिद्रितःतादृशःस्यात्संप्राप्तायोगनिद्रायेनसःसंप्राप्तयोगनिद्रस्यकदाचनकस्मिंश्चिदपिसमयेकालोमृत्युर्नास्ति ४९ नि
रालंबमिति यन्निरालंबमालंबनशून्यंमनःकृत्वाकिंचित्अपिनचिंतयेत् खेचरीमुद्रायांजायमानायांब्रह्माकारमपिवृत्तिंपरवैराग्येणपरित्यजेदि
त्यर्थः सयोगीवाह्याभ्यंतरेवायुवहिर्भवेआभ्यंतरभवेआभ्यंतरभवेच्चव्याप्तिआकाशेघटवत्घटइवतिष्ठति ध्रुवंनिश्चितमेतत्यथाकाशेघटोवहिरं

46
योगः
५७

रं तथाकाशपूर्णो भवति तथा खेचर्या आलंबनपरित्यागेन योगी ब्रह्मस्मरणात्पूर्णस्तिष्ठतीत्यर्थः ५० बाह्येति बाह्यो देहाद्बहिर्भवो वायुर्यथा लीनो भवति खेचर्या निस्पांतः प्रबल्याभ्यवात् न संशयः अस्मिन्नर्थे संदेहो नास्तीत्यर्थः स्वीयेति स्थिरीभूते स्थितिनिति स्थानं मस्यप्रमाणस्य स्थानं स्थैर्यधिस्थानं ब्रह्मरंध्रं तत्र मनसा चित्तेन सह पवनः प्राणः स्थिरतां निश्चलतां एति प्राप्नोति ५१ एवमुक्तप्रकारेण वायुमार्गे प्राणमार्गे सुषुम्णायामित्यर्थः दिवानिशं रात्रिंदिवं अभ्यसमानस्य अभ्यासं कुर्वतो योगिनः अभ्यासात् यस्मिन्नाधारे वायुः प्राणो जीर्यते क्षीयते लीयते इत्यर्थः तत्रैव वायोर्लयाधिष्ठाने मनश्चित्तं लीयते इत्यर्थः ५२ अमृतैरिति अमृतैः सुषिरनिर्गतैः पादतलं च मस्तकं च पादतलमस्तकं देहं च प्रागित्यर्थसेनांगानि सिक्तकवत्प्लाव्य पादतल

सबाह्याभ्यंतरे व्योम्नि घटवत्तिष्ठति ध्रुवं ५० बाह्यवायुर्यथा लीनस्तथा मध्यो न संशयः स्वस्थाने स्थिरतामेति पवनो मनसा सह ५१ एवमभ्यसमानस्य वायुमार्गे दिवानिशं अभ्यासाज्जीर्यते वायुर्मनस्तत्रैव लीयते ५२ अमृतैः प्लावयेद्देहमापादतलमस्तकं सिध्यत्येव महाकायो महाबलपराक्रमः ५३ इति खेचरी शक्तिमध्ये मनः कृत्वा शक्तिं मानसमध्यगं मनसा मन आलोक्य धारयेत्परमं पदं ५४

मस्तकं अपि व्याप्येत्यापादतलमस्तकं देहं आप्लावयेत् आप्लावितं कुर्यात् महान् उत्कृष्टः कायो यस्य सः महाकायः महान्तौ बलबलपराक्रमौ यस्य एतादृशो योगी शीघ्रमेव अमृताप्लावनेन सिद्धो भवत्येव ५३ शक्तीति शक्तिकुंडलिनी तस्या मध्ये मनः कृत्वा तस्या मनो ध्यात्वा तदाकारं मनः कृत्वेत्यर्थः शक्तिं मानसमध्यगां कृत्वा शक्तिध्यानावेशात् शक्तिमनसोरत्यंतैक्यं कृत्वा तेन कुंडलिनीं बोधयित्वेति यावत् प्रबुद्धा वह्नियोगेन मनसा मरुता सहेतियोरस्थोक्तेः मनसा अंतःकरणेन मन आलोक्य बुध्या मनसोवलोकनेन स्थिरीकृत्वेत्यर्थः परमं पदं सर्वोत्कृष्टं स्वरूपं धारयेत् धारणाविषयं कुर्यादित्यर्थः ५४

खमध्य इति खमिव पूर्णं ब्रह्म खं तन्मध्ये आत्मानं स्वस्वरूपं कुरु ब्रह्माहमिति भावयेदित्यर्थ आत्ममध्ये स्वस्वरूपे च खं पूर्णं ब्रह्म कुरु अहं ब्रह्मेति च भावयेत्यर्थः सर्वं च खमयं कृत्वा ब्रह्ममयं विभाव्य किमपि न चीतयत् अहं ब्रह्मेति ध्यानमपि परित्यजेदित्यर्थः ५५ एवं समाहितस्य स्वरूपस्थितिमाह अंतःशून्य इति अंतः अन्तःकरणे शून्यः ब्रह्मातिरिक्तपदार्थाभावाद्वितीयशून्यः बहिरंतःकरणाद्बहिरपि शून्यः द्वितीयादर्शनात् अंबरे आकाशे कुंभो घटो यथांतर्बहिःशून्यस्तद्वत् अंतः अंतःकरणे हृदाकाशे वा पूर्णः ब्रह्माकारवृत्तेः सद्भावात् ब्रह्मव्याप्तत्वाद्बहिः पूर्णः अंतःकरणाद्बहिः हृदवकाशाद्बहिर्वा पूर्णः समंताद्ब्रह्मातिरिक्तपदार्थाभावात् ब्रह्मपूर्णत्वाद्वा अर्णवे समुद्रे कुंभो घटो यथा सर्वतो जलपूर्णो भवत्येवं समाधिनिष्ठो योगी ब्रह्मपूर्णो भवतीत्यर्थः ५६ बाह्यचिंतेति समाहितेन योगि

खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु सर्वं च खमयं कृत्वा न किंचिदपि चिंतयेत् ५५ अंतःशून्यो बहिःशून्यः शून्यकुंभ इवांबरे अंतःपूर्णो बहिःपूर्णः पूर्णःकुंभ इवार्णवे ५६ बाह्यचिंता न कर्तव्या तथैवांतरचिंतनं सर्वचिंतां परित्यज्य न किंचिदपि चिंतयेत् ७ संकल्पमात्रकलनैव जगत्समग्रं संकल्पमात्रकलनैव मनोविलासः संकल्पमात्रमतिमुत्सृज निर्विकल्पमाश्रित्य निश्चयमवाप्नुहि रामशांतिं ५८

ना ह्यस्याहारतत्त्वचिंता बाह्यविषयचिंता न कर्तव्या तथैव बाह्यचिंतां करणवत् आंतरचिंतनं आंतराणां मनसा परिकल्पितानां आसामोदकसौधवाटिकादीनां चिंतनं कर्तव्यमिति लिंगविपरिणामेनान्वयः सर्वचिंतां बाह्याभ्यंतरचिंतनं परित्यज्य किंचिदपि न चिंतयेत् परवैराग्येनात्माकारमपि वृत्तिमपि परित्यजेत् तत्यागे स्वतः एवात्मस्थिती रूपती वस्तुतः किं भवतीति भावः ७ बाह्याभ्यंतरचिंतापरित्यागे शांतिर्भवतीत्यत्र वसिष्ठवाक्यं प्रमाणयति संकल्पेति संकल्पो मानसिको व्यापारः स एव संकल्पमात्रं तस्य कलनैव रचनैव इदं दृश्यमानं समग्रं जगदस्ति समग्रप्रपंचः मनोमात्रकल्पित इत्यर्थः मनसो मानसस्य विलासः नानाविषयाकारकल्पना आसामोदकसौधवाटिकादिकल्पनारूपो विलासः संकल्पमात्रकलनैव मानसप्रपंचोऽपि संकल्पमात्ररचनैवेत्यर्थः

संकल्पमात्रे बाह्याभ्यंतरप्रपंचे यामतिः सत्यत्वबुद्धिः तांउत्सृज त्यज तर्हि किं कर्त्तव्यमित्यत आह निर्विकल्पेति विशिष्टा कल्पना विकल्पः आत्मनि कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वसजातीयस्वगतभेददेशकालवस्तुपरिछेदकल्पनारूपः तस्मान्निष्क्रांतिर्विकल्पः आत्मानं आश्रित्य धारणादिविषयं कृत्वा देहाराम निश्चयं भ संदिग्धं शांतिपरमोपरतिं अवाप्नुहि प्राप्नुहि ततः सुखमपि प्राप्स्यसीति भावः तदुक्तं भागवतत्वतिरेकेगगननान्वाभावयतः शांतिशालस्य क्रमः सुखमिति ५८ कर्पूरमिति यद्वद्यथा अनले अग्नौ संधीयमानं संयोज्यमानं कर्पूरं विलीयते विशेषेण लीयते लीनं भवति अग्न्याकारं भवति यथा शलिले जले संधियमानं सैंधवं लवणं विलीयते लवणाकारं परित्यज्यजलाकारं भवति तथा तद्वत्तत्वे आत्मनि संधीय

कर्पूरमनले यद्वत्सैंधवं सलिले यथा तथा संधीयमानं च मनस्तत्वे विलीयते ५९ ज्ञेयं सर्वं प्रतीतं च ज्ञानं च मन उच्यते ज्ञानं
ज्ञेयं समं नष्टं नान्यः पंथा द्वितीयकः ६० मनोदृश्यमिदं सर्वं यत्किंचित्सचराचरं मनसो ह्युन्मनीभावाद्द्वैतं नैवोपलभ्यते॥६१॥

मानं धार्यमानं मनः विलीयते आत्माकारं भवति ५९ मनसो विलीये जाते द्वैतमपि विलीयत इत्याह द्वाभ्यां ज्ञेयमिति सर्वं सकलं ज्ञेयं ज्ञानार्हं प्रतीतं च ज्ञानं च ज्ञानं च इदं सर्वं मन उच्यते सर्वस्य मनःकल्पनामात्रत्वात् मनशब्देनोच्यते ज्ञानं ज्ञेयं च समं मनसो विजयेन नमास्याउं नष्टं यदि तर्हि द्वितीयकः द्वितीयस्यैव द्वितीयकः पंथाः मनोविषयो नास्ति द्वैतनालीनिफलितोर्थः ६० मनोदृश्यमिति इदमुपलभ्यमानं यत्किंचित्सत्किमपि चरं जंगमं अचरं स्थावरं चेतनं अचरं चराचरैताभ्यां सहवर्तमानमिति सचराचरं यज्जगत् तत्सर्वं मनोदृश्यं मनसा दृश्यं मनःसंकल्पमात्रमित्यर्थः मनःकल्पनासत्वे प्रतीतिस्तदभावे चाप्रतीतेर्भ्रमरूपमसर्वं जगत् भ्रमस्य प्रातीतिसारत्वात् सचवोभ्रमनसमंगभ्रमाधिष्ठान

हठदी.
४९

स्यानुक्तगमनत्वाभ्युपगमात्मनसः उन्मनीभावाद्विलयाद्वैतंभेदःनैवउपलभ्यतेनैवप्रतीयतेद्वैतभ्रमहेतोर्मनःसंकल्पस्याभावान्नहानिहेतुर्वाक्यं॥ ६१ ॥ ज्ञेयमिति ज्ञे
यंज्ञानविषयंयद्वस्तुसर्वंचराचरंयद्दृश्यंतस्यपरित्यागात् नामरूपात्मकतस्यपरिवर्जनात् विलयंसच्चिदानंदरूपात्माकारंभवति मनसोविलीयेजातेसतिकेव
ल्यंकेवलस्यात्मनोभावःकैवल्यंअवशिष्यतेअद्वितीयात्मस्वरूपमवशिष्टंभवतीत्यर्थः ६२ एवमिति एवंअंतलक्ष्यंबहिर्दृष्टिरित्याद्युक्तप्रकारेणमहान्स
माधिपरिशीलनवशुद्धआत्माअंतःकरणंयेषांतेमहात्मनः तैर्महात्मभिः पूर्वेचतेआचार्याश्चपूर्वाचार्याःमत्स्येन्द्रादयःतैःसमाधेश्चित्तवृत्तिनिरोधस्यमा
र्गाःप्राप्त्युपायाःकथिताःकिंदृशीःसमाधिमार्गाःनानाविधोपायाःनानाविधाःउपायाःसाधनानियेषांतेतथासम्यक्समीचीनतयासंशयविपर्ययराहि

ज्ञेयंवस्तुपरित्यागाद्विलयंयातिमानसं मनसोविलयेजातेकैवल्यमवशिष्यते ६२ एवंनानाविधोपायाःसम्यक्स्वानुभवान्वि
ताः समाधिमार्गाःकथिताःपूर्वाचार्यैर्महात्मभिः ६३ सुषुम्णायैकुंडलिन्यैसुधायैचंद्रजन्मने मनोन्मन्यैनमस्तुभ्यंम
हाशक्त्यैचिदात्मने ६४ अशक्यतत्त्वबोधानांमूढानामपिसंमतं प्रोक्तंगोरक्षनाथेननादोपासनमुच्यते ६५

त्येनयःस्वानुभवःआत्मानुभवस्तेनान्विताःयुक्ताः ६३ सुषुम्णादिभ्यःकृतकृत्यतयाप्रणमति सुषुम्णायैइति सुषुम्नामध्यनाडीतस्यैकुंडलिन्यैआधार
शक्त्यैचंद्रात्भ्रूमध्यस्थात्जन्मयस्याःतस्यैसुधायैपियूषायमनोन्मन्यैतुर्यावस्थायैचिद्रूपेनयमात्मास्वरूपंयस्याःसातथातस्यैमहत्यैजडानांकार्येंद्रिय
मनसांचेतनत्वसंपादकत्वात्सर्वेषामाद्यायाशक्त्यैचितिशक्तिःपुरुषत्वपातस्यस्यैतुभ्यमितिप्रत्येकंसंबध्यतेसर्वत्रचतुर्थीभावेतु ६४ नानाविधाःसमाध्युपाय
उक्तानादानुसंधानरूपंमुख्योपायंप्रतिजानीते अशक्येति अशक्यमशक्यतादशक्यस्तत्त्वबोधस्तत्त्वज्ञानंयेषांतेतथातेषांमूढानामन
धीतानांसंमतमपिशास्त्रकिंउताधीतानामितिगम्यते गोरक्षनाथेनप्रोक्तमित्यनेनसद्गुरुक्तत्वादुपादेयत्वंगम्यतेनादस्यानादःध्वनेःउपासनंअनुसंधा

नद्रूपंसेवनमुच्यतेकथ्यते ६५

राम:
४९

48

श्री आदिनाथेनेति श्री आदिनाथेन शिवेन कथिताः प्रोक्ताः पादेन चतुर्थांशेन सह वर्तमानाः कोटिसंख्याकाः ये लयप्रकाराः चित्तलयसाधनभेदाः जयं
ति उत्कर्षेण वर्तंते वयं तु नादानुसंधानकं नादानुचिंतनमेव एकं केवलं लयानां लयसाधनानां मध्ये मुख्यतमं अतिशयेन मुख्यं मन्यामहे मानीमहे उत्कृष्टा
नां लयसाधनानां मध्ये उत्कृष्टम् मत्वा गोरक्षाभिमतत्वादस्मदभिमतत्वाच्च नादानुसंधानमेवावश्यं विधेयमिति भावः ६६ शांभवीमुद्रया नादानुसंधानमाह मु
क्तासन इति मुक्तासने सिद्धासने स्थितो योगी शांभवीमुद्रां अंतर्लक्ष्यं बहिर्दृष्टिरित्यादिनोक्तां संधाय त्वा एकधीः एकाग्रचित्तः सन् दक्षिणे कर्णे अंतःस्थं सु
षुम्णानाडीस्थं नादमेव नादं शृणुयात् तदुक्तं त्रिपुरासारसमुच्चये आक्षेमन्त्रा कि मालाजनि नरवसमस्तारुंकार कारी नादो सौ वांशिकस्यानिलभरितलस

श्री आदिनाथेन सपादकोटिलयः प्रकाराः कथिता जयंति नादानुसंधानकमेकमेव मन्यामहे मुख्यतमं लयानां ६६ मुक्तासने स्थि
तो योगी मुद्रां संधाय शांभवीं शृणुयाद्दक्षिणे कर्णे नादमंतःस्थमेकधीः ६७ श्रवणपुटनयनयुगलघ्राणमुखानां निरोधकार्यं शु
द्धसुषुम्णासरणौ स्फुटममलः श्रूयते नादः ६८ आरंभश्च घटश्चैव तथा परिचयोपि च निष्पत्तिः सर्वयोगेषु स्यादवस्थाचतुष्टयं ६९

द्वशनिःस्वानतुल्यः घंटानादानुकारी तदनु च जलधिध्वानधीरो गभीरो गर्जत्पर्जन्यघोषः पर इह कुहरे वर्तते ब्रह्मनाड्या इति ६७ षण्मुखीमुद्रया नादानुसं
धानमाह श्रवणेति श्रवणपुटे श्रोत्रपुटे नयनयोर्नेत्रयोर्युगलं युग्मं घ्राणशब्देन घ्राणपुटे मुखं च एतेषां द्वंद्वे प्राण्यंगत्वादेकवद्भावे प्राप्तेपि सर्वस्या
पि द्वंद्व एकवद्भावस्य वैकल्पिकत्वान्न भवति तेषां निरोधनं करांगुलिभिः कार्यं निरोधनं चेत्थं अंगुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां च चक्षुषी नासापुटे तथान्या
भ्यां प्रच्छाद्य करणानि वै इति चकारादन्याभ्यां मुखं प्रच्छाद्य इति समुच्चीयते शुद्धा प्राणायामैर्मलरहितायां सुषुम्णासरणौ सुषुम्णापद्धतौ तस्यां अमलो ना
दः स्फुटं व्यक्तं श्रूयते ६८ अथ नादस्य चतस्रोऽवस्थाः प्राह आरंभश्चेति आरंभावस्था घटावस्था परिचयावस्था निष्पत्त्यवस्था इति सर्वयोगेषु सर्वेषु सि

नहन्ति। निरोधोपायेषु अवस्थाचतुष्टयं स्यात् च वै वतथापि वाः
पादपूरणार्थः ६९

ह॰प्र॰टी॰
५०

तत्रारंभावस्थामाह ब्रह्मग्रंथेरिति ब्रह्मग्रेरनाहतचक्रेवर्त्तमानाया:भेद:प्राणायामाभ्यासेनभेदनंयथाभवेत्तदेतियत्तदोरध्याहार: आंदयतीत्यानंद:आनंदजनक: शून्येहृदाकाशेसंभवतीतिशून्यसंभव:हृदाकाशोत्पन्न:विचित्रो नानाविध:क्वणोभूषणनिनद:सएवक्वणक:भूषणनिनदसदृशइत्यर्थ: भूषणानांतुसिंजितं निक्वाणोनिक्वण:क्वाणोक्वण:क्वणनमपीत्यमर: अनाहतोध्वनि:अनाहतोनिर्ह्राद:देहेदेहमध्येश्रूयतेश्रवणविषयोभवतीत्यर्थ: ७० दिव्यदेहइति शून्येहृदाकाशेयआरंभ: नादारंभस्तस्मिन्सतिहृदाकाशविभ्रमाख्यभूम्याकाशा:शून्यातिशून्यमहाशून्यादिपदैर्व्यवह्रियंते योगिभि:संपूर्णहृदय:प्राणवायुनासम्यकपूर्णंहृदयंयस्यस:तथाआनंदेनवापूर्णंहृदय:योगवान्योगीदिव्यो रूपलावण्यबलसंपन्नोदेहोयस्यस:दिव्यदेह: तेजस्वीप्रता

अथारंभावस्था ब्रह्मग्रंथेर्भवेद्भेदोह्यानंद:शून्यसंभव: विचित्र:क्वणकोदेहेनाहत:श्रूयतेध्वनि: ७० दिव्यदेहश्चतेजस्वी दिव्यगंधस्त्वरोगवान् संपूर्णहृदय:शून्य आरंभेयोगवान्भवेत् ७१ अथघटावस्था द्वितीयायांघटीकृत्यवायुर्भवतिमध्यग: दृढासनोभवेद्योगीज्ञानीदेवसमस्तदा ७२

पवान् दिव्यगंध:दिव्यउत्तमोयस्यस: तथाअरोगवान् रोग:रहित:भवेदितिसंबंध: ७१ घटावस्थामाह द्वितीयायामिति द्वितीयायांघटावस्थायां वायु:प्राणघटीकृत्यआत्मनासहएकीकृत्यनादबिंदुचैकीकृत्यमध्यगोमध्यचक्रगत:कंठस्थानेमध्यचक्रंतदुक्तंतत्रैव. जालंधरबंधमध्यचक्रमिदंज्ञेयंषोडशाधारबंधनमिति यदाभवेदित्यध्याहार:तदातस्यामवस्थायांयोगीयोगाभ्यासीदृढमासनंयस्यस:दृढासन: ज्ञानीपूर्वापेक्षयाकुशलबुद्धि: देवसम:रूपलावण्याधिक्याद्देवतुल्योभवेत् तदुक्तमीश्वरोक्तेराजयोगेघटनाप्राणयोगोनादबिंदुजीवात्मपरमात्मनोमिलित्वाघटंतेयस्यांतस्मात्सा घटउच्यतइति ७२

49

राम:
५०

विष्णुग्रंथेरिति ततः ब्रह्मग्रंथिभेदानन्तरं विष्णुग्रंथेः कंठे वर्त्तमानायाः भेदात्कुंभकैर्भेदनात् परमानंदस्य भाविनो ब्रह्मानंदस्य सूचको ज्ञापकः अतिशून्ये कंठा
वकाशे विमर्दः अनेकनादसंमर्दः भेर्याः शब्द इव शब्दो भेरीनादश्च तदा तस्मिन्काले भवेत् ७३ परिचयावस्थामाह सार्द्धवाभ्यां तृतीयायामिति तृतीयायां
परिचयावस्थायां विहायोमर्द्दलध्वनिः विहायसि भ्रूमध्याकाशे मर्दलस्य वाद्यविशेषस्य ध्वनिरिव ध्वनिर्विज्ञेयो विशेषेण ज्ञातो भवति तदा तस्यामव
स्थायां सर्वसिद्धिसमाश्रयं सर्वासां सिद्धीनामणिमादीनां समाश्रयं स्थानं तत्संयमादणिमादिप्राप्तेः महाशून्यं भ्रूमध्यावकाशं याति गच्छति प्राणा
इति शेषः ७४ चित्तानंदमिति चित्तानंदं नादविषयांतःकरणवृत्तिजं सुखं जित्वाभिभूय सहजानंदसंभवः सहजानंदस्वाभाविकमात्मसुखवृत्तिजसुखं

विष्णुग्रंथेस्ततो भेदात्परमानंदसूचकः अतिशून्ये विमर्दश्च भेरीशब्दस्तदा भवेत् ७३ तृतीयायां तु विज्ञेयो विहायो मर्द्दलध्वनिः महाशू
न्यं तदा याति सर्वसिद्धिसमाश्रयं ७४ चित्तानंदं तदा जित्वा सहजानंदसंभवः दोषदुःखजराव्याधिक्षुधानिद्राविवर्जितः रुद्रग्रंथिं
यदा भित्वा सर्वपीठगतोनिलः ७५ निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् एकीभूतं तदा चित्तं राजयोगाभिधानकं ७६

खं जित्वाभिभूय सहजानंदसंभवः सहजानंदस्वाभाविकमात्मसुखं तस्य संभवः आविर्भावः दोषा वातपित्तकफाः पापं च दुःखं तज्जन्या वेदना आध्यात्मिका
दिः जरा अवस्थाविशेषः व्याधिः ज्वरादिः क्षुधा बुभुक्षा निद्रा स्वापः एताभिर्विवर्जितो रहितः तदा योगी भवतीति तदाकदेमपेक्षायामाह रुद्रेति यदा रुद्रग्रंथिं
भित्वा आज्ञाचक्रे रुद्रग्रंथिः सर्वस्य ईश्वरस्य पीठं स्थानं भ्रूमध्यं तत्र गतः प्राप्तोनिलः प्राणो भवति तदा ७५ निष्पत्त्यवस्थामाह निष्पत्ताविति निष्पत्तौ
निष्पत्त्यवस्थायां ब्रह्मरंध्रे गते प्राणे निष्पत्त्यवस्था भवति वैणवः वेणोरयं वैणवः वंशसंबंधिः शब्दः निनादः क्वणंती शब्दायमाना या वीणा तस्याः क्वण

ह.प्र.टी
५१

स्वतः भवेत् तदा तस्य अवस्थायां चित्तमंतःकरणं एकीभूतं एकविलयीभूतं विषयविषयिणोरभेदोपचारात् तत् राजयोगाभिधानकं राजयोग इत्यभिधानं यस्य तत् राजयोगाभिधानकं चित्तस्यैकाग्रतैव राजयोग इत्यर्थः ७६ सृष्टिसंहारेति असौ नादानुसंधानपरो योगी सृष्टिसंहारकर्ता सृष्टिसंहारं च करोतीति तादृशः अत एव ईश्वरसमः ईश्वरतुल्यो भवेत् अस्तु वेति राजयोगमिति उभौ प्राग्व्याख्यातौ ७७ उन्मन्यवाप्तय इति शीघ्रं त्वरितं उन्मन्या उन्मन्यवस्थाया अवाप्तये प्राप्त्यै भ्रूध्यानं भ्रुवोर्ध्यानं भ्रुवोर्मध्ये ध्यानं मम स्वात्मारामस्य संमतं ७८ राजयोगे योगानां राजा तदेव पदं राजयोगपदं तत्स्थानम् यथारथं प्राप्तुं लब्धुं पूर्वोक्तः भ्रूध्यानरूपः सुखोपायः सुखसाध्य उपायः सुखोपायः अल्पचेतसां अल्पबुद्धीनामपि किमुतान्येषामित्यभिप्रायः ना-

सृष्टिसंहारकर्तासौ योगीश्वरसमो भवेत् अस्तु वा मास्तु वा मुक्तिरत्रैवाखंडितं सुखं ७७ लयोद्भवमिदं सौख्यं राजयोगादवाप्यते राजयो-
गमजानंतः केवलं हठकर्मिणः एतानभ्यासिनो मन्ये प्रयासफलवर्जितान् उन्मन्यवाप्तये शीघ्रं भ्रूध्यानं मम संमतं ७९ राजयोगपदं प्राप्तुं सु-
खोपायोल्पचेतसां सद्यः प्रत्ययसंधायी जायते नादजो लयः ८० नादानुसंधानसमाधिभाजां योगीश्वराणां हृदि वर्द्धमानं आनंदमेकं वचसा-
मगम्यं जानाति तं श्रीगुरुनाथ एकः ८१

दजः नादाज्जातो लयः चित्तविलयः सद्यः शीघ्रं प्रत्ययं प्रतीतिं संदधातीति प्रत्ययसंधायी प्रतीतिकरः संजायते प्रादुर्भवति ८० नादानुसंधानेति नादस्यानाहतध्वनेरनुसंधानं अनुचिंतनं तेन समाधिं चित्तैकाग्र्यं भजंतीति नादानुसंधानसमाधिभाजः तेषां योगिषु योगयुक्तेषु ईश्वराः समर्थाः तेषां हृदि हृदये वर्द्धते इति वर्द्धमानस्तं वर्द्धमानं सर्वदा नं वचसां वाचामगम्यं इदमित्थमिति वक्तुमशक्यं तं योगशास्त्रप्रसिद्धं एकं मुख्यं आनंदं आह्लादं एकः भगवान् श्रीगुरुनाथः श्रीमान् गुरुरेव नाथः जानाति वेत्ति नेतरः एतेन नादानुसंधानजं सुखमगम्य एवेति सूचितम्

50

राम:
५१

नादनुसंधानप्रत्याहारादिक्रमेण समाधिमाह ॥ कर्णावित्यादिभिः मुनिर्मननशीलो योगी हस्ताभ्यामित्यनेन हस्तांगुष्ठौ लक्ष्यते ॥ ताभ्यां कर्णौ श्रोत्रे पिधाय हस्तांगुष्ठौ श्रोत्रविवरयोः कृत्वेत्यर्थः ॥ यं ध्वनिं अनाहतनिःस्वनं शृणोति आकर्णयति ॥ तत्र तस्मिन्ध्वनौ चित्तं स्थिरीकुर्यात् ॥ अस्थिरं स्थिरं संपद्यमानं कुर्यात् ॥ यावत्स्थिरपदं तुर्याख्यं गच्छेत् ॥ तदुक्तं तुर्यावस्थाविदभिव्यंजकनादस्य वेदनं प्रोक्तमिति ॥ नादानुसंधानेन वायुस्थैर्यमणिमादयोपि भवतीत्युक्तं ॥ त्रिपुरासारसमुच्चये ॥ विजितो भवतीहतेन वायुः सहजो यस्म सप्रथितः प्रणादः अणिमादिगुणाभवंति ॥ तस्यामितपुण्यस्य महागुणोदयस्य सुरराजवैरिणं ध्रुवं विनिहत्यापिहितस्वकरांगुलिद्वयेन ॥ जलधीरवधीरनादमंतः प्रसरंतं सहसा शृणोति मर्त्य इति ॥ सुरराजद्रुस्तस्यनजो ॐ

कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः ॥ तत्र चित्तं स्थिरीकुर्याद्यावत्स्थिरपदं व्रजेत् ॥ ८२ ॥ अभ्यस्यमानो नादोयं बाह्यमावृणुते ध्वनिं ॥ पक्षाद्विक्षेपमखिलं जित्वा योगी सुखीभवेत् ॥ ८३ ॥ श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् ॥ ततोभ्यासे वर्द्धमाने श्रूयते सूक्ष्मकः ॥ ८४ ॥ आदौ जलधिजीमूतभेरीझर्झरिसंभवाः ॥ ६

नस्तस्यवैरिकर्णौस्तद्रंध्रेस्यस्वमन्यत् ॥ ८२ ॥ अभ्यस्यमान इति ॥ अभ्यस्यमानः अयं नादः अनाहताख्यः बाह्यं ध्वनिं बहिर्भवं शब्दं आवृणुते ॥ अन्योरविषयंकरोतीति योगी नादाभ्यासी पक्षात्मासार्द्धात् अखिलं सर्वविक्षेपं चितंचांचल्यं जित्वा अभिभूय सुखी स्यानंदी भवेत् ॥ ८३ ॥ श्रूयत इति ॥ प्रथमाभ्यासे पूर्वाभ्यासस्य नानाविधो नेकविधो महान् जलधीजीमूतभेर्यादिशब्दशो नादोनाहतस्वनः श्रूयते आकर्ण्यते ॥ ततोनंतरं अभ्यासे नादानुसंधानाभ्यासे वर्द्धमाने सति सूक्ष्मकः सूक्ष्म एव श्रूयते श्रवणविषयो भवति ॥ ८४ ॥ नानाविधं नादमाह द्वाभ्यां ॥ आदाविति ॥ आदौ वायोर्ब्रह्मरंध्रे गमनसमये जलधिः समुद्रः जीमूतो मेघः भेरी वाद्यविशेषः ॥ भेरिझर्झरो दुंदुभिःपु

पुमानित्यमरः। झर्झरो वाद्यविशेषः वाद्यभेदाः। डमरुमड्डुडिंडिमझर्झराः

ह.प्र
५२

मर्दलः पणवोन्येचेत्यमरः। जलधिप्रमुखेभ्यः संभव इव संभवो येषां ते तथा। मध्यावस्थायां वायोः स्थैर्यानंतरं मर्दलो वाद्यवि
शेषः शंखो जलजस्ताभ्यामुत्था इव मर्दलशंखोत्थाः। घंटाकाहलौ वाद्यविशेषौ ताभ्यां जाता इव घंटाकाहलजाः॥ ८५॥ अंते इ
ति॥ अंते तु प्राणस्य ब्रह्मरंध्रे कृतस्थैर्यानंतरं किंकिणी क्षुद्रघंटिका वंशो वेणुः वीणा तंत्री भ्रमरो मधुपः तेषां निःस्वना इव
निःस्वना इति पूर्वोक्ताः नानाविधाः अनेकप्रकारकाः देहस्य मध्ये गताः प्राप्ताः श्रूयंते॥ ८६॥ महतीति॥ मेघश्च भेरी च ते आदि
र्यस्य सः मेघभेर्यादिकस्तस्मिन् मेघभेरीशब्दोत्थध्वनिर्घोषघर्घरो। महति महत्तीव्रे ध्वनौ निनादे श्रूयमाणे आकर्ण्यमाने सत्यपि त
घनेषु नादेषु सूक्ष्मात् सूक्ष्मतरं अतिसूक्ष्मं नादमेव परामृशेत् चिंतयेत्। सूक्ष्मस्य नादस्य स्थैर्यापित्वात्तत्रासक्तं चित्तं चिरंस्थि
रीभवेदिति भावः॥ ८७॥

मध्ये मर्दलशंखोत्था घंटाकाहलजास्तथा॥ ८५॥ अंते तु किंकिणीवंशवीणाभ्रमरनिःस्वनाः॥ इति नानाविधा नादाः श्रूयं
ते देहमध्यगाः॥ ८६॥ महति श्रूयमाणेपि मेघभेर्यादिके ध्वनौ॥ तत्र सूक्ष्मात्सूक्ष्मतरं नादमेव परामृशेत्॥ ८७॥ घनमु
त्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने। रममाणमपि क्षिप्तं मनो नान्यत्र चालयेत्॥ ८८॥ यत्र कुत्रापि वा नादे लगति प्रथमं म
नः॥ तत्रैव सुस्थिरीभूय तेन सार्द्धं विलीयते॥ ८९॥ छ

घनमिति॥ घनं महांतं नादं मेघभेर्यादिकमुत्सृज्य त्यक्त्वा सूक्ष्मे किंकिणीभ्रमरादिस्वने वा सूक्ष्ममुत्सृज्य घने वा नादे रममाणं॥
घनसूक्ष्मान्यतरनादग्रहणपरित्यागाभ्यां क्रीडंतमपि क्षिप्तं॥ रजसात्यंतचंचलं मनः अन्यत्र विषयांतरेण वा न चालयेत्॥ न प्रेरयेत्॥
क्षिप्तमनःविषयांतरासक्तं न समाधीयते॥ नादेष्वेव रममाणं तु समाधीयतेति भावः॥ ८८॥ यत्रेति॥ वा अथवा यत्र कुत्रापि नादे
यस्मिन्कस्मिंश्चित् घने सूक्ष्मे वा नादे प्रथमं पूर्वं मनो लगति लग्नं भवति॥ तत्रैव तस्मिन्नेव नादे सुस्थिरीभूय सम्यक्स्थिरीभूय सम्यक्
स्थिरंभूत्वा तेन नादेन सार्द्धं साकं विलीयते विलीनं भवतीत्यर्थः॥ अत्र पूर्ववाक्येन प्रत्याहारः॥ द्वितीयेन धारणा तृतीयेन ध्या

51

ह.प्र
५२

मकरंदमिति मकरंदंपुष्परसंपिवन्धयन्भृंगोभ्रमरःगंधंयथानापेक्षते नेच्छतितदानादासक्तंनादेनासक्तंचित्तमंतःकरणंविषयान् विषिरस्त्वंनिवद्धं
निप्रतांत्स्वसंगेनेतिविषयाःस्वक्चंदनवनितादयः तान्नकांक्षतेनेनवांछतिहीतिनिश्चये ९० मनइति विषयःशब्दादिरेवउद्यानंवनंतत्रचरतीतिविष
योद्यानचारीतस्यमनस्त्वमत्तगजेंद्रोदुर्निवारत्वात् तस्यनिनादएवअनाहतध्वनिरेवनिशितांकुशस्तीक्ष्णांकुशः नियमनेपरावर्त्तनेसमर्थःशक्त
एतैश्लोकैश्रुतांचक्षुरादीनांविषयेयेषुयथाक्रमंयत्प्रत्याहरणंतेषांप्रत्याहारप्रकीर्तितः इन्द्रियाणांविषयेभ्यःप्रत्याहरणंप्रत्याहारइत्युक्तलक्षण
प्रत्याहारःप्रोक्तः ९१ बद्धंत्विति नादएवबंधः बध्यतेनेनेतिबंधःबंधनसाधनंतेनस्वाधीनकारेण बद्धंबंधनमिवप्राप्तंनादधारणयानादासक्तिमत्यर्थः

मकरंदंपिवन्भृंगोगंधंनापेक्षतेयथा नादासक्तंतथाचित्तंविषयान्नहिकांक्षते ९० मनोमत्तगजेंद्रस्यविषयोद्यानचारिणः निय
मनेसमर्थोयंनिनादनिशितांकुशः ९१ बद्धंतुनादबंधेनमनःसंत्यक्तचापलं प्रयातिसुतरांस्थैर्यंछिन्नपक्षःखगोयथा ९२ सर्वचिंतां
परित्यज्यसावधानेनचेतसा नादएवानुसंधेयोयोगसाम्राज्यमिछता ९३

अतएवसम्यक्त्यक्तंसंत्यक्तंचापलंक्षणेविषयग्रहणपरित्या
गरूपंयेनतत् तथामनःसुतरांस्थैर्यंप्रयातिनितरांधारणामेति तत्रदृष्टांतमाह छिन्नौपक्षौयस्यतादृशःखेगच्छतीतिखगःपक्षियथा एतेनप्राणा
यामेनपवनंप्रत्याहारेणचेंद्रियंवशीकृत्यततःकुर्याच्चित्तस्यानंशुभाश्रयेशुभाश्रयेस्थापनंधारणेत्युक्तलक्षणाधारणाप्रोक्ता ९२ सर्वचिंतामितिस
र्वेषांबाह्याभ्यंतराविषयाणांयाचिंताचिंतनंतांपरित्यज्यत्यक्त्वासावधानेनएकाग्रेणचेतसायोगिनांसाम्राज्यंसम्राजोभावःयोगशब्दअर्शआद्यजंतरा
जयोगित्वमितियावत् इच्छतांवांछतापुंसानादएवअनाहतध्वनिरेवानुचिंतनीयः नादाकारवृत्तिप्रवाहःकर्तव्यइत्यर्थःएतेनतद्रूपप्रत्ययैकाग्रसंततिः

हठदी
५२

ध्यायतिस्म हातथ्यानं प्रथमैरंगैः षड्भिर्ध्यायते नृपतत्र प्रत्ययैकतानता ध्यानमिति सूक्तलक्षणं ध्यानमुक्तं ९३ नादोंतरंगेति नादः अंतरंगं मनः स एव सारंगो मृ-
गस्तस्य बंधने चांचल्यहरणे वागुरायते वागुरेवाचरति वागुराजालं यथा वागुराबंधेन सारंगस्य चांचल्यं हरति तथा नादोंतरंगस्य सारंगस्य चांचल्यं हरतीत्य-
र्थः अंतरंगं मन एव कुरंगो हरिणः तस्य वधे नानाहस्तुस्याद्दनापनयमेव मनसो वधः तस्मिन् व्याधायते व्याध इवाचरति यथा व्याधो वाणेन कुरंगं हंति एवं
नादोपि व्यासक्तमनो हंतीत्यर्थः ९४ अंतरंगस्येति यमिनो योगिनः अंतरंगं मनस्तस्य पूलत्वाद्वाजिनः अश्वस्य परिघायते वाजिशालाद्वारं परिघ इवाच-
रति नादः इति शेषः यथा वाजिशालापरिघो वाजिनोन्यत्र गतिं रुणद्धि तथा नादोंतरंगस्येत्यर्थः अतः कारणात् योगिना नादस्य उपास्ति रूपासना नित्यं ग्र-

नादोंतरंगसारंगबंधने वागुरायते अंतरंगकुरंगस्य वधे व्याधायतेपि च ९४ अंतरंगस्य यमिनो वाजिनः परिघायते ना-
दोपास्तिरतो नित्यमवधार्या हि योगिना ९५ बद्धं विमुक्तचांचल्यं नादगंधकजारणात् मनःपारदमाप्नोति निरालंबाख्यखे

हं अवधार्या अवधारणीया हीति निश्चयेऽर्थः ९५ बद्धमिति नाद एव गंधकः उपाधिषु विशेषः तेन जारणं जीर्णीकरणं नादगंधकसंबंधेन चांचल्यहर-
णं तस्मात् बद्धं नादैकासक्तं पक्षे गुटिकाकृतिप्राप्तं अत एव विमुक्तं त्यक्तं चांचल्यं विषयानेककारपरिणामरूपं येन पक्षे विमुक्तलौल्यं मनः पारदं म-
न एव पारदं चंचलं निरालंबं ब्रह्म तदेवाख्या यस्य तत् निरालंबाख्यं तदेव खं अपरिच्छिन्नत्वात् तस्मिन् अटनं गमनं तदाकारवृत्तिप्रवाहं पक्षे आकाशग-
मनं प्राप्नोति यथा बद्धं पारदमाकाशगमनं करोति मनः तदाकारवृत्तिप्रवाहमविच्छिन्नं करोतीत्यर्थः ९६ ७ ९६

52

रामः
५३

नादइति नादस्य अनाहतस्वनस्य श्रवनस्य श्रवनतः श्रवणात् क्षिप्रं द्रुतं अंतरंगमनः स्वभुजंगमः सर्पः चपलत्वान्नादप्रियत्वाच्च भुजंगमेन रूपकं मनसः सर्वं विश्वं स्मस्मस्य विषयं कृत्वाऽस्काग्रे नादाकारवृत्तिप्रवाहवान्सन् कुत्रापि विषयांतरे न हि धावति नैव धावनं करोति ध्यानोत्तरैः श्लोकैः तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् मनसा ध्याननिष्पाद्यं समाधिः सोभिधीयतेइति विष्णुपुराणोक्तलक्षणः तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति पातंजलसूत्रोक्तलक्षणश्च संप्रज्ञातलक्षणः समाधिरुक्तः ९७ काष्ठइति काष्ठे दारुणि प्रवर्तितः प्रज्वालितो वह्निः काष्ठेन सह शाम्यति ज्वालारूपं परित्यज्यतेजोमात्ररूपेणावतिष्ठते यथा तथा नादे प्रवर्तितं चित्तं नादेन सह लीयते राजसतामसवृत्तिनाशात्सत्त्वमात्रावशेषं संस्कारशेषं च भवति तथा

नादः श्रवणतः क्षिप्रमंतरंगभुजंगमः विस्मृत्य सर्वमेकाग्रः कुत्रचिन्न हि धावति ९७ काष्ठे प्रवर्तितो वह्निः काष्ठेन सह शाम्यति ना
दे प्रवर्तितं चित्तं नादेन सह लीयते ९८ घंटादिनादसक्तस्तब्धांतःकरणहरिणस्य प्रहरणमपि सुकरं शरसंधानप्रवीणश्चेत्
९९ अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते ध्वनेरंतर्गतं ज्ञेयं ज्ञेयस्यांतर्गतं मनः १००

चमैत्रायणीचमंत्रः यथा निरिंधनो वह्निः स्वयोनावुपशाम्यति तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यतीति ९८ घंटादिति घंटा आदिर्येषां शंखमर्दलझर्झरडिंडिमभिंजीमृनादानां ते घंटादयः तेषां नादास्तेषु शक्तः अतएव ध्वनौ निश्चलो यंतःकरणमेव हरिणो मृगस्तस्य प्रहरणं नानाहृत्तस्य वृत्तिविघनं अंतःकरणपक्षे हरिणपक्षे तु प्रहरणं हननमपि शवरस्तनगामिनवायोसंधानं सुषुम्णामार्गेण ब्रह्मरंध्रे निरोधनं पक्षे शरस्य वाणस्य साधनं धनुषियोजनं तस्मिन्प्रवीणः कुशलश्चेत्सुकरं सुखेन कर्तुंशक्यं ९९ अनाहतस्येति अनाहतस्य शब्दस्य अनाहतस्य स्वनस्य यः ध्वनिर्निर्ह्रादः उपलभ्यते श्रूयते तस्य ध्वनेः अंतर्गतं ज्ञेयं ज्योतिः स्वप्रकाशचैतन्यं ज्ञेयस्यांतर्गतं ज्ञेयाकारतामापन्नं मनोंतःकरणं तत्र ज्ञेये मनो विलयं याति परवैराग्येन सकलवृत्तिशून्यं संस्कारशेषं भवति तद्विष्णोः विभो रात्मनः परमं अंतःकरणवृत्त्युपाधिराहित्यान्निरुपाधिकं पद्यते गम्यते योगिभिरिति पदं स्वरूपं १००

तावदिति यावत्शब्दोनाहतध्वनिःप्रवर्ततेश्रूयतेतावत्आकाशस्यसंकल्पःकल्पनंभवतिशब्दस्याकाशगुणत्वात् गुणगुणिनोरभेदाद्वामनसासहशब्दस्यविल
यात्निःशब्दंशब्दरहितंयत्तत्परंब्रह्मपरब्रह्मशब्दवाच्यं परमात्मेतिगीयतेपरमात्मशब्देनसउच्यतेसर्वकल्पनाविलयेयःस्वरूपेणावस्थितःसएवपरमात्मशब्दे
उच्यतइतिभावः १ यत्किंचिदिति नादरूपेणअनाहतध्वनिरूपेणयत्किंचित्श्रूयतेआकर्ण्यतेसाशक्तिरेवयःतत्त्वांतःतत्त्वानामंतोलयोयस्मिन्सःतथा
निराकारआकाररहितःसएवपरमेश्वरःसर्वस्मिन्विषयेस्वरूपावस्थितोयःसआत्मेत्यर्थः काष्ठेप्रवर्तितोवह्निरित्यादिभिःश्लोकैराजयोगापरपर्यायोऽसं
प्रज्ञातःसमाधिरुक्तः २ सर्वइति हठश्चलयश्चहठलयौतयोरुपायाहठलयोपायाहठोपायाआसनकुंभकमुद्रारूपालयोपायानादानुसंधानशांभवीमु
द्रादयःराजयोगस्यमनसःसर्ववृत्तिनिरोधलयस्यसिद्धयेनिष्पत्तयेप्रोक्ताइतिशेष राजयोगंसमारूढःसम्यगारूढःप्राप्तवान्यःपुरुषःसःकालवंचकः

मनस्तत्रलयंयातितद्विष्णोःपरमंपदं १०० तावदाकाशसंकल्पोयावच्छब्दःप्रवर्त्तते निःशब्दंतत्परंब्रह्मपरमात्मेतिगीयते १ यत्किंचिन्नादरूपेणश्रू
यतेशक्तिरेवसा यस्तत्वांतोनिराकारःसएवपरमेश्वरः २ इतिनादानुसंधानं श्रीरामः सर्वेहठलयोपायाराजयोगस्यसिद्धये राजयोगसमारूढः
पुरुषःकालवंचकः ३ तत्वंबीजंहठःक्षेत्रमौदासीन्यंजलंत्रिभिः उन्मनीकल्पलतिकासद्यएवप्रवर्त्तते ४ सदानादानुसंधानात्क्षीयंतेपापसंचयाः नि
रंजनेविलीयेतेनिश्चितंचित्तमारुते ५

कालंमृत्युंवंचयतीतितादृशःस्यादितिशेषः ३ तत्त्वमिति तत्त्वंचित्तंबीजंबीजवदुन्मन्यवस्थांकुरकारणंपरिणामभावत्वात्हठःप्राणापानयोरैक्यलक्षणः
प्राणायामःक्षेत्रंक्षेत्रइवप्राणायामेउन्मनीकल्पलतिकोत्पत्तेःऔदासीन्यंपरवैराग्यंजलंतस्यउत्पत्तिकारणत्वात् परवैराग्यहेतुकेःसंस्कारशेषश्चित्तस्यासंप्र
ज्ञातइतिलक्षणात् एतैस्त्रिभिःउन्मनीअसंप्रज्ञातावस्थासैवकल्पलतिकासकलेष्टसाधनत्वात् सद्यएवशीघ्रमेवप्रवर्तते प्रवृत्ताभवतिउत्पन्नाभ
वति ४ सदेति सदासर्वदानुसंधानात्नादानुचिंतनात्पापसंचयापापसमूहाःक्षीयंतेनश्यंति निरंजनेनिर्गुणेचैतन्येचित्तंध्रुवंचित्तमारुतौमनःप्रा
णौविलीयेतेविलीनौभवतः ५

53

उन्मन्यवस्थाप्राप्तस्ययोगिनःस्थितिमाहद्वाभ्यां शंखदुंदुभीति शंखोजलजःदुंदुभिर्वाद्यविशेषःतयोर्नादंघोषंकदाचनकस्मिंश्चिदपिसमयेनशृणोति
तिशंखदुंदुभीत्युपलक्षणंनादमात्रस्य उन्मन्यावस्थयादेहोध्रुवंकाष्ठवज्जायतेनिश्चेष्टत्वादित्यर्थः ६ जाग्रत्स्वप्नसुषुप्तिमूर्छामरणलक्षणापंचसु
स्थानावस्थास्ताभिर्विशेषेणमुक्तोरहितःसर्वाःयाश्चिंतास्मृतयःताभिर्विवर्जितःविरहितःयःयोगःसकलवृत्तिनिरोधोस्यास्तीतियोगीमृतावस्थावान्स
मुक्तःजीवन्नेवमुक्तःसकलवृत्तिनिरोधेआत्मनःस्वरूपावस्थानात् तदुक्तंपातंजलसूत्रे तदाद्रष्टुःस्वरूपेवस्थानमितिस्पष्टमन्यत् ७ खाद्यतइति
समाधिनायुक्तोयोगीकालेनमृत्युनानखाद्यतेनभक्ष्यतेनहन्यतइत्यर्थः कर्मणाकृतेनशुभेनअशुभेनवानबाध्यतेजन्ममरणादिजननेननक्लेश्यतेत
थाचसमाधिप्रकरणेपातंजलसूत्रं ततःक्लेशोकर्मनिवृत्तिरिति केनापिपुरुषांतरेणयंत्रमंत्रादिनावानसाध्यतेसाधयितुंनशक्यते ८ नगंधमिति समाधि

शंखदुंदुभिनादंचनशृणोतिकदाचन काष्ठवज्जायतेदेहउन्मन्यावस्थयाध्रुवं ६ सर्वावस्थाविनिर्मुक्तःसर्वचिंताविवर्जितः मृतवत्तिष्ठतेयोगीसमुक्तो
नात्रसंशयः ७ खाद्यतेनचकालेनबाध्यतेनचकर्मणा साध्यतेनसकेनापियोगीयुक्तःसमाधिना ८ नगंधंनरसंरूपंनचस्पर्शंननिःस्वनं नात्मा
नंनपरंवेत्तियोगीयुक्तःसमाधिना ९ चित्तंनसुप्तंनोजाग्रत्स्मृतिविस्मृतिवर्जितं नचास्तमेतिनोदेतियस्यासौमुक्तएवसः १०

नायुक्तोयोगीगंधंसुरभिमसुरभिंवानरसंमधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधंनरूपंशुक्लनीलपीतरक्तहरितकपिलचित्रभेदात्सप्तविधंनस्प
र्शंशीतमुष्णमनुष्णाशीतंवाननिःस्वनंशंखदुंदुभिजलधिभीमनादादिनादंवाह्याभ्यंतरंवानआत्मानंदेहंनपरंपुरुषांतरंनवेत्तीतिसर्वत्रान्वेति आत्मादे
हधृतौजीवस्वभावेपरमात्मनीत्यमरः ९ चित्तमिति यस्ययोगिनःचित्तमंतःकरणंनसुप्तंआवरकस्यतमसोभावात् त्रिगुणोंतःकरणेयदासत्वरजसी
अभिभूयतमस्तुकरणावरकंतमआविर्भवतितदांतःकरणस्यविषयाकारपरिणामाभावात्तत्सुप्तमित्युच्यतेनोजाग्रत्इंद्रियैर्ग्रहणाभावात्स्मृ
तिश्चविस्मृतिश्चस्मृतिविस्मृतीताभ्यांवर्जितंवृत्तिसामान्याभावात् उद्बोधकाभावाच्चस्मृतिवर्जितंस्मृत्यनुकूलसंस्काराभावात्विस्मृतिवर्जितंनच

अस्तंनाशंस्निप्राप्नोति संस्कारशेषस्यचित्तस्यसत्वात् नउदेतिउद्भवति वृत्त्यनुत्पादनात् सोसौमुक्तएवजीवन्मुक्तएव १० नविजानातीति स
माधिनायुक्तोयोगीशीतंचउष्णंचशीतोष्णंसमाहारद्वन्द्वः शीतमुष्णंवापदार्थंनदुःखंदुःखजनकंपरकृतंताडनादिकंन सुखंसुखसाधनंसुखदमभिचंद
नाद्यनुलेपनादिकंन तथाचार्थे मानंपरकृतसत्कारंनअपमानंअनादरंचनविजानातीति क्रियापदंप्रतिवाक्यमन्वेति १११ स्वस्थइति स्वस्थ
प्रसन्नेन्द्रियान्तःकरणः एतेनतंद्रामूर्छादिव्यावृत्तिः जाग्रदवस्थायामित्यनेनस्वप्नसुषुप्त्योर्निवृत्तिः सुषुप्तिवत्सुषुप्तेरतुल्यंकार्येऽपियथा
प्रारब्धस्य: योयोगी अवगी अवतिष्ठतेस्थितोभवति समवप्रविभ्यःस्थ इत्यात्मनेपदं निश्वासोच्छ्वासहीनः बाह्यस्यवायोःकोष्ठेग्रहणंनि
श्वासः कोष्ठस्यवायोर्बहिर्निःसारणमुच्छ्वासः ताभ्यांहीनश्चअवतिष्ठत इत्यत्रापिसंबध्यते सः निश्चितंनिःसंदिग्धंमुक्तएवजीवन्मुक्तएव उ

नविजानातिशीतोष्णंनदुःखंनसुखंतथा नमानंनापमानंचयोगीयुक्तःसमाधिना ११ स्वस्थोजाग्रदवस्थायांसुप्तवद्योवतिष्ठते निश्वा
सोछ्वासहीनश्चनिश्चितंमुक्तएवसः १२ अवध्यःसर्वशस्त्राणामशक्यःसर्वदेहिनां अग्राह्योमंत्रयंत्राणांयोगीयुक्तःसमाधिना १३

क्तंदत्तात्रयेण निर्गुणध्यानसंपन्नःसमाधिंचततोभ्यसेत् दिनद्वादशकेनैवसमाधिंसमवाप्नुयात् वायुंनिरुध्यमेधावीजीवन्मुक्तोभवेद्ध्रुवमिति १२ अ
वध्यइति समाधिनायुक्तोयोगीसर्वशस्त्राणामितिसंबंधः सामान्येषष्ठि सर्वशस्त्रैरित्यर्थः अवध्यहंतुमशक्यइत्यर्थः सर्वदेहिनांअत्रापिसंबंधसामान्येवि
वक्षयाषष्ठि अशक्यःसर्वदेहिभिर्बलेनशक्योनभवतीत्यर्थः मंत्रयंत्राणांवशीकरणमारणोच्चाटनफलेमंत्रेयंत्रेअग्राह्यःवश्यादिकंकर्तुमशक्यःएवंप्रा प्रयो
गस्ययोगिनोविघ्नाबहवस्समायांतितन्निवारणार्थंतज्ज्ञानस्यापेक्षितत्वात्तेपिप्रदर्श्यंते दत्तात्रेयः आलस्यंप्रथमोविघ्नोद्वितीयस्तुप्रकथ्यते पूर्वोपिधूर्तगोष्ठी
चतृतीयोमंत्रसाधनं चतुर्थोधातुवादःस्यादितियोगविदोविदुरिति मार्कंडेयपुराणे उपसर्गाःप्रवर्तंतेदृष्टेह्यात्मनियोगिनः एतांस्तेसंप्रवक्ष्यामिसमासे
ननिबोधमे काम्याःक्रियास्तथाकामान्मानुष्यानभिवांछति स्त्रियोदानफलंविद्यांमायाकुप्यंधनंवसु देवत्वममरेशत्वंरसायनचयःक्रियां मेरुप्रपतनं

पवनं जलाग्न्यावेशनं तथा। आद्यानां शाकिनीनां फलादिनियमांस्तथा तथोपवासाद्व्रतैश्चै देवपित्रर्चनादपि अतिथिभ्यश्च कर्मभ्य उपभृत्योभिर्वा इति विप्रमिश्रं प्रवर्तितं यत्नाद्योगी निवर्तयेत् स्नानागमिनः कुर्वन्नुपसर्गैः प्रमुच्यते इति स्कंदपुराणे यद्वैभिरं नरायैर्न लिप्यते हि मानसं न ह्यत्रेन नवाप्नोति पदं ब्रह्मादिदुर्लभं योगभास्करे सात्विकीं वृत्तिमालंव्य योगी सत्वेन सुस्थिरः निर्गुणं मनसाध्यायन्नुपसर्गैः प्रमुच्यते एवं योगमुपासीनः शक्रादिपद निस्पृहः सिद्धादिवालभात्यागी जीवन्मुक्तो भवेन्मुनिः विस्तरस्यभियानोक्ताः संति विघ्नास्त्वनेकशः ध्यानेन हरिहरयोर्वा रागी या हि योगिनामिति ॥ ११ अयोगिनां ज्ञानं निराकुर्वन्योगिनामेव ज्ञानं भवतीत्याह यावदिति मध्यमार्गे सुषुम्णायां चरन्गच्छन्मारुतः प्राणवायुः यावत् यावत्कालपर्यंतं न प्रविशति प्रकर्षेण ब्रह्मरंध्रपर्यंतं न विशति ब्रह्मरंध्रं गतस्य स्थैर्यात् ब्रह्मरंध्रं गत्वा तत्स्थिरो भवतीवतीप्यर्थः सुषुम्णायामसंचरणं वायुरसिद्ध इत्युच्यते तदुक्तममनस्कसिद्धौ यावद्विमार्गगो वायुर्निश्चलो नैव मध्यगः असिद्धं तं विजानीयात्पवनं कर्मविशारदमिति प्राणयति जीवयतीति प्राणः स चासौ वात

यावन्नैव प्रविशति चरन्मारुतो मध्यमार्गे यावद्बिंदुर्न भवति दृढः प्राणवातप्रबंधात्

श्च प्राणवायुः तस्य प्रबंधात् कुंभकेन स्थिरीकरणात् बिंदुर्वीर्यं दृढः स्थिरो न भवति प्राणवातस्थैर्ये बिंदुस्थैर्यमुक्तमेव प्राक् मनःस्थैर्ये स्थिरो वायुस्ततो बिंदुः स्थिरो भवेत् इति तदभावे त्वसिद्धत्वं सिद्धत्वं योगिन उक्तममनस्कसिद्धौ नावद्बद्धोप्यसिद्धोसो नरः सांसारिको मतः यावद्भवति देहस्थो रसेन्द्रो ब्रह्मरूपकः असिद्धं तं विजानीयान्नरं ब्रह्मचारिणं जरामरणसंकीर्णं सर्वक्लेशसमाश्रयमिति यावदिति तत्त्वं चित्तं ध्याने ध्येयासहजसदृशं स्वाभाविकध्येयाकारवृत्तिप्रवाहवृत्तिप्रवाहवत् नैव जायते नैव भवति प्राणवातप्रबंधादिति देहलीदीपन्यायेनात्रापि संबध्यते वायुस्थैर्ये चित्तस्थैर्यमुक्तममनस्कसिद्धौ यदासौ म्रियते वायुर्मध्यमामध्ययोगतः तदा बिंदुश्च चित्तं च म्रियते वायुना सह तदभावे त्वसिद्धत्वमुक्तममनस्कसिद्धौ यावन्न स्पंदते चित्तं वाह्याभ्यंतरवस्तुषु असिद्धं तं विजानीयाच्चित्तं कर्मपरायणमिति तावत् यत् ज्ञानं शास्त्रं वदति कश्चित् तदिदं ज्ञानकथनं दंभमिथ्याप्रलापः दंभेन ज्ञानकथनं नाहं लो

केषुचो भविष्य भविष्यमिति विधियामिति धिया मिथ्याप्रलापो मिथ्याभाषणं दंभपूर्वकं मिथ्याभाषणमित्यर्थः प्राणविंदुचित्तानां जयाभावे ज्ञानस्याभावा
त्संजनितुर्वारा तदुक्तममृतसिद्धौ चलत्येष यदा वायुस्तदा विंदुश्चलत्यपि विंदुश्चलति यस्यांगे चित्तं तस्यैव चंचलं चले विंदौ चले चित्ते मैव ले वायौ च सर्वदा
जायते म्रियते लोकेः सत्यं सत्यमिदं वच इति योगबीजेप्युक्तं चित्तं प्रनष्टं यदि भासते वै तत्र प्रतीतो मरुतोपि नाशः न चेद्यदि स्यान्नतु तस्य शास्त्रं नात्मप्रती
तिर्न गुरुर्न मोक्ष इति एतेन प्राणविंदुमनसां जये तु ज्ञानं तदा योगिनो मुक्तिः स्यादेवेति सूचितं तदुक्तममृतसिद्धौ यामवस्थां व्रजेद्वायुर्विंदुस्तामपि ग
च्छति यथा हि साध्यते वायुस्तथा विंदुप्रसाधनं मूर्छितो हरते व्याधिं बद्धः खेचरतां नयेत् सर्वसिद्धिकरो लीनो निश्चलो मुक्तिदायकः यथावस्था भवे
द्विंदोश्चित्तावस्था तथा तथा ननु योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कुत्रचित् इति भगवदुक्तास्त्रयो मोक्षो
पायास्तेषु मत्तु कथं योगस्य मोक्षोपायत्वेनोक्तमिति चेन्न तेषां योगांगेष्वंतर्भावात् तथाहि आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रु

यावद्ध्याने सहजसदृशं जायते नैव तत्वं तावज्ज्ञानं वदति तदिदं दंभमिथ्याप्रलापः ११४

त्या परमपुरुषार्थसाधनात्मसाक्षात्कारहेतुतया श्रवणमनननिदिध्यासनान्युक्तानि तत्र श्रवणमनने नियमांतर्गते स्वाध्यायेंतर्भवतः स्वाध्यायश्च मोक्षशास्त्रा
णामध्ययनं स च तात्पर्यार्थनिश्चयपर्यवसायी ग्राह्यः तात्पर्यार्थनिर्णयश्च श्रवणमननाभ्यां भवतीति श्रवणमननयोः स्वाध्यायेंतर्भवतः स्वाध्यायेंतर्भा
वः नियमविवरणे याज्ञवल्क्येन सिद्धांतश्रवणं प्रोक्तं वेदांतश्रवणं बुधैरिति तस्यैव श्रवणस्य नियमांतर्गतिरुक्ता अधीतवेदसूत्रं वा पुराणं सेतिहासकं
यदेवाध्ययनं यच्च सदाभ्यासी जपस्तु न इत्युक्तिभिरेव तत्समञ्चैतन्निजेक्षणस्य सदाभ्यासरूपस्य मननस्यापि नियमांतर्गतिरुक्ता विजातीयप्र
त्ययनिरोधपूर्वकसजातीयप्रत्ययप्रवाहरूपस्य निदिध्यासनस्योक्तलक्षणे ध्यानेंतर्भावः तस्यापि तत्परिपाकरूपसमाधिनात्मसाक्षात्कारद्वारा मोक्षहेतु
त्वं ईश्वरार्पणबुद्ध्या निष्कामकर्मानुष्ठानलक्षणस्य कर्मयोगस्य तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग इति पतंजलिप्रोक्ते नियमांतर्गते क्रियायो
गेंतर्भावः तत्र तप उक्तमीश्वरगीतायां उपवासपराकादिकृच्छ्रचांद्रायणादिभिः शरीरशोषणं प्राहुस्तापसास्तप उत्तममिति स्वाध्यायोपि तत्रोक्तः वेदां

55

नशतरुद्रीयप्रणवादिजपं बुधाः सत्वशुद्धिकरं पुंसां स्वाध्यायं परचक्षते इति ईश्वरप्रधानं च तत्रोक्तं स्तुतिस्मरपूजाभिर्वाङ्मनःकायकर्मभिः सुनिश्चलाभवेद्भक्तिरेतदीश्वरपूजनमिति क्रियायोगश्च परंपर्यासमाधिनाम्नसाक्षात्कारद्वारैव मोक्षहेतुरिति समाधिभावनार्थः क्लेशतनूकरणार्थश्चेत्युत्तरसूत्रेण स्पष्टीकृतं पतंजलिना भज्यते सेव्यते भगवदाकारमंतःकरणं क्रियतेऽनयेति भक्तिरिति करणव्युत्पत्त्या श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनमिति नवधोक्ता साधनभक्तिरभिधीयते तस्याः ईश्वरप्रणिधानरूपत्वेन नियमेऽन्तर्भावः तस्याश्च समाधिहेतुत्वं चोक्तं पतंजलिना ईश्वरप्रणिधानाद्वेति ईश्वरविषयकात्प्रणिधानात् भक्तिविशेषात्समाधिलाभः समाधिफलं च भवतीति सूत्रार्थः भजनमंतःकरणस्य भगवदाकारतारूपं भक्तिरिति भावव्युत्पत्त्या फलभूता भक्तिरभिधीयते सैव प्रेमभक्तिरित्युच्यते त[illegible]क्तं नारायणतीर्थैः प्रेमभक्तिस्तु ईश्वरचरणारविंदविषयकैकांतिकात्यंतिकप्रेमवाहो विच्छि

इति श्रीसहजानंदसंतानचिंतामणिस्वात्मारामयोगींद्रविरचितायां हठप्रदीपिकायां समाधिलक्षणं नाम चतुर्थोपदेशः ४

न्नहृति मधुसूदनसरस्वतीभिस्तु द्रवीभावपूर्विका मनसो भगवदाकारतारूपा सविकल्पकवृत्तिर्भक्तिरिति तस्यास्तु श्रद्धाभक्तिध्यानयोगादवेहीति श्रुतेः भक्त्या मामभिजानातीति स्मृतेश्चात्मसाक्षात्कारद्वारा मोक्षहेतुत्वं भक्तानां सुखस्यैव पुरुषार्थत्वाद्दुःखासंभिन्नातिशयसुखधारारूपत्वेन भक्तिरेव पुरुषार्थ इत्याहुः तस्यास्तु संप्रज्ञातसमाधावंतर्भावः इत्थं चाष्टांगयोगातिरिक्तं किमपि परमपुरुषार्थसाधनं नास्तीति सिद्धं ११४ ग्राह्यमेवेवाबिदुधांहितं यतो भाषणां समयप्यनंरूतं सेगच्छति पयो नलाहितहं वइत्यभिहितं शिशोर्यथा १ सदर्थद्योतनकरी तमस्तोमविनाशिनी ब्रह्मानंदेन ज्योत्स्नेयं शिवांघ्रियुगलेऽर्पिता २ इति श्रीहठप्रदीपिकाव्याख्यायां ब्रह्मानंदकृतायां ज्योत्स्नाभिधायां समाधिनिरूपणं नाम चतुर्थोपदेशः ४

शुभं भूयात् शुभम् शुभमस्तु सर्वजगतां

ह॰प्र॰
५

श्रीगणेशायनमः हिक्काश्वासःप्रतिश्यायःकर्णदन्ताक्षिवेदना मूकताजडताकासःशिरोरोगश्चसज्वरः इत्येवमादयोदोषाजायन्तेव्युत्क्रमेणतु सर्वरोगचिकित्सा
न्वसंक्षेपाद्गुरुणायोगिनां यस्मिन्यस्मिन्भवेद्देशेयोगिनांव्याधिसम्भवः तदङ्गंधियाव्याप्यधारयेत्तत्रधारणां आग्नेयांधारणांध्यायेद्रोगेवायव्यवारुणीवा
यथायेयदोषेचविपुदोषेचसर्वतः अमनश्चिन्तयेत्प्राज्ञःसन्निपातादितस्तथा अन्योन्याभिभवोदेवतावायुञ्जीमधारणां ध्यानेनैवप्रणश्यन्तियेरोगायोग
सम्भवाः भैषजैर्जपहोमैश्चदानप्रयोगैश्चकर्मजाः यथारण्यगजःसिंहःशूकरःप्रयोगतः नाशयेत्सर्पमाशन्तुतथावायुरशुद्धिविः तथैवहियथाहस्तीप्रयोगाद
भ्यतेसनैःनिर्घोषश्चभवेत्कालादश्यःसौम्यश्चजायते शनैःशनैस्तथाप्राणःप्रयोगाद्वश्यतांगतः सद्भयाधार्यतेदेहेनतदोषंकरोतिच यथाप्रचोहि
तोहस्तीपरसैन्यंविनाशयेत् रक्षतेचप्रयोक्तारंमातृत्वश्चबलेनतु तथाशरीरेसंरुद्धःप्राणःसम्यक्प्रचोदितः निर्दहेत्सर्वपापानितच्छरीरंचरक्षति प्रा
णोर्विनिर्जितेदेहेचिन्त्याप्यनेनानिलक्षये नविण्मूत्रश्लेष्मदोषाणामल्पभावःप्रजायते बहुभोजनसामर्थ्यंचिरश्वसनन्तथा आरोग्यंशीघ्रगामित्वमु
त्साहःस्वरसौष्ठवं बलवर्णप्रसादश्चसर्वदोषक्षयस्तथा एवमादीनिचिह्नानिसत्वसम्भवजायते सगर्भस्त्वगर्भश्चप्राणायामोद्विधामतः जपध्यानं
विनागर्भःसगर्भस्तत्समन्वितः अगर्भाद्गर्भधारणश्रेयःप्राणायामशताधिक सगर्भधारयेत्तस्मादिन्द्रियाणांजयात्मकः समस्तेन्द्रियसन्निश्चप्राणाः
वायुप्रकीर्तितः तज्जयादिन्द्रियाण्येवनिर्जितानिभवन्तितु सन्निर्जितमतोयस्मात्संदपरीगीयते तस्मात्तन्निर्जयादेवसन्निमानिर्जितोभवेत् ता
न्वैराग्ययाक्रान्त्याप्राणायामकनेनवा इंद्रियाणिविनिर्जित्यसर्वमेवजितंभवेत् इंद्रियाण्येवतत्सर्वयत्स्वर्गनरकावुभौ निगृहीतविसृष्टानीस्वर्गाय
नरकायच शरीरंरथमित्याहुरिन्द्रियाण्यस्यवाजिनः सारथिप्रत्ययोक्तःप्राणायामकराःस्मृताः ज्ञानवैराग्यरश्मिध्यानमायाम्यविहितस्मृतः शनैर्नि
बद्धस्तथामेतिप्राणायामकराणाहतं मनोवाजिनमत्युग्रंनिगृह्णानपुनःपुनानिवेद्यंपुनर्जेष्ठं कुर्यादेवामनोहितंजलं विंदुकुशाग्रेणमासेमासे
यःपिबेत् सम्वत्सरसहस्रांतुप्राणायामश्चतत्समः तपांसियानियच्छन्तेयजदानवतानिच सर्वतीर्थाभिषेकश्चप्राणायामश्चतत्समः प्राणा

56

रामः
५

स्यैवजयोयोगप्राणस्यैवजयस्तपः प्राणस्यैवजयात्सर्वंशाम्यतेनात्रसंशयः अथप्रत्याहारंवित्तंविसमंभोगमत्वयां भवदोषविचारेणकुर्यान्निर्यमर्द
नः उध्दरेदात्मनात्मानमुह्यमानमनाथवत् भोगनद्यतिवेगेनमहतानहसमाश्रयात् इंद्रियाणिप्रमत्तानिप्रतिश्चंविषयोदपि आकृष्ययोनिगृह्णाति
प्रत्याहारःसमुच्यते एवंयःशान्तचित्तात्मा प्रत्याहारमतःक्रमात् ससर्वनिर्थ्यपज्ञानंफलंप्राप्यशिवंव्रजेत् यच्छापावस्थितंलक्ष्यन्तत्स्मान्नालनेमलः
तावत्कालंप्रदेशेषुधारणामनसास्थितिः कालावधिपरिच्छिन्नदेहेसंस्थापितंमनः नप्रच्यवतियस्माद्धारणासोऽभिधीयते धारणाद्वादशायामा
माध्यानंद्वादशधारणं ध्यानद्वादशकंयावत्समाधिरभिधीयते धारणाभ्यासयुक्तात्मायदिप्राणैर्विमुच्यते कुलैकविंशदुत्तार्यस्वयातिशिवमं
पदं ध्येयेविलायात्मनोयातुशिवचिन्तामुहुर्मुहुः अनाक्षिप्तेनमनसाध्यानमित्यभिधीयते आत्मनस्समनसस्यमुक्ताशेषोपाधस्यच शिवचि
न्तासमाशक्तिध्याननामतदुच्यते ध्येयालम्बनसंस्थस्यसदृशप्रत्ययस्यच प्रत्ययान्तरनिर्मुक्तःप्रवाहोध्यानमुच्यते ध्येयावस्थितचित्तस्यप्रदेशेयत्रकुत्रचित्
ध्यानंतत्रेदमुद्दिष्टंप्रत्ययस्यैवमानता एवंध्यानसमायुक्तस्वदेहंयःपरित्यजेत् कुलस्वजनमित्राणिसमुद्धृत्यशिवोभवेत् एवंमुहूर्त्तमर्द्धम्वाध्यायेद्यश्श्रद्धया
शिवंसोपियद्गतिमाप्नोतिनाप्नात्तद्यज्ञैर्महामखैः यावन्तःकर्मयज्ञाश्चव्रतदानतपांसिच सर्वेतेजपयज्ञस्यनार्हन्तिषोडशींकलां महात्म्यंवाचिकस्यैवजपय
ज्ञस्यकीर्तितं अस्मच्छतगुणोपांशुःसहस्रोमानसःस्मृतः यदुच्चनीचस्वरितैस्स्पष्टस्पष्टपदाक्षरैः मंत्रमुच्चारयेद्वाचाजपयज्ञस्सवाचिक शनैरुच्चारयेम
न्त्रमीषदोष्ठौप्रचालयन्नकिंचिच्छ्रूयतेस्वयंविद्यादुपांशुस्तज्जपस्मृतः धियायदक्षरश्रेणीवर्णाद्वर्णपदात्पदं शब्दार्थचिन्तनाभ्यासंसउक्तोमानसो
जपः त्रयाणांयज्ञानांश्रेयःस्यादुत्तरोत्तरं भवेद्यज्ञविशेषाच्चविशेषस्फलस्यच जपेनदेवतानित्यंस्तूयमानाप्रसीदति प्रसन्नाविपुलान्भोगान्द
द्यान्मुक्तिंचशाश्वतीं यक्षरक्षःपिशाचाश्चग्रहाःसर्पादिभीषणाः जपाक्रान्तशिवंध्यायेजापिनन्नोपसर्पन्तिभयभीतासमन्ततः जपेनपापंसंक्षये
द्दशवंयत्नकृतंजन्मपरंपरासु जपेनरोगाञ्जयतेचमृत्युंजयेनसिद्धिंलभतेचमत्युं जपाक्रान्तःशिवंध्यायेद्ध्यानश्रान्तःपुनर्जपेत् जपध्यानाभियुक्तस्य

हठप्रदीपिका ४९०२

ह.प्र. शिवक्षिप्रं प्रसीदति प्रदार्थमात्रनिर्भासं स्तिमितोदधिवत्स्थितं स्वरूपशून्यवद्भानं तत्समाधिर्हि ह्युच्यते ध्ययेमनःसनीवेश्य यन्निष्ठेन्निश्चलस्थिरं निर्वा
५८ णानलवद्योगी समाधिस्थः प्रकीर्तितः न शृणोति न चाघ्राति न स्पृशति न पश्यति न च स्पर्शं विजानाति न संकल्पयते मनः न चातिमन्यते किंचित् न च बुध्यति
काष्ठवत् एवमाश्वरसलीनः समाधिस्थः प्रगीयते यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ध्यायतः शिवमात्मस्थं समाधिस्थस्य योगिनः प्राणाया
मोऽक्षिप्रं सर्वपापपरिक्षयः सर्वेन्द्रियवशीकारः प्रत्याहारेण जायते मनसः परमस्थैर्यं धारणातः प्रवर्तते ध्यानेन प्रत्ययं गच्छेदैश्वर्यं गुणाष्टकं
प्रसादाभिमुखो भीताभवेत्त्वथ्येनदेव नासमाधिना च सर्वत्र प्रज्ञालोकः प्रवर्तते एवमभ्यस्यतः पुंसः षडङ्गयोगसाधनं तदन्तरायानप्यन्तिमगाति
ह्रस्यादिव आलस्यं व्याधयस्तीव्राः प्रमादस्थानसंशयाः अनवस्थितचित्तत्वमश्रद्धा भ्रान्तिदर्शनं दुःखानि दौर्मनस्यं च विषयेषु च लोलता इ
त्येवमादिका प्रोक्ता योगविघ्नाः प्रभावतः अत्यन्तोत्साहयुक्तस्य नपश्यामःतस्यच तदन्तरायानप्यन्ति सर्वविघ्नाः शनैः शनैः उपशान्तेषु विघ्नेषु समा
धिस्थस्य योगिनः उपसर्गाः प्रवर्तन्ते दिव्यास्ते सिद्धसूचकाः प्रातिभं श्रावणं चैव वार्ता दर्शनास्वादवेदना उपसर्गा योगस्य परित्यागे च सिद्धयः प्रार्थय
न्ति चैनं देवा भोगैर्दिव्यैश्च योगिनः नृपाश्च पृथिवीं दातुं धनं धनाधिपाः उपतिष्ठन्ति रत्नानि धनानि च महान्ति च वेदादि सर्वशास्त्राणि स्वयमेव प्र
वर्तन्ते च अभिप्रेतो हृदयं काव्यस्य प्रवर्तते रसायनानि सर्वाणि दिव्याश्चौषधयस्तथा समस्तानि च शिल्पानि कलाः सर्वाश्च विन्दति नागाः पुरं
कन्याश्च प्रविशाप्रत्यनयन्तीव महामहोदधेर्यद्वत्संगो जायन्ति पिपुव योगैश्वर्यो मेधेलदद्विक्रमणानि मादयः प्रतिभादिकषड्गुणोपात
रुचेतसः सर्वस्य रसैश्वर्यमस्तपं सर्वकामिकं तस्मात्गुणार्थभोगाश्च देवा गुरुमहिमतां त्रगणवद्यल्पमोत्सर्वांनीनिशासनश्चरोऽशीदति ततसम
वदेवाशिबुद्धिमत्वात्प्रवर्तते अणिमादिगुणैश्वर्यमस्मलाज्ञवयोगिनः सर्वलक्षणसम्पन्नाः प्राप्तशाकसदाशुरवो निर्द्वन्द्वाभिर्गुणैश्च मुक्त्वा सन्तिष्ठ राम:
ति अणुप्रहायवाम्यवायदिदेहं नशाम्यजेत् अणिमादिगुणैश्वर्यमस्मिन्नष्टविधं स्मृतः दाता हर्ता च कर्ता च भोक्ता च सर्वेश्वरो वशी ज्ञानां जनोपदेष्टा ५८

९७

श्रीभगवद्भक्तिरसायनम्

४१०२

श्री ५ को सरकार
संरक्षण

॥ ३२।४१।५ ॥

भ.र.वि.
१

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ नमो भगवते महापुरुषाय ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्या-
सं ततो जयमुदीरयेत् ॥ १ ॥ ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं ॥ भृत्यार्त्तिहं प्रणतपाल भवाब्धि-
पोतं वन्दे महापुरुष ते चरणारविन्दम् ॥ २ ॥ अथ महाकारुणिको व्यासः संसाराब्धिपारहेतुरात्मज्ञानमित्युक्त्वा पर-
मपुरुषार्थसिद्धये भगवान्रुकल्पहवपरप्रेमास्पदं तेनात्र प्रणीयः ॥ तेन वेदाज्ञादिसाधनपुरःसरं तत्त्वज्ञानलाभोऽनायासेनै-
व सिध्यतीत सतो भागवद्भक्तिरेव पुरुषार्थलाभहेतुरिति परमेश्वरप्रसादाय सर्वैरेव मुमुक्षुभिरादरणीयामभिप्रेत्य·
तत्त्वज्ञानस्य· तस्मात्सर्वथा भक्तिश्रद्धाप्रणिपातपुरःसरं तद्भक्तिमेवोररीकुर्वन्परमेश्वरसेवा आपणीयतमन्वयव्यतिरे-
काभ्यां प्रदर्शयन्· श्रीभागवतमाह निगमेति ॥ निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं ॥ पिबत
भागवतं रसमालं मुहुरहो रसिका भुवि भावुकाः ॥ १ ॥ अथ श्रीधरस्वामिकृतो भावार्थप्रकाशः ॥ इदानीं तु न केवलं सर्व-
शास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते अपि तु सर्वशास्त्रफलमिदमतः परमादरेण सेव्यमित्याह निगमेति निगमो वेदः स एव क-
ल्पतरुः सर्वपुरुषार्थोपायत्वात्· तस्य फलमिदं भागवतं नाम तत्तु वैकुण्ठगतं· नारदेनानीय मह्यं दत्तं· मया च शुकस्य मु-
खे निहितं· तच्च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया· शनैरखंडमेवावतीर्णं न तूच्चनिपातेन स्फुटित-
मित्यर्थः ॥ एतच्च भावित्वदपि भूतवन्निर्दिष्टं । अनागताख्यानेनैवास्य शास्त्रस्य प्रशस्तेः । अत एवामृतरूपेण द्रवेण संयुतं· लोके हि
शुकमुखस्पृष्टफलममृतमिव स्वादु भवतीति प्रसिद्धं ॥ अत्र शुको मुनिः । अमृतं परमानन्दः । स एव द्रवो रसः । रसो वै सः । रसं

यं
रूप

58

राम:
१

ह्येवायं लब्ध्वानन्दी भवतीति श्रुतेः॥ अतः हे रसिकाः रसज्ञाः तत्रापि भावुकाः हे रसविशेषभावनाचतुराः अहो भुवि गलितमिति अलभ्यलाभोक्तिः इदं भागवतं नाम फलं मुहुः पिबत· ननु त्वगस्थ्यादिकं विहाय फलाद्रसः पियते कथं फलमेव पातव्यमित्यत आह रसं रसरूपं· अतस्त्वगस्थ्यादेर्हेयांशस्याभावात् फलमेव कृत्स्नं पिबत· अत्र रसतादात्म्यविवक्षया रसवत्त्वस्याविवक्षितत्वाद्गुणवचनेपि रसशब्दे मतुपः प्राप्त्यभावात् तेन विनैव रसं फलमिति· सामानाधिकरण्यं· न च फलमित्युक्ते· पानासंभवाद्धेयांशप्रसक्तिः स्यादिति· तन्निवृत्त्यर्थं रसमित्युक्तं· रसमित्युक्तेपि गलितस्य रसस्य· पातुमशक्यत्वात् फलमित्युक्तमिति द्रष्टव्यं न च भागवतामृतपानं मोक्षेपि त्याज्यमित्याह· आलयं· लयो मोक्षः अभिविधावाकारः। लयमभिव्याप्य न हीदं स्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतु सेव्यत एव· वक्ष्यति हि। आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे॥ कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति॥३॥ स्कं।१ अ१। अन्यच्च॥ पिबंति ये भागवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं॥ पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकमित्यादिः॥ अस्य भावार्थः॥ श्रवणादिकफलमभिनयेनाह पिबन्तीति॥ सतां· आत्मनः। आत्मत्वेन प्रकाशमानस्य· कथैवामृतं विषयैर्विदूषितं मलिनीकृतं आशयं पुनन्ति शोधयन्ति· तस्य चरणोपकण्ठान्तिकं। श्रीविष्णुपदं व्रजंति॥२।४॥ द्वितीये द्वितीये॥ चित्तशुद्धे भगवति भक्तिमुत्पादयति· तथा· पुरुषार्थसिद्धिरिति॥ उक्तं च॥ नह्यतोन्यः शिवः पंथा विशतः संसृताविह वासुदेवे भगवति भक्तियोगो यतो भवेदिति॥ २२।

॥श्रीराघवाय॥

ज्ञस्य भावार्थः॥ संसृतिसंसरतः पुंसो बहवो मोक्षमार्गाः तपोयोगादयः। सर्वोत्तमस्वमेवैतासां हानहीति॥ यतोनुष्ठिताद्भक्तियोगो भवेत् अतो यः शि
वः सुखरूपो निर्विघ्नश्च नास्त्येव॥३॥१।२॥ भक्तियोगलक्षणं भागवते तृतीयस्कंधे एकोनत्रिंशदध्याये कपिलदेवेनोक्तम्॥ मद्गुण
श्रुतिमात्रेण मयि सर्वगुहाशये॥ मनोगतिरविच्छिन्ना यथा गांगांभसोम्बुधौ॥ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्॥ अहैतु
क्यव्यवहिता या भक्तिः पुरुषोत्तमे॥११।१२॥ अनयोर्भावार्थप्रकाशः॥ निर्गुणा तु भक्तिरेकविधैव तामाह मद्गुणश्रुतिमात्रेणे
ति द्वाभ्यां॥ अविच्छिन्ना संतता अहैतुकी फलानुसंधानशून्या अव्यवहिता भेददर्शनरहिता च॥ मद्गुणश्रुतिमात्रेण मयि पुरु
षोत्तमे मनोगतिरविच्छिन्ना या भक्तिः सा निर्गुणस्य भक्तियोगस्य लक्षणमित्यन्वयः। लक्षणं स्वरूपं॥११।१२॥३।२९॥ एतदेवार्थमा
चष्ट स्वामिमधुसूदनोपि यथा॥ संसाररोगेण बलीयसा चिरं निःपीडितेनेत्यप्रकृष्टमेतिनिःशेषितं॥ इदं भवद्भिर्बहुधा यथा नितांतं निपीय
तां भक्तिरसायनं बुधाः॥१॥ द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता॥ सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते॥ इति॥ बुधा इति
संबोधनं भागवतानान्तन्वुधानामुपलक्षणं। भगवद्धर्मेत्र भगवद्गुणश्रवणं। अत्र भक्तिलक्षणे अविच्छिन्नेति धारावाहि
कता दर्शिता हष्टांतेन दार्ष्टांतिकेपि मनसि द्रवावस्थापेक्षिता। मयामि सर्वेशाकारतः प्रतिपादिता॥ एतादृशी द्रवावस्था चे
तसि प्रविष्टा सती विषयाकारेण स्थिता सापि चेतसोनन्वेति भिन्ना न भवति। सा वासना भक्तिः। कारिकार्थस्त्वित्थं यद्गु
रुभिः कृत एवास्मत्र॥ यस्य एकदा द्रुते चित्ते भगवदाकारता प्रविष्टा सा सर्वदा न द्रवान्तरे नश्यो भवति॥ तदुक्तं भागवते रामः
येद्धर्मिरूपस्योत्तमाहत्येपेणैः सर्वभूतेष्विति॥ आत्मनः स्वस्य भूतेषु स्वभावेन सम इत्यन्वयः। यः प॰प॰ परूप॥ तथा ब्रह्मरूपत्र्या २

मूलं·पत्रा०८१॥

मूलं प७।प१॥ मू·प७·प१ ॥

त्मन्याविष्टानेव भूतानि च यः पश्येत्॥ यद्वा आततत्वाच्च मातृत्वादात्मा हि परमो हरिरिति तंत्रोक्तेः आत्मनो हरेः सर्वभूते-
षु मशकादिष्वपि· नियंतृत्वेन वर्त्तमानस्य· भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येत्॥ ननु तस्य तारतम्य· तथात्मनि हरावेव· भूतानि
च पश्येत्· कथंभूते भगवति स्वप्रभुत्वैश्वर्यादिरूपेण· पुनर्जडमलिनभूतात्मत्वेन· ज्ञाद्यादिप्रकाशात्मैश्वर्यादिषु अपि पश्येत्॥ स सर्व-
त्रापि पूर्णं भागवत्त्वं पश्यन्· भागवतोत्तम इत्यर्थः॥४५॥ प्रेम च मैत्री च कृपा च उपेक्षा च ताः ईश्वरादिषु यः पश्येत्· करोति च·
स मध्यमो भागवतः॥ एवंभूतस्य भेदस्य दर्शनात्॥४६॥ अर्चायां प्रतिमायां पूजामीहते करोति न तद्भक्तेषु अन्येषु च· सुतरां न क-
रोतीति प्राकृतः प्रकृतिप्रारंभः। अधुनैव प्रारब्धभक्तिः शनैरुत्तमो भविष्यतीत्यर्थः॥४७॥११।२॥ इयमेव वृद्धावस्था प्रणयअ- मूलं प७।प१॥
नुरागस्नेहादिशब्दैरपि संकीर्त्यते॥ तस्माद्भागवतलक्षणं दर्शयति विसृजतीति॥ हरिरेव स्वयं साक्षाद्यस्य हृदयं न विसृज-
भिः ति। न मुंचति· कथंभूतः अवशेनाप्यभिहितमात्रोऽपि अघौघं नाशयति· यः सः· तत्र किंनु विसृजतीति यतः प्रणयरसनया धृ-
तं हृदयेन बद्धं अंघ्रिपद्मं यस्य सः भागवतेप्रधान उक्तो भवति॥५५॥११।२॥ वृद्धावस्थाप्रविष्ट· भगवत्स्वरूपभानस्य त्रिवि-
धत्वादुत्तमभागवतोपि त्रिविधः॥ तत्राद्यं प्रपंचस्य भानसहितं यथा॥ खं वायुमग्निमिति॥ किंच खमाकाशं सत्वानि भूता- मूलं।७।२॥
नि आकाशादि यत्किंचित् भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत्· संभावनायां लिङ्॥४१॥ ॥११।२ अनेन प्राकृतो भाग-
मू७।२ वतोत्तमः। द्वितीयं प्रपंचमिथ्यात्वभानसहितं यथा॥ तस्मादिति॥ [illegible] अथ प्रकारः
॥ ननु भगवन्नयनानां रागाणामतिंसप्रपंचस्यासत्वे· कथं मत्वप्रतीतिरिमां मायां सपरिकरामुपसंहरन्· परिहरति॥

से

मू॰७।८२॥

भ·र·बिं· ॥अखिलविश्वं तन्निरस्तप्रतिभासं त्वय्येव तदुत्पन्नः उद्भवतः अपि यतः न रूपतः स्वादि वेत्ति उपलक्षणमेतत् समभिव्यक्त सुखमिव· वेमन
३ मिव· अविद्यानभूतस्य न वस्तुनः। तथा भा॰ गीतासु ~~र्थः~~॥२२॥ स्कं॰१०॥ अ॰१४॥ अनेन मध्यमो भागवतो ग्रमः॥ ॥
तृतीयप्रकारद्वयेनापि प्रपंचभानरहितं यथा॥ ध्यायतस्त्विति॥ प्रकारः। भावेन भक्त्या निर्जितं वशीकृतं यच्चेतः तेन औत्कण्ठ्येनाकुल
मू॰७२ लाश्रुकलाक्षस्य·॥१७॥ प्रेमातिभरेण निर्भिन्नपुलकानि अंगानि यस्य· आनंदानां संप्लवे महापूरे पेमानंदे उभयं·
आत्मानं परं च॥१८॥ स्कं॰१।६॥ अनेनोत्तमो भागवतो ग्रमः साधनाभ्यासपरिपाकेनोत्तरोत्तरभूमिकालाभः। सर्वलक्षण
पुरुषत्वाद्भगवद्भक्तिघटितत्वाच्च· प्रायशो भक्तिरसायनग्रंथे श्रीभागवतश्लोका उदाह्रियंते· अतो भक्तिरसविन्दावपि तेषा
मू॰८१ मेव प्रकाराः स्वामिकृतः सुबोधाय लिख्यन्ते॥ ऋतेऽर्थमिति॥ यथा समायया योगेनेत्यतेन मायाया अपि परत्वाद्दृश्यमाणो योगित्वा
त्रमायां निरूपयति· ऋतेऽर्थं विनापि वास्तवमर्थं यद्यतः किमप्यनिरुक्तं आत्मन्यधिष्ठाने प्रतीयेत· सदपि च न प्रतीयेत। तत् आत्मनो
मम· मायां विद्यात्· यथा आभासो द्विचंद्रादिरिति· अर्थं विनापि प्रतीतेः। दृष्टांतः यथा तम इति सतोऽप्रतीतौ॥३३॥ स्कं॰२।९॥ भगव 60
मू॰११॥ द्वैयकात्म्यं निवर्तते॥ तदभाभासमिति॥ अस्य वस्तुनो बलं कार्यं यस्य· विक्रियालक्षणं॥ अथेति गान्त्रहेदुमितसुहृदः
उत्तमः॥२४॥२।३॥ भक्तियोगं यावन्मनोलयं। मनोलया पूर्वकाले संसारस्य व्यपदेशात्। संसारं जीवात्मनो लयः एत रामः
च्च सूत्रकारेण दर्शितं तदाऽपीतेः संसारव्यपदेशादिति· अपीतिर्लयः। मर्यादायामाङ्। न तु लये सतीति सूत्रार्थः॥ ३

३

मु॰ ७५३ । ८५ । १० ॥

उक्तं ॥ यर्ह्यब्जनाभचरणैषणयेति ॥ ननु यदि सुषुप्तौ कूटस्थात्मानुभवो भवेत्तर्हि कथं पुनरपि संसारः स्यात् अविद्या-
नसंस्कारात्मनाविद्यमानत्वादिति चेत् कदा तर्हि तन्निवर्त्तकोनुभवो भवेत् अत आह यर्हीति ॥ अथ श्लोकार्थप्रका-
शः ॥ नित्रैगुण्यादिविलयः केवलमब्जनाभस्यैव चरणैषणया या उरुभक्तिः तया पुमान् चेतसो मलादि विधमेत्
नाशयेत् । चेतनएव वा कर्त्तृत्वगतानि मलानि तया भक्त्या क्षालयेत् तदा तस्मिन् विशुद्धे चेतसि सति साक्षादव्य-
वधानेन आत्मतत्त्वमुपलभ्यते अमलयोर्दृशोः स सोर्यथा पूर्वमेव सिद्धः सवितृप्रकाशः ॥ तथा ॥ यथेति ॥ अप॰ 11।3।40 ॥ ११।३।२ ॥
प्रकाशः ॥ अपि च भक्त्यैवात्मशुद्धिर्नान्यतः इति सदृष्टान्तमाह यथाग्निनेति ॥ यथाऽग्निना ध्मातं हेम सुवर्णं तापितं
तमेव स्वं निर्मलं जहाति निजं सालत्तादिभिः स्वं निजरूपं च भजते कर्मानुशयं कर्मवासनां मां भजते मद्रूपतामा-
पद्यते ॥ ननु ब्रह्मविदां ज्ञानिनां परं तमेव विदित्वातिमृत्युमेतीत्यादि श्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्तेः स्वात्मप्रा-
प्तेर्वक्तव्यत्वे कुतो भक्तियोगेनेत्युक्तं तत्राह यथा यथेति ॥ आत्मा चित्तं परिमृज्यते शोध्यते मत्पुण्य- पुतं।२ ॥
नां कथाश्रवणकीर्तनाभिध्यानैश्च भक्त्यैव अन्यव्यापारेण ज्ञानं न तथेत्यर्थः ॥ किं च ज्ञानं नाम चित्तस्य मदा-
कारपरिणामः स च मां भजतः स्वभावत एव भवति न च यत्नान्तरमपेक्षत इति सदृष्टान्तमाह विषयानिति ॥ त-
दुक्तं ॥ अनुध्यायन्तमर्थं विश्वं कामुकाः कामिनीमयं ॥ नारायणमयं धीराः पश्यन्ति ज्ञानवत्सुषुप्ति यस्मादस्य

१२।५२॥

भ॰र॰वि॰ स्तावत्वं तत्फलत्वं च · स्वप्नमनोरथवत्त्वे भजनमंत्रेरणां सद्दृभि ध्यानमात्रं तत्रास्मादि हृदयमध्ये च मनः समाहितं कुर्वीत इति प्रक
४ रणार्थमुपसंहरति तस्मादिति ॥ मद्भावभावितेन मद्भावेन मद्भक्तेनैव बोधितं ॥ २ पारहद ॥ २१ ॥ २२ ॥ स्कं॰ ११ अ॰ १४ ॥ सत्व
११।१३।१२ कपिलदेवेनोक्तः ॥ अनिमित्तइति ॥ अथ प्रकारः ॥ न प्रकृतिसंबंधमात्रं बंधहेतुः किंतु गुणवृत्या तदासक्तिः तन्नि
वृत्तौ मत्यां भावयतेकश्चिद्दुष्प्रवत्सा साधनं वैकल्यादिसमपि प्रेत्य साधनातिराधं कथयन् परिहरति त्रिभिः ॥ निमि
त्तं फलं तन्निवृत्तं प्रवर्तकं · यस्मिन्निष्कामेन धर्मेण · अप्रमत्तात्मना निर्मलेन मनसा · युक्तेन कथाश्रवणेन संप
११।१३।२१॥ न्नया पुष्ट्या ॥ २१ ॥ जानेनेति ॥ २२ ॥ दृश्यमाना अभिभूयमाना · निरोहिता भवति ॥ एवं च सति पुनरुद्भवो नास्ती
११।१३।२२॥ त्याह ॥ २२ ॥ स्कं॰ ११ । २८ । हंसगीतायां च ॥ गुणेष्विति ॥ अथ प्रकारः ॥ विषयेषु सुखभावनो रागादिवशाच्चेतः प्र
विशति ॥ तेनानुभूता विषया वासनारूपेण चेतसि प्रविशन्ति · अतितितीर्षोः ॥ विषयानतिक्रमितुमिच्छोः ॥ १७ ॥
११।१३।२८ र्वृत्ति सनकादिप्रश्नस्योत्तरं ॥ जागणावान्तावा ॥ मनसेति ॥ प्रकारः ॥ तत्र प्रपंचात्मकत्वं प्रत्यक्षादिसिद्धमेवेति
परमकारणाभेदमेवोपपादयति · मनआदिभिर्यद्गृह्यते तत्तदहमेवेत्यर्थः ॥ अंजसा तत्त्वविचारेण एतेनैव सर्वात्म
११।१३।२७॥ कोहमिति अंजसा पुत्रप्रश्नोक्तं भवतीति ॥ २४ ॥ जाग्रदिति ॥ प्रकारः ॥ ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थत्वरूपता · तत्रा राम॰
ह ॥ जाग्रत् जागरः स्वप्नः सुषुप्तं चेति बुद्धेरेता वृत्तयः ॥ नात्मनः स्वाभाविक्यः ॥ किंतु सत्वाज्जागरणं विद्यात् · रज ४

61

सास्वप्नमादिदेहेत॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततमिति॰ वस्तुमारभ्य क्रमेण गुणत्रयव॰जीवस्तु विलक्षणस्त
दवस्थारहितः एवं विनिश्चितः कुतः तासां साक्षित्वेन॥ २०॥ ननु तर्हि कथमहं जाग्रत्स्वप्नादिष्वनीतिरुल्लेखस्तत्राह। यर्हीति मू॰१४८१॥
प्रकाशः। यदि यस्मात्सम्यक्त्वनिःसरणमनर्थनिसंसृतिर्बुद्धिः॥ न पावं वो यमात्मने गुणत्वश्रीर्ददाति तस्मात्
मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात्। तत्तदा॰गुणत्वेन तसां गुणानां वर्तनस्थानामस्यागो भवति। २८। कथं
संसृत्याबंधं॰कथं वतेजस्यात्। तदाह। अहंकारेण कृतं बंधं आत्मनः अर्थविपर्ययं आनंदघावरत्वेन अनर्थहे
तुदिह्यानज्ञानानुसन्॰निर्विघदुःखमेतदिति ज्ञात्वा तुर्ये स्थितो भूत्वा॰ संसारवृत्तिं तां संसारबुद्धिः। तस्मिंश्चिंताम
भिमानं तत्कृतान्भोगादिंतां त्यजेत्॥ २९॥ यावदेवं न त्यजेत्तावत्तस्य कर्मजं देहसंबंधमित्याह। यावदिति॥ यद्य ॥१४।१॥
पि जागर्तिकर्मादिषु॰ तथापि स्वपतः स्वप्नात्स्वप्नांतरमिव भवति॥ यतो ऽतः आत्मप्रदर्शी अतो जागरत्वमस्य स्वप्नत्वे
दृष्टांतः। स्वप्नइति॥ ३०॥ ननु वेदप्रमितत्वदर्शी आत्मकर्मादिना नाधीः कथं निवर्तेत। तत्राह असत्त्वादिति॥ भावा ॥१४।१॥
नां देहादीनां तत्कृतानि दावर्णाश्रमादिरूपा॰णां नयः स्वर्गादिफलानि॰ हेतवः कर्माणि वा स्यात्मनो मृषा अ
विद्यावद्विषयो वेद इति भावः॥ ३१॥ ततः किमत आह एवमिति॥ गुणतो यो एतानुनसञ्चवस्थास्तामद्विध
धर्मापयिकृताः ननन्वतः संनीतिनिश्चितआत्मरूपोऽर्थो येस्ते पूर्वं अविलंबं या नामापि आधीयते स्मि
॥१४॥१॥

भ·रुवि· भिन्निश्चापिः। अहंकारः। तं संदिग्ध·रा दृहृदिस्थितं मां भजतां केनचित्त्वात् तदाह अनुमानैः सदुक्तिभिः सत्ताद्युपदे
५ शैः श्रुतिभिश्च मो स्तेन ज्ञानखड्गेन॥२२॥ स्कं ११। २२॥ ॥ तस्मादेतदेहाद्युक्तानुसंधानेन सर्वाधिष्ठानसन्मा
त्रं परिपूर्णचिदानंदघनं भगवंतमद्वयमात्मानं निश्चित्य ततो वैराग्यमस्तदुपजायते॥ यथामुमुक्षुरस्य
तदेवं विघ्नसंबा मार्गे भगवत्सेवामार्गे च· निविश्य· वैराग्यवृत्त्या ध्वनितपदुक्तं· ततो नरमाह· नकामयन्ते॥ अकिं ॥१५।१।२॥
म चना निरस्ताभिमानाः। आर्यो विवेकी॥५६ वाक्यार्थस्तु·
॥१५।१। तस्मादिति। रजस्तमःसत्त्वगुणैरनुबध्यंत इति तथा ताः। ऐश्वर्यादिरूपा जन्ममरणादिधर्मादिरूपाः विसृज्य परं
पुरुषमीश्वरं जप्तिमात्रं ज्ञानघनं· कुतः· निरंजनं· न तु कुतः· निर्गुणं तदपि कुतः· अद्वयं अत एवाक्षरं नाश
रणं भजन्ति·इति॥५७॥ मुमुक्षवस्तावत् भोगान्केवलं न तु कुर्वन्त्येवेति। पुनः वरैः प्रलोभ्यं तं ऋषी रूपाद्यपग्र
॥१५।१॥ हृतो न प्रार्थयते विरामेति॥ प्रकारान्तरं त जिनैः कर्मफलैरानैः शुनस्तु हा सतामभिस्तूयमानः तत्रापि अविद्
यखंडभिन्नः तडेवतद्यातस्थानविनामानरस्थाः यडमित्रो ह्यात्रवः इन्द्रियलक्षणो यस्य सः अत एवालब्धरा रामः
तिः कथं विदेव बनात्त्वब्धवृत्तां निरिति वाहारणं स्वज्ञानं तदाती निति तथा देहारणे इसमुपनः प्राप्तो हां अ ५
णोकं वेहतुः अभयं नवापि हेतुः। ततं आपन्नो। आपदा व्याप्तं पाहीति॥५८॥ स्कं १० अ ११ एनाध्यायेन दशाध्याय व

62

४

भगवत्प्रेमाख्यां परां काष्ठामधिरोहति नं प्रति भगवतो भक्तं सात्वधर्मस्थितं रतिः॥ पु-त्रा॥ अभ्यासेन वाभीयं तस्य पस्ति लोक ।१५।१॥
॥१५।१॥ संग्रहे प्रवर्त्तयति सात्वधर्ममिति॥ हरः॥ नमनीति॥ ६४॥ का कार्यतु।
॥१०।५१॥ तपसा परवैराग्यं सूचितम्॥ परवैराग्यस्य· लिंगं मोक्षपर्यन्तसर्वफलनिरपेक्षत्वं॥ यथा स्वर्गं लोकमिति॥ ।१५।१॥
प्रकाशः॥ एवं भूतानमुक्तिः एकान्तभक्तेः मोददामीत्याह त्वमिति द्वाभ्यां। उभयापि नं लोकद्वयगामिनं। आत्मानं सोपा
धिकं· आत्मानं मनुष्यपुत्रकलत्रादयः। पशवपश्वादयः। रायः धनानि॥ हरः। विसृज्येति। अन्यांश्च परिग्रहान्· मत्तोः ।१५।१॥
संसारात् अनिवारयेत् अजितो रयोमि॥ ४०॥ हर॥ तथा॥ भक्तानां निष्कामतां के मुत्त्यमायेनाह। सालोक्यमिति। सा ।१५।१॥
लोक्यं मया सह एकस्मिन् लोके वासः। सार्ष्टिः समानैश्वर्यं। सामीप्यं निकटवर्त्तित्वं। सारूप्यं समानरूपत्वं। एकत्वं सायुज्यं
उत अपि· दीयमानमपि न गृह्णन्ति। कुतस्तत्कामनयेत्यर्थः॥ १३॥ स्कं ३। अ २९। तथा भक्तेः गरिष्ठत्वमेवोपपादयति नैकात्म
॥१५।२ तामिति॥ एकात्मतां सायुज्यं· मोक्षं· मदर्थे आरब्धक्रिया येषां प्रसज्ज अप्रसक्तिः कृत्वा· पौरुषाणि वीर्याणि॥ २५॥ हर॥ तथा
पारमेष्ठ्यं ना मेवाह न पारमेष्ठ्यमिति॥ रसाधिपत्यं पातालाधिपत्यं अपुनर्भवं मोक्षमपि मद्विना मां हित्वा· अन्यं नेच्छतीत्यर्थः ।१५।२॥
॥१५।२ हमेव तस्य प्रेष्ठ इत्यर्थः॥ १४॥ ११।१४॥ प्रह्लादः वि·पु· स्पष्टं॥ पशुः। न कामयन्तीति प्रकाशः। पूर्वश्लोके केवलमपने·रितिथ स
वाधितं तेन· केवलं वरिष्यामीति भाष्यं। कीदृशात् न कामयन्ति। महत्त्मानां मनत्वहृदयात्सुखदुःखारेणा निर्गतो भवन्नाजीभोज
मकरन्दो यस्य श्रवणादिसुखं यत्र नास्ति ताहशं चेत केवलं तेहितन्व कचित्कदाचिदपि न कामये· तर्हि किं कामयसे

म·र·विं· तदाह। पृथुः श्रवणाय कर्णानामयुतं विधत्स्व न तु कोप्येवं न वृतवान्· किमन्यच्छ्रितये स्याह· एषएकमेव वरः। ममत्वेष वरद्रुग्नि
६ ॥२४॥ स्कं·४।२०। ध्रुवः। ननु स्वर्गादिसुखं सकामैः प्राप्यते निष्कामभजने तत्कथं स्यादित्याह· यानिर्हतिरिति॥ स्वमहिमनि ॥१५।२॥
निजानंदरूपे पिमाभूत्· न भवतीत्यर्थः। अंतकस्यासिना कालेन लुलितात् खंडितात् विमानात्पततां सा नास्तीति कि
॥५१।२॥ मुवक्तव्यं॥४।९।१०॥ माद्रिश्यः। न वयमिति। साम्राज्यादि न कामयामहे। किंतु· एतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामया
महे इति। ननु तस्य गदिरेणापूर्यं सर्वसंपद्राजः किमेकं काम्यते॥ अत आहुः। हे साध्वि साम्राज्यं सार्वभौमं पदं स्वा
राज्यमिंद्रपदं। भौज्यं तद्भक्ष्य· भोगभाक्त्वं विविधं· राजत इति विराट्· तस्य भावो वैराज्यं अणिमादिसिद्धिभाक्त्वमित्यर्थः
पारमेष्ठ्यं ब्रह्मपदं। आनंत्यं मोक्षं· हरेः पदं तत्सालोक्यादि न तु कामयामहे इति। यद्वा वटूर्च ब्राह्मणो क्रमेण प्रा 63
गादि दिक्षु तु र्थ्या विपत्यानि साम्राज्य भौज्य· स्वाराज्या वैराज्यानि· भारव्येयानीति॥४१॥ १०।८३। रुद्रः। प्रत्यानीतेति। ॥५१।२॥
रुद्रं नु नमास्माकं हविर्भागादिलाभः पुरुषार्थः। किंतु त्वत्परिचर्यैव· भवता पुनरानेन संरंभेण· स्वकार्यमेव साधितं· तस्य चासिद्ध
द्धत्वादुपसंहर· एतं क्रोधमित्याह्येनाह· दक्षप्रजेनोक्तान्· त्रायमानाः सत्ता स्वीयाः स्वभागादेर्भाग्यमाप्त्याहताः। अंतर्यामि
नैवलवेद· यद्बुभुक्षत्वान्न· अस्मदीयं हृदयकमलं वत्स्वकृतहस्मैवेता वत्सर्यत्र भयहेतत्त्वेनासमत्वमतिपथे नित्यं स्थितेः राम·
दैत्येन आक्रांतस्य पाप्मनः· प्रत्यवोचि· भयाद्याकराणां न विकारीनीतं· तवैव ता वैष्णवी सा पत्नी भयमुपमर्द्दनिवेन्न ६

॥१५॥२॥ ग्राहा कालग्रस्तमिति ॥ ते त्वां हे नारसिंह नरस्येव सिंहस्य वाकाराभ्यामाविर्भूतः ॥४८॥ ७ । ८ ॥ तथा यस्य भक्तिरिति ॥ तस्य तव रवा १५।२॥
तको देवैः गन्धर्वादि जलोपमैः । स्वर्गादिभिभिः किं ॥२२॥ स्कं ६ । १२ ॥ वृत्रः ॥ नो नाकपृष्ठमिति ॥ ननु किं दास्येन ननु त्वं महापूजा १५।२॥
नित्यस्यामित्यत आह नाकपृष्ठं ध्रुवपदं ब्रह्मलोकादिकं च हे समंजस निखिलसौभाग्यनिधे त्वां विरहय्य पृथक्कृ
त्य न कांक्षे नेच्छामि ॥२५॥ ६ । ११ ॥ श्रुतयः ऊचुः ॥ दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्र
मणाः न परिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः ॥२१॥ अथ प्रकाराः ॥ भक्तिरल्पसा
धनमिति वचनमनुचितमिव मन्वानो भक्तिं गुरूकरोति दुरवगमेति भो ईश्वर दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञापनाय आत्ततनो राविः
र्भूतमूर्त्तेश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः चरितमेव महानमृताब्धिस्तस्मिन्परिवर्तोऽवगाहस्तेन परिश्रमणाः परिवर्जि
तार्थः श्रमणां श्रमः गतश्रमा इत्यर्थः अपवर्गमपि केचिन्न परिलषन्ति नेच्छन्ति कुतोऽन्यदिन्द्रपदादि केचिदिति एवंभूता भक्ति
रसिका विरला इति दर्शयति न केवलमनन्यन्नेच्छन्ति किन्तु तेनैव सुखेन पूर्णाः सन्तः पूर्वसिद्धं गृहादिसुखमप्युपेक्षन्ते इत्या
संग ह तव चरणसरोजहंसकुलैर्विसृष्टगृहा इति तव चरणसरोजे हंसाः ईश्वरमनोरमाः ये भक्तास्तेषां कुलं तेन संगस्तेन विसृष्टा गृहा
रा यैस्ते तथा । अनेन श्रवणकीर्त्तने दर्शिते श्रुतिश्च मुक्तेरप्याधिक्यं भक्तेर्दर्शयति तथा च यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिन
श्चेति व्याख्यानं च सर्वज्ञैर्भाष्यकृद्भिः मुक्ता अपि लीलाविग्रहं कृत्वा भजन्त इति त्वत्कथामृतपाथोधौ विहरन्तो महामुदः
कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥२१॥ १० ॥ ८७ ॥ एतादृशं मोक्षपर्यन्तं सर्वफलनिरपेक्षरूपे परे वैराग्ये सति फला

भ·र·वि· नरे प्रेम्णोनुदयात्परमानंदरूपे परमोस्त्येव प्रेमा परां काष्ठामारोहति॥ यथा वृत्तेस्या॥ उदाहरणं अजातपक्षा इति॥ प्रकाशः॥ नहि ॥१८।१॥
८ किमिव इत्यत आह अजातपक्षाः खगाः शूकादिभिः पीडिता यथा मातरं। तथा च वत्सतरा वत्साः बालवत्साः स्तन्यं यथा च क्षुधितं दूरदेशगतं
प्रियं कामेन विषण्णा प्रिया। तथा मे मनस्तापत्रयपीडितं कर्मबद्धं च कामादिभिर्विषण्णं च त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः॥२६॥ स्कं६
॥१८।१ अ·११॥ तदर्थं ज्ञानवैराग्ये दृढीकर्तव्ये॥ तदुक्तं॥ असेवया इति॥ तदेवं प्रकृतेर्गुणानां असेवया ज्ञानादिभिश्च अयं जीवः इहैव देहे 64
॥१८।१ मामेव अवरुन्धे प्राप्नोति॥२७॥३॥२५॥ तथा ज्ञानवैराग्ययुक्तेनेति॥ प्रकाशः॥ मद्भजनादेव मोक्षस्तत्र सदाचारं प्रमाणयति॥
४३॥३॥२५॥ एतावानेव लोकेस्मिन् पुंसां निःश्रेयसोदयः॥ तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम्॥४४॥३॥२५
ननु सा हि योगिनामपि बहुजन्मभिर्दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन्नेव जन्मनि भवेदित्याशंक्याह भक्तिरिति॥ प्रपद्य ॥१८।१॥८
मानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पदभगवद्रूपस्फूर्तिः तथा निर्वृतस्य ततोन्यत्र गृहादिषु विरक्ति
रित्येष त्रिकः एककालः भजनसमकाल एव स्यात्। तथैवमेकैकस्मिंभजने क्रिविस्रमादित्रिके जायमाने अनुवृत्त्या भजतः पर
मप्रेमादि जायते। ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह इत्यच्युतांघ्रिमिति॥४३॥ स्कं ११। अ २॥ भागवतस्य भगवद्धर्मानुष्ठा ॥१८।१॥
नं प्रथमं भगवत्प्रबोधः॥ ततः परं वैराग्यं॥ ततः प्रेमलक्षणा भक्तिरिति। एतच्च दर्शितमुद्धवाय श्रीभगवता॥ ज्ञानिन इति १८।१॥
॥ यस्मादहमेव तस्येष्टः अपेक्षितः स्वार्थः फलं हेतुः तत्साधनं च संमतः स्वर्गोभ्युदयश्च। अपवर्गः संसारनिवृत्तिश्च। अतस्त रामः
स्य न प्राप्यं कृत्यं वा किंचिदस्तीत्यर्थः॥३॥ स्कं ११। अ १९। अत्र विद्वदनुभवं प्रमाणयति ज्ञानेनेति। यथोक्तं ज्ञानिनमभिनन्दन्ति १८।१॥

ज्ञानोतिपतोऽसौ तानेन मां धारयति ॥२॥ कीदृशं तद्ध्यानमित्याकांक्षायां संक्षेपेण तदुक्तो उद्धवेति । तदेव ज्ञानं संक्षेपेन उपदिश ॥१८।१॥
॥१८।१॥ ति त्वयीति । त्रिविधोऽध्यात्मिकादिविकारः । देहादिः सः मायानन्तपरमार्थः । यत् यस्मात् अग्रे तराभव्य एवापतति । र
ज्जौ सर्पमालादिवत् । नाद्यपवर्गयोः तत्वादावन्ते चास्ति यत् यदात्मस्य विकारस्य । अतो जन्मादयः स्युः । तदानस्पतवाधि
ष्ठानभूतस्य किं तत्किंचिदित्यर्थः । तस्यापि वस्तुतोऽनन्तसंनितस्यासत्वादित्याह । आद्यंतयोरिति । अस्तत्वः सर्पादेः आद्यंत
र्ज्जौरि योर्यदस्ति तदेव मध्येपि । ननु सर्पादिस्तद्रूपविकारो नास्तीत्यर्थः । यद्वा । आद्यन्तयोर्यदस्ति तन्मध्येपि अस्तु एव तेन तस्य जन र
न्मादयः संति अतस्त्वं निर्विकारं ब्रूहीति ॥ ७ ॥११।१२॥ भगवद्व्यतिरिक्तं सर्वं मायामात्रमापाद्य । साधिकं हेयं नित्यमोविमु
॥१८।२॥ क्षोपादेयः । भगवत्कृतानामुद्धवे तदेवोक्तं । तथाप्यत्र । उद्धव उवाच ॥ कर्मणामपारं भवमाराण्ययमिति । अथ प्रकारान्तरेण भक्तिं ब
लिं केवलानात्मनः उपाय इति अभिप्रेत्य भक्तिमेव साधनं निरूपयति ॥ तत्र प्रथमं वैराग्यद्वारा गुरूपास्तिमाह
कर्माणीति । दुःखहत्ये दुःखप्रतीकाराय पाकविपर्यासं फलं वैपरीत्यं । मिथुनोचारिणां मिथुनीभूय प्रवर्त्तमानानां
म् ॥१८॥ ११।२॥ कर्मभिः साधितान् अपि वित्तादयोऽनमुखहेतवइति वपरत्वादित्याह । नित्यार्तिदेनेति । प्रकाराः । अ ॥१८।२॥
पि नन्तः खस्यममुखरूपेण । वन्तैः अतएव अनित्यैः अयापिनिरस्य । काप्रीतिरित्यर्थः ॥१९॥ तथाप्येवं लोकमिति । एवं १८।२॥
लोकं परमिति कर्मनिर्मितत्वान्नश्वरं । तथावमन्तिः ॥ तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचि
तो लोकः क्षीयत इति ॥ किंच वर्त्तमानसमयेपि दुःखयुक्तं पदरूपदित्याह सतुल्यातिशयध्वंसं सहतुलेन अतिशये

भ॰रवि· नध्वंसेन च वर्त्तमाना। अनतस्तु स्पेसर्वानित्रापेन्य सूया॥ ध्वंसा लोचने भयादिकं वा पदरिहार्यमित्यर्थः। यथा स्वं स्वं डमरुलपती
८ नां च्वर्थः स्वर्ग्गादि न दृष्टा।२६॥ ए।२॥ वासुदेवातिहन्नं सर्वं नास्ति मायिकत्वात्॥ वासुदेवात्मकत्वाश्रियनमतः सत्यमित्यर्थः
॥ एतादृशज्ञानपूर्वकवैराग्यं दर्शितं· भगवता· भागवतशास्त्रे· एकादशस्कंधे॥ श्रुतिःप्रत्यक्षमिति॥ अथ प्रकाशः॥ वैरा ॥१६।२॥
ग्यमाह श्रुतिरिति द्वाभ्यां॥ श्रुतिः नेह नानास्ति किंचनेत्यादिः प्रत्यक्षं घटादिकार्यं· तंत्वादि। यतिरेकेण न दृश्यते। चेतन्यय
तिरेकेण च न किंचिद्दृश्यत इति। ऐतिह्यं महाजनप्रसिद्धिः। अनुमानं विमतं· मिथ्या दृश्यत्वात्। शुक्तिरजतवदित्यादि॥ 65
एवं प्रमाणचतुष्टयं। एतेष्वनवस्थानात्॥ एतैर्वा विचित्वा तस्य एवं सर्वानुगतं सत्यमात्मतत्त्वं पश्यन्· विकल्पस्य च मिथ्या
त्वात्ततो विरज्यते विरक्तो भवतीत्यर्थः।१७। ननु वेदोक्तं स्वर्गादिसुखोत्तमाया न विरज्येत इत्याह कर्मणामिति॥ आ २८
विरिंच्याद्ब्रह्मलोकपर्यंतं अदृष्टमपि सुखं· अमंगलं दुःखरूपम्। नश्वरं पश्येत्॥१८॥ स्कं ११।१९॥ कीदृशी भा
गवतधर्मानुष्ठानज्ञानवैराग्यपूर्विका भगवति भक्तिरुदेतीत्याकांक्षायामुक्तं यथनीशरूपादिभिः॥ यद्युनीतः ॥१६।२॥
असक्तः। तर्हि आस्तामिदं· मद्भक्तैव कृतार्थो भविष्णतो स्यादाह मयानि॥ मदर्थ्येरोन॥२२॥ स्कं ११।११॥ कर्मनिर्वि
॥१६।२ शुद्धसत्वसंतानं योगं भक्तिमाह श्रद्धालुरिति द्वाभ्यां॥ अभिनयन्· स्वयमनुकुर्वन्॥२३॥ सनातने नित्यमपि आचरन्नेतस रामः
॥२०।१॥ वमानः॥२४॥ तथा॥ भक्तियोगमकारणमाह॥ भक्तियोगं पूर्वमुक्तमेव· तथापि तस्मिन्न प्रीतिं प्राप्नुवते· तुभ्यं पु ॥८॥
॥२०।१ नश्च कथयिष्यामि॥१९॥ श्रद्धेति। अमृताश्रवणादरः शश्वदिति सर्वेत्तानषज्जनेन मदनुकीर्तनं श्रावणानेत

रं·मत्कथा मात्वानमित्यर्थः॥२०॥२१॥ मदर्थे अंगचेष्टा लौकिकी क्रिया· वचसा लौकिकेनापि मद्गुणानामीरणं कथनं॥
२२॥ मदर्थे मद्भजनार्थं तद्विरोधिनोर्थस्य परित्यागः॥ भोगस्य तत्साधनस्य चंदनादेः सुखस्य पुत्रोपलालनादेः।
इष्टादि· वैदिकं यत्कर्म तदपि· मदर्थं कृतं भक्तेः कारणमित्यर्थः॥२३॥ एवमिभिः॥ भक्तिः प्रेमलक्षणा संजायते
तस्य भक्तस्य अन्यः कोर्थः साधनरूपः साध्यरूपो वाऽवशिष्यते सर्वोपि तेन एव भवतीत्यर्थः॥२४॥ स्कं॥११॥१९॥
॥५२।१॥ तथा स्कं॥ तस्मादिति प्रकारः॥ उत्तमश्लोके यो ज्ञानमिच्छुः श्वापदब्रह्मणि वेदारम्भे· साधनो निष्ठां तं न त्वङ्गं॥ अन्यथास
शायनिराशं कृत्वा योगात्परे च ब्रह्मण्यपरोक्षानुभवेन निष्ठां तं· अन्यथा संबोधसंवारा योगात् परब्रह्मणि निष्ठां ते
पद् त्वयोतकमात्· उपशामाश्रयामिनि॥२१॥ तेचनि॥ गुरुरेवात्मदैवतं च यस्य सः॥ अनन्यत्वा मामेवमायैर्धर्मैः॥ वस्तुन
आत्मात्मप्रदश्चोपासकानां· यथा बलिप्रभृतीनां॥२२॥ प्रश्नोधितामनि॥ हितेषु दयां समेषु मैत्रीं· उत्तमेषु प्रश्र ॥१३।१॥
यं च· शिक्षेदित्यर्थः॥२३॥ शौचं बाह्यं मृज्जलादिभिः आभ्यन्तरं च· अदम्भमानादि· शिक्षेत· तपः स्वधर्माचरणं॥ तिति
क्षां क्षमां मौनं वृथा वाचामनुच्चारणं· स्वाध्यायं· अधिकारानुरूपं वेदपाठादि· आर्जवं स्वच्छतां ब्रह्मचर्यं यस्य·
यादृगुचितं· आनुत्विदारनियमादि· अहिंसां भूतेष्वद्रोहं· द्वन्द्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोः ईशविष्या
२ वीसां दृशा हि सं॥२५॥ सर्वत्रेति॥ आत्मनः स्वरूपस्य सच्चिद्रूपेण क्षेत्रज्ञानि चित्रूपेणेश्वरान्वीक्षणं· कैवल्यमेकान्तशीलत्वं
निकेतनं गृहाद्यभिमानराहित्यं विविक्तचीरवसनं विजनेपतितानां वस्त्रखण्डानां अन्यजानां वा वल्कलानां वा परि

पंर

॥१०॥१॥
भ॰टि॰ स्वक्षामिति॥ भागते भगवत्प्रतिपादके· अभ्यस्तस्याचारादेर्या अभिव्यक्तिस्तां॥ मनसः प्राणायामैः· वाचो मौनेन कर्मणोऽनीहयादं
८ डास्तन्यथार्थभाषणं· शमदमौ अन्तःकरणबाह्येन्द्रियनिग्रहौ ॥२६॥ हेरुर्जन्मकर्म गुणानां श्रवणादि तदर्थे· द
पुट्टेशनमर्वं कर्म· विशेषतस्त्वयजनादियजन्· नत्वतदर्थं शिष्टेन ॥२७॥ इष्टं दत्तमिमादर्थ्योभावेन निष्ठाः॥ वेन्ने
सदाचारः। आत्मनः प्रियं गंधपुष्पादि· दारादीनपि आत्मत्वपरमेश्वराय निवेदनं· तत्सेवकत्वयासमर्पणं यत्नतः
॥१०॥२॥ शिष्टेन ॥२८॥ एवमिति। कृत्स्न एवं आत्मानात्मश्वपेषां· कृत्स्न एवात्मनो जीवस्य नाथो येषामिति वा। तेषु उभयत्रस्था 66
वरजंगमेत्वयापरिव्यर्थानां विशेषतो तत्सुतत्त्वापि साधुषु· स्वधर्मशीलेषु ततोऽपि मद्भक्तेषु भागवतेषु· २९॥ ते श्रमस्सां
मयत्नावनं भागवधर्माः तत्स्परस्परानुकथनं शिष्टेन ॥३०॥ एवं वर्णैर्मानानां परमानन्दप्राप्तिमाह· स्मरन्त इति द्वयेन॥ भ ॥१०॥२
क्त्या साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या ॥३१॥ उपसंहरति तस्मादिति॥ भागवतधर्मान्त्ययाभक्त्या ॥३२॥ स्कं ११ अ॰ १०॥२॥
॥ तस्मादेवं विधैः शास्त्रीयै रुपायैर्मनःशुद्धिं संपाद्य तत्तच्छास्त्रीयानुपायान्स्वानिपात्रितेजनैर्बुद्धिसौकर्याय भूमिकाभेद
नदर्कुप्रतिजानीते॥ ॥उपायाः प्रथमस्कन्धे नारदेन प्रदर्शिताः॥ संक्षेपान्नन्दरूढवत्से भूमिभेदविभागतः इति॥ ॥ता
ने वा साप्रथमं मदत्तां मेवत्स्यादिना॥ मदतां सेवाप्रथमभूमिका· एवं॥ तामामुदाहरणाजिथ्या॥ व्यासनारदसंवा शामः
॥१०॥२॥ ग देनारदः॥ अहमिमान्यादि॥ स तत्तेनोदरिकथाश्रवणादिफलं स्वस्वं नान्तेनप्रपंचयति॥ अहंपुरा पूर्वकल्पे· अतीतभवे ॥२॥
पूर्वजन्मनि वेदवादिनां दास्याः सकाशात् आत्मजातोऽस्मि· निरूपितः नियुक्तः। कयोगिनां शुश्रूषणाय प्रावृषि वर्षोपल

ष्ठितेना चातुर्मास्ये निर्विविक्षतां निर्वेश्यं एकत्र वासं कर्तुमिच्छतां॥२३॥ अपेतानि निवृत्तानि चापलानि यस्मात्तस्मिन् दांते नियतेंद्रिये। अधृतक्री
डनके। मत्क्रीडासाधनके। अनुवर्तिनि अनुकूले॥२४ उच्छिष्टस्य लेपान्· पात्रलग्नान्नलेशान् विप्रैरनुज्ञातः सन्· भुंजे स्म· तेन भोजनेन अपास्तकिल्वि
षो जातोस्मि· तेषां धर्मे परमेश्वरभजने एवात्मनो रुचिः प्रजायते स्म· रुचिरनुरागः॥२५॥ तत्र अन्वहं श्रुतवानस्मि· मत्कादुपाक
मैव स्थितः सिद्धपानलत्सेत· वलाज्ञानितपा· अतो ममेस्पापोनष्टः स्थ· प्रियश्रवा यशो यस्य॥२६॥ तस्मिन् भगवति लब्धरुचेर्मम
अस्खलिता· अप्रतिहता मतिरभवदित्यनुषंगः॥ ययाहमेतत्प्रपंचजातं ते उ रूपेण मयि सदसत् स्थूलसूक्ष्मं चैतन्यब्रह्मणि स्वमा
यया· स्वाविद्यया कल्पितं। नतु वस्तुतोऽस्तीति जानन्त्स्वरूपेण पश्यामीति॥२७॥ एवं शुद्धत्वंपदार्थज्ञाने दर्शिते दिक्षेपानिह
नैतन्मात्रेणाभूत् रजस्तमोनिवर्तिका दृढा भक्तिर्जातेत्याह· इत्थमिति। हे यशः· अनुसवं त्रिकालं॥२८॥ तस्यैवमिति॥ अनुरक्तत्वे पदोपस·
दृढभक्तिसक्तो मे· प्रश्रितस्य विनीतस्य·॥२९॥ गुह्यतममिति साधनभूतधर्म· तत्त्वज्ञानं गुह्यं· तत्साक्षाद्विविक्तात्मज्ञानं गुह्यत
रं· तत्साक्षात्स्वरूपज्ञानं गुह्यतमं भगवतोदितं भागवतं शास्त्रं अन्ववोचन् उपदिष्टवंतः॥३०॥ तदेव ज्ञानं पूर्वोक्तं· त्वंपदार्थज्ञाना
द्विवेकेन दर्शयति॥ येनैवेति। अविदं ज्ञातवानहं॥३१॥ तत्साधनधर्मरहस्यं च सूचितमित्याह। एतदिति॥ तापत्रयस्याध्यात्मि
कादेः चिकित्सितं भेषजं निवर्तकं सम्यक्साधकमिति यावत्। किं तत्· भगवति भावितं समर्पितं यत्कर्म तत्। किंभूते भगवति ईश्वरे
सर्वनियंतरि। एवमपि वं· ब्रह्मणि। अपरिपूर्णे हृतया॥३२॥ ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वं। सत्यमित्याह। भेदेन
चिकित्सितस्य दृष्टांतमाह द्वाभ्यां· आमयो रोगः येन घृतादिना जायते तेन तदेव केवलं आमयः प्रकारांतरेणाभूतं द्रव्यं तमामयं न पुना
ति न निवर्तयतीत्यर्थः। किंतु चिकित्सितं द्रव्यांतरैर्भावितं सत् पुनात्येव· यथा॥३३॥ आत्मविनाशाय कर्मनिरोधाय· कल्पंते समर्था भवं

भ·र·वि· तिपरेश्वरेकस्मिन्नाश्रिताः संतः। स्वतत्वप्रथमं महत्सेवातत्र स्वतंत्र स्वतंत्ररूपानंतस्वतंत्रदुर्गमत्वज्ञानतो भगवत्कथाश्रवणं ततो भगवतिरतिः
१० ॥ तथाचदेहद्वयविवेकात् मज्ज्ञानं·ततो दृढाभक्तिः। ततो भगवत्तत्त्वज्ञानं·ततस्तत्स्वरूपयाः सर्वज्ञत्वादिभगवद्गुणाविर्भावरतिक्रमोदर्शि
तः॥२४॥ ननु ज्ञानेनाज्ञानप्राप्तकर्मनाशात्ज्ञानं भक्तियोगाद्भवतीकेयं कर्मणां कर्मनाशः स्यान्नत्वाह यदनुध्यासिना॥२५॥ भगवद्रूपेण ज्ञि ।१८।१॥
यमाणं कर्म·भक्तियोगं जनयतीति सदाचारेणानुष्ठपयति। यत्र यदा भगवतः श्रियःपयकर्माणि कुर्वाणा भवंति·तदृशीकेस
गुणानामानि एवंतिनि। अनुस्मरंतिच·कथन्निति स्पर्शः॥२६॥ यं भगवत्क्रियायां दत्तरोचिषपदस्मासिपज्ञहाविदुत्ताविप्रत्तायत्तपस्व
सिकोऽत्तेयतत्कुरुस्वमहदुर्पाणामिति॥२६॥ कीर्तनस्मरणरूपभक्तिहेतुत्वमुक्त्वा तान्देहेतुत्वमाह ह्याप्यां। नमस्त्रिति॥ नमोधी ।१८।१॥
॥१८।१॥ महिमनस्तानमनं कुर्वीमुहि॥२७॥ शृण्वतामिति॥ स्वमुक्तिकं मंत्रोक्तमितिरिक्तमूर्तिस्मरणं॥ यजंते पूजयंति सपुमान्·सम्पदश्रीनोभ
वति॥२७॥ एवं च कृतनित्यमपि·स्वमहत्वाज्ञानतो हिकं हरिः दिन्नं वानित्यानि॥२८॥ स्वानिगमं स्वोपदेशं भयानाद्विनं·अर्वत्यं·
ज्ञात्वा भावं प्रीतिं त्वाकेश्रवः अवदादिति॥२८॥ श्लो॥१॥ अ·५॥ महत्सेवाद्वितीया भगवत्भक्तसेवा·सा साद्भगवत्सेवानं॥ तो
॥१८।१॥ त्राणायया॥ महत्सेवामिति॥ मोक्षवंधयोनिदानमाह। ततः सः संसारस्य द्वारं·योषितां ये संगिनस्तेषां संगं·महतां तत्सेवाम हता 67
द्रुनामसंतांनरदिति। साधवः सदाचाराः॥२॥ मयिरशोकृतं सौहृदं सेव अर्थः पुरुषार्थो येषांशाश्वेतामनिरपेक्षा स्पैनास्य तत्समं त्वे
स्थयंति·देहं विमन्यं नि देहंभराः विषयवार्त्तैवा। न धर्मविषयाः येषुतेषु जनेषु। जायादियुक्ते गृहे गृहेषु च याति मित्र्येषु नेवापा रा·मः
तन्तेऽजायादिपुदेषु·यावदर्थाश्चयावदर्थमेवाथीयेषामिति॥ मध्यमस्तदालोकितसभासः॥ इह नितर्हाहादिकस्य तात्र सोऽरस्य १०
॥१८।२॥ र्घः॥२॥५।५॥ प्रसंगमिति॥ आत्मसर्वस्यापि सत्तां गोमूत्रमित्यात्स्तप्रसंगमिति॥ स्वपाशं तनिरावरणं॥२०॥३॥२५॥ तितिते देवः इति॥ १८।२॥

॥१८।२॥ साधूनां लक्षणमाह चतुर्भिः ॥ साधवः शास्त्रानुवर्तिनः। साधुसुशीलं तदेव भूषणं येषां ते ॥२१॥ मयीति स्पष्टार्थः ॥२२॥ मदाश्र-
या इति। एतानुक्तलक्षणान् · तापा आध्यात्मिकादयो न तपन्ति न व्यथयन्ति। कुतः मद्गतचेतसां तान् · ये · तापेनाभिभूयन्ते साध-
॥१८।२॥ वः स्पर्थः ॥२३॥ मदाश्रयेति ॥२४॥ सत्संगस्य भक्त्यंगतामुपपादयन्ति सतामिति। वीर्यस्य सम्यक् वित् वेदनं यासु ताः वी-
र्यसंविदः। हृत्कर्णयोः रसायनाः सुखदाः तासां जोषणात् सेवनात् ॥ अपवर्गो ऽविद्यानिवृत्तिः। वर्त्म यस्मिन् हरौ प्रथमं श्र-
द्धा ततो रतिः ततो भक्तिः अनुक्रमिष्यति अनुक्रमेण भविष्यतीत्यर्थः ॥२५॥ स्कं० ३ ॥२५॥ यत्पादसंश्रयेति। किं च यस्य पादः
संश्रयो येषां अत एव प्रशमायनाः प्रशमः अयनं वर्त्म आश्रयो वा येषां ते मुनयः उपस्पृष्टाः संनिधिमात्रेण सेविताः सद्यः पुनन्ति। स्वर्धुनीगं-
गा तस्याः आपः तत्सादान्निस्नाताः न तु तत्रैव तिष्ठति· अनन्तसंबन्धेन · पुनन्ति सो ऽनुसेवया पुनन्ति न तु सद्यः। इति मुनीनामु-
॥१८।२॥ त्कर्षोक्तिः ॥१५॥ तुलयामेति। भगवत्संगिनो विष्णुभक्तास्तेषां संगस्य यो लवः। अल्पस्याल्पकालः। तेनापि स्वर्गं न तु लया-
मः समं न पश्यामः। न चापवर्गं· संभावनायां लोट्। मर्त्यानां आशिषो राज्याद्याः न तु लयाम इति किमु वक्तव्यम् ॥१३॥ स्कं० १। १८। दुर्लभ इ-
॥१८।२॥ ति मयापि दुर्लभं लब्धमित्याह बहवो देहा भवन्ति येषां ते देहिनो जीवास्तेषां क्षणभंगुरो ऽपि मानुषो देहो दुर्लभः पुरुषार्थसाधनत्वात् वैकुण्ठप्रियैः
तथा॥ नरोऽप्ययमिति न वशीकरोमि। योगः आसनप्राणायामादिः। सांख्यं तत्त्वानां विवेकः। धर्मः सामान्यतो ऽहिंसादिः। स्वाध्या-
॥१८।२॥ यो वेदजपः। तपः कृच्छ्रादिः। त्यागः संन्यासः। इष्टापूर्त्तं वै· तत्र इष्टमग्निहोत्रादि। पूर्त्तं कूपारामादिनिर्माणं। दक्षिणा-
॥१ शब्देन सामान्यतो दानं लक्ष्यते ॥१॥ व्रतानि एकादश्युपवासादीनि· यज्ञो देवपूजा· छन्दांसि· रहस्यमन्त्राः। नियमा
येषां वैकुण्ठस्य वा प्रियास्तेषां दर्शनम् ॥२९॥ हे अनघा निरवद्याः भवतः युष्मान् आत्यन्तिकं क्षेमं पृच्छामः यतः क्षणार्धकाललवोऽपि सत्संगः शेवधिः निधिर्लाभो यथा
नन्हो भवति तथात्र परमानन्द इत्यर्थः ॥३०॥ स्कं ११ ॥ २ ॥ ४५

×सतपःस्वाध्यायईश्वरप्रणिधानानि पंचा ॥×१+ सत्यास्तेयब्रह्मचर्यापरिग्रहाः पंच यमाः×१२२

भ.र.विं. :शौचसन्तोषौ। यमाः अहिंसादयः ॥ सत्संगो मां यथावरुन्धे वशीकरोति ॥२॥३॥४॥ त्वाष्ट्रो वृत्रः। कायाधवः प्रह्लादः।५। अंत्यजा अव

११ वानरः गृध्रो जटायुः। वणिक्पथस्तुलाधारः। व्याधो धर्मव्याधः। यज्ञपत्न्यः द्विजभार्याः।६। तेषां सत्संगमंतरेण साधनांतरा

॥१२॥१॥ भावमाह ते नाधीतश्रुति ॥ न अधीता श्रुतिगणा यैः। न दर्शनेन उपासिता महत्तमा यैः। न तथा। किं च अव्रता अतप्ततपसः। न व्रता

नि येषां न तप्तानि तपांसि यैः। ते च तेन तथा सत्संगादिति सद्भिः संगो नाम मय्येव संगः इत्यभिप्रेत्योक्तं। यद्वा स्वसंगस्यापि स

त्संगत्वं विवक्षयन् स्वस्यापि सत्त्वात्। यद्वा मत्संबंधिनां संगादित्यर्थः ॥७॥ तत्र वृत्रादीनां भवतु नाम कथंचित्साधनांतरं गोपी

॥१२॥१॥ प्रभृतीनां तु नास्त्येवेत्याह केवलेनेति ॥ सत्संगलब्धेन केवलेनैव भावेन प्रीत्या नगाः यमलार्जुनादयः। यं द्वात्तदानीं त

न सर्वतरुगुल्मादीनामपि भगवति भावोस्तीत्यभिप्रेत्योक्तं भगवतैव। अहो अमी देववरामरार्चितं पदांबुजं ते सुम

नःफलार्हणं ॥ नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतमिति। मायादिसिद्धांतकृतार्थाः संतः ईयुः प्रापुः

॥१२॥१॥ ॥८॥ स्वप्राप्तेर्दुर्लभतामाह यमिति ॥ योगादिभिः कृतप्रयत्नोऽपि यं न प्राप्नुयात्तं मां ईयुरिति पूर्वेणान्वयः ॥ अत्र च प्रथ

॥ मं या गोप्यः पश्चाद्यो वाश्चीलेन सह संगताः तेषां ततः तत्संगान्येषां सत्संगः। तेन च ते मां भक्तिरिति ज्ञातव्यं ॥९॥ रामेणा

गतास्ते वा वृषपर्वादीनां ॥ श्लो ॥१०॥११॥ अत्र १२॥ एवं ताश्च अबलाः केवलं मत्कामाः। अस्वरूपविदः स्वरूपं तु न जानंतीत्यापि

जारं बुद्ध्या जारबुद्ध्यैव परमात्मसंगात् ब्रह्मस्वरूपमेव मां परमं प्रापुरित्यर्थः ॥१३॥ तस्मादेवं भूतान् मत्संगजनप्रभावः। तस्मात्त्वं रामः

॥१२॥१२ ॥ चोदनां श्रुतिं प्रतिचोदनां स्मृतिं च। प्रवृत्तिनिवृत्तिविधिनिषेधं च उत्सृज्य ॥१४॥ मां शरणं याहि। मयि गात्कुतो भयं स्याः भवे॥१५॥ ॥११॥

॥

स्कं ॥११॥१२॥ इति भक्तिरसविन्दौ प्रथमा भूमिका ॥१

भूमिका नाम चित्तस्य अवस्था विशेषः ॥ ॥

68

तद्यापात्रतानन्तः॥ तेषां महतां दयालवविषया स्वकार्यैः सुशीलादिगुणैर्भवन्ति॥ तेच गुणा भगवतोक्ताः॥ कृपालुरिति ॥१२॥१॥
॥ तत्र त्रिंशल्लक्षणैः साधुं निरूपयति॥ कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदपि अकृतद्रोहः तितिक्षुः क्ष
मावान् सत्यं सारं स्थिरं बलं यस्य सः अनवद्यात्मा असूयादिरहितः सुखदुःखयोः समः यथाशक्ति सर्वेषामुप
कारकः॥२९॥ कामैरक्षुभितचित्तः दान्तः संयतबाह्येन्द्रियः मृदुः अकठिनचित्तः शुचिः सदाचारः अकिंचनो परिग्रहः
। अनीहः दृष्टादृष्टक्रियाशून्यः मितभुक् लघ्वाहारः शान्तः नियतान्तःकरणः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः
मुनिः मननशीलः॥३०॥ अप्रमत्तः सावधानः गंभीरात्मा निर्विकारः धृतिमान् विपद्यपि अकृपणः जितषड्गुणः ते
षणा॥ क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः। एते जिता येन सः। अमानी न मानाकांक्षी अन्येभ्योपि मानदः कल्पः
परबोधने दक्षः मैत्रः अवंचकः कारुणिकः करुणयैव प्रवर्त्तमानः न दृष्टलोभेन। कविः सम्यक्ज्ञानी॥३१॥ ११।११॥ तथा मद्भि
॥१२॥१॥ न्नामित्रे॥ दक्षः अनलसः निर्ममः जायादिषु ममतारहितः। गुरौ नु दृढसौहृदः असत्वरः अव्यग्रः अमोघवाक् व्यर्थालापरहितः
एतामेव त्रिंशल्लक्षणानि ज्ञेयानि।पाद्मा। ननु जायादिषु कथं निर्ममः स्यात् तत्राह। जायेति। औदासीन्यं देहेऽनुविवेकेन द ॥१२॥२॥
र्शयति॥ आत्मनोर्थे प्रयोजनं सर्वत्र सममभिव्यञ्जयन्निति॥ अयं भावः सर्वदेहेषा मनः एकत्वाज्जायादिदेहे अस्मिंश्च दे
हे आत्मनोर्थः सुखादिः सम एव केनचिद्विशेषेण एतेष्वेव ममत्वाभिनिवेशो रूक्षेवमुदासीनः सन् गृहं प्रपद्यते इति॥७॥ ११
॥१२॥२॥ उदाहरणं प्रह्लादः॥ यथा॥ तेस्येति॥ नारद उवाच॥ तमेवं दृष्टं वक्रुमादौ सुतस्स महत्वमाह। तस्येत्यादिना। गुरोर्महान् अप्रमत्तः

[illegible]

भ·र·वि गुणानेवास्मरद्युपासकश्चेत्यादिना॥२०॥सत्यासंधायप्रतिज्ञायस्य·एक एवप्रियश्चसुहृत्तमश्च॥२१॥समयकतनत्तश्चार्याणामंत्रु
१२ योयेन·ईश्वरस्तत्रिभावनायस्य·॥२२॥ भससनेषुनोद्विग्नचित्तः॥गुणेषुविषयेषु·निस्पृहः॥यत्नस्तेषुअवस्तुदृक·दांतेन्द्रिया
दयोयस्यरहितंश्रीप्रसुरभावोमत्सतद्विपृस्या·अस्तुरोपिसन॥२३॥स्कं·११४॥ एतादृशाशिष्यगुणोभावेनुज्ञातोपिमहत्तम
संगोनिरर्थकइति॥द्वितीयाभूमिकापिद्विविधा॥स्वप्रपन्नोऽन्यपेक्षोनन्यापेक्षाश्च॥तत्राद्यायथा॥तप्रेति॥अथप्रकारःगत ॥१९॥२॥
प्रहृष्टमानाशिसदृशाकांक्षि·क्षितिनीलकंठोपस्यतत्त्वमात्र॥२४॥ श्रीरुद्रउवाच॥ सूपमितिं॥ वेदिषदः वर्हिषदः विकीर्षितं ॥१९॥२॥
भगवदर्पितयत्नंविदितं॥२७॥ अनगृहकारागारायः साक्षाद्वासुदेवंप्रपन्नः सहिमेप्रियः। कथंभूतंरुद्रः। सूक्ष्मात्
त्रिगुणात्प्रधानाज्जीवसंज्ञितात्मस्वरूपात्परं·प्रकृतिपुरुषयोर्नियंतारमित्यर्थः॥२८॥ तत्किंतस्यमहत्तमत्वादित्याहस्व
धर्मनिष्ठःपुमान्·शतजन्मभिर्विरिंचतांप्राप्नोति·ततोपिपुण्यातिशयेनमामेति। भागवतस्तु·अथस्वदेहांते अव्याकृतं
प्रपंचातीतंवैष्णवंपदमेति। यथाहंरुद्रोभूत्वाऽधिकारिकः वर्तमानः त्रिवर्गादेवाश्चाधिकारिकाःकल्पांतेऽधिकारांते ६९
लिंगभंगेसतिएष्यंति॥२९॥ अथभागवतत्वाद्यूयंमेप्रियाःस्थ भवद्भिरपिमयिप्रीतिःकार्या इत्याशयेनाहभवद्भ्योभाग
वतानांवप्रियानास्ति॥३०॥ अतःइदंजप्तव्यं·जपतामितिविविक्तमसंकीर्त्यपिधामवंति॥३१॥३२॥स्कं·४।२४॥ इत्यादौरुद्रप्र
॥२०॥१॥ चेतसंसंवादः॥यथाध्रुवनारदसंवादेध्रुवः। स्वप्रपन्नापेक्षालोयमिति॥स्कं·४।८।३५॥ अथेति। तात स्वभावंप्राप्नुवन्नः अतएवअश्रु ॥२०॥१॥ रामः
विनीतस्यदुर्वचसातोभिन्नेहृदिनमायेनानतिष्ठति॥३६॥ अस्मेरत्नोधिष्ठितंत्रिभवनेऽप्युत्कृष्टंपदंजेतुमिच्छोर्मे·साधुवर्त्ममार्गं १२

कं

॥स्कं।४।८॥

॥२०॥१॥ ब्रूहि हरेः॥ अकजरतिपाठे उक्तसंगा ज्ञानेयो नारदः सोभवानुः। मन्त्रलिंगं विनुदन्नः वाद्यनः हिताय श्रूटतिरूप॥४२॥ नारद उ॰
जननेति। निःश्रेयसस्य अभिप्रेतार्थस्य पंथाः कोसौ विष्णुतत्त्वाह भगवान्वासुदेवः। अत एव तं भज॥४०॥ मधुवनाख्यं तटं गा
छ यत्र मधुवने हरेः सान्निध्यं॥४२॥ रूपादोस्वप्रपन्नापेक्षा॥ इति भक्तिरत्नावल्यां द्वितीया भूमिका॥२॥ आकल्पावने षां धर्मेषु
॥२०॥१॥ ॥तदुक्तं॥ अस्य शोषिति प्रकारः। ननु समस्तमेव कर्म निर्मूलनी हरिकथारतिः तथापि तस्मां सुचिन्तौ मघने कौकुमत्वः॥ पुण्यतीर्थनिषेव
णादिभिर्निःपापस्य महत्सेवा स्यात् ततश्च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः॥१६॥ यदनुध्यासिनेति॥ भक्तिरहितो धर् ॥२०॥२॥
मैः केवलं आमरणं प्रपंचितं रहितानां तु भक्तेर्मुक्तिफलत्वं प्रपंचयति। यस्मानुध्या अनुध्यानं सैवासिः खड्गः तेन युक्ताः विवेकिनः ग्र
न्थिमहंकारं निबद्धां तियत्कर्म तत्र छिंदंति तस्य कथायां रतिं को न कुर्यात्॥१५॥ स्कं॥१॥२॥ भागवत्संगतं तुल्यते तेनेति
॥२०॥२॥ कथां रतिं सोति ज्ञानमिति॥ यत्र यासु कथासु ज्ञानं भवति। कीदृशं ज्ञानं आ सर्वतः प्रतिनिरस्तं उपरतं गुणानां रागादीनां
वक्तं ममूहो यस्मात्तत्। तद्गुणत्वप्रसादस्य यत्र यासु मनःप्रसादहेतुः। गुणेषु विषयेषु संगो वैराग्यत्र। अभयत्रेतिपाठः
दृष्टानुत्रेयगुणेषु संगः केवलं मामेव संमतः। यं ध्यायो भक्तियोगः। निर्वृतः आवरणसुखेन अन्यत्रापि निवृत्तेत्ति तावान्ता
हिंसां च समत्वं द्वंद्वसंज्ञयोः ॥ सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततम् ॥ विविक्तचीरवसनं संतोषं येन केनचित् ॥
श्रद्धां भागवते शास्त्रेनिन्दामन्यत्र चैव हि ॥ मनोवाक्कायदण्डं च सत्यं समदमावपि ॥ श्रवणं कीर्त्तनं ध्यानं ह

ह

ध्ये२ दर्जोहुनं१ नू३

मनमः

नैष

रद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तदर्थेखिलचेष्टितं ॥ इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं दारान्सुतान्गृहान्प्राणान्यत्पर
स्मै निवेदनं ॥ एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं ॥ परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ परस्परानुकथनं पावनं भग
वद्यशः ॥ मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ इति भागवतान्धर्मान्शिक्षन्भक्त्या तदुत्थया ॥ नारायणपरो
मायामञ्जस्तरति दुस्तरामिति ॥ ॥ तस्मादेवंविधैः शास्त्रीयैरुपायैः मनःशुद्धिं संपादयेदिति सर्वः ॥ शास्त्रीयानु[illegible]पाया
न्निपत्तितो ज्ञानवुद्धिसौकर्याय भूमिकाभेदैर्वक्तुं प्रतिजानीते ॥ उपायाः प्रथमस्कंधे नारदेन प्रदर्शिताः ॥ संक्षे
पात्तदहं वक्ष्ये भूमिभेदविभागतः ॥ स्पष्टम् ॥ ॥ तानेवाह ॥ प्रथमं महतां सेवा तद्दयापात्रता ततः ॥ श्रद्धाथ तेषां
धर्मेषु ततो हरिगुणश्रुतिः ॥ ततो रत्यंकुरोत्पत्तिः स्वरूपाधिगतिस्ततः ॥ प्रेमवृद्धिः परानंदे तस्याथ स्फुरणं ततः ॥
भगवद्धर्मनिष्ठातः स्वस्मिंस्तद्गुणशालिता ॥ प्रेम्णोथ परमा काष्ठेत्युदिता भक्तिभूमिका ॥ ॥ यथा व्यासनारदसं
वादे नारदः ॥ अहं पुरातीतभवेभवं मुने दास्याश्च कस्याश्चन वेदवादिनां ॥ निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्वि
विक्षतां ॥ ते मय्यपेताखिलचापलेर्भके दान्तेधृतक्रीडनकेनुवर्तिनी ॥ चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयो
ल्पभाषिणि ॥ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः ॥ एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्म

सुरस्म १

य

४४

रामः

मन्मः

म्नाग्निपरिवर्त्तपरिणामरणाः ॥ न परिलसन्तिः केचिदपवर्गमपीश्वरान्वरणसरोजहंसकुलसंगविसृष्टगेहाः ॥ एवमसद्
पूल्नीयम ॥ एतावद्धर्मो मत्पर्यन्तसर्वफलनिरपेक्षस्य परवैराग्यसतिफलांतरे॰ प्रेम्णोऽनुदयात् ॥ परमानं
दल्पेपरमोऽमसेवप्रेमापराकाष्ठा मा रोदन्ति ॥ यथा वृत्रस्य ॥ अजातपक्षा इव मातरं खगां स्तन्यं यथा
न४ वत्सतराः क्षुधार्त्ताः ॥ प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वामिति ॥ अत एव ज्ञानं विना परवैराग्याभावात्तद
नुत्पत्तेर्भगवत्प्रेमपरमकाष्ठाया अनुदयात् ॥ तदर्थं ज्ञानवैराग्ये दृढीकर्त्तव्ये ॥ तदुक्तं ॥ असेवयायं प्रकृतेर्गुणानां ज्ञा
नेन वैराग्यविजृम्भितेन ॥ योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुन्धे ॥ ज्ञानवैराग्ययुक्तेन भक्तियो
गेन योगिनः ॥ क्षेमाय पादमूलं मे प्रविशन्त्यकुतोभयं ॥ इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ॥ भवन्ति वै गव७
भागवत भागवतस्य राजंस्ततः परां शान्तिमुपैति साक्षात् ॥ भागवतस्य भगवद्धर्मानुष्ठानं प्रथमं भगवत्प्रबोधः ॥ ततः परं वै
राग्यं ॥ ततः प्रेमलक्षणा भक्तिरिति ॥ एतच्च दर्शितमुद्धवाय श्रीभगवता ॥ ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संम
तः ॥ स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः ॥ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ॥ ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बि
भर्त्ति मां ॥ कीदृशं तद्ज्ञानमित्याकांक्षायां संक्षेपेण तदुक्तं ॥ त्वय्युद्धवाँश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्यपवर्ग न२
योर्यत् ॥ जन्मादयोऽस्य यदमी तव तस्य किं स्युराद्यन्तयोर्यदसतोऽस्ति तदेव मध्ये ॥ भगवदतिरिक्तं सर्वमागमापायित्वा

त्॥ स्वप्रवन्मायिकं दुःखरूपं वहेयं॥ भगवानेवैं स्वस्य प्रकाशरूपपरमानंदरूपो नित्यो विभुश्चो पादेय इति ज्ञानमित्यर्थः॥ भग
वद्भक्तास्तु चैतन्दवोक्तं॥ चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन॥ आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥ ते
षां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥ उदाराः सर्व एवैते ज्ञानी
त्वात्मैव मे मतं॥ आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिं॥ बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते॥ ॥
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥ वासुदेवानितरक्तं सर्वं नास्ति मायिकत्वात्॥ वासुदेवात्मकत्वात्प्रि
यतमः सततमर्थः॥ इतनादृष्टा ज्ञानपूर्वकं वैराग्यं दर्शितं॥ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं॥ प्रमाणे
ष्वनवस्थानाद्विकल्पात्स विरज्यते॥ कर्मणां परिणामित्वादाविरिंच्यादमंगलं॥ विपश्चिन्नश्वरं पश्येददृष्टम
पि दृष्टवत्॥ तथा च॥ कर्मण्यारंभमाणानां दुःखहत्यै सुखाय च॥ पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणां
नित्यार्त्तिदेन वित्तेन दुर्लभेनात्ममृत्युना॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः॥ एवं लोकं परं विद्यान्न
श्वरं कर्मनिर्मितं॥ सतुल्यातिशयध्वंसं यथा मंडलवर्त्तिनां॥ इति॥ का[illegible]भागवतधर्मानुष्ठानज्ञानवैराग्यपूर्वि
का भगवति भक्तिरुदेतीत्याकांक्षायामुक्तं॥ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलं॥ मयि सर्वाणि कर्म्मा

च

११।१९
१२

49

रामः

स्वां ४

स्का १ तत्रैवेष्टं फलरूपत्वात्तात्तनतः पूर्वपदत्वं साधनरूपत्वादित्यर्थः॥ तस्यैव लिंगं भूतरफलनिरपेक्षत्वेन मोक्षमात्रेस्पृहा गी २
लुत्वं॥ यथा मुचुकुन्दस्य॥ नकामयेन्यं तव पादसेवनादकिंचनप्रार्थ्यतमाद्वरं विभो॥ आराध्य कस्त्वामपवर्गदं हरे
वृणीत आर्यो वरमात्मबंधनं॥ तस्माद्विसृज्याशिष ईश सर्वतो रजस्तमःसत्वगुणानुबंधनाः॥ निरंजनं निर्गुणमद्व
यं परं ज्ञप्तिमात्रं पुरुषं व्रजाम्यहं॥ चिरमिह वृजिनार्त्तस्तप्यमानोनुतापैरवितृषषडमित्रोलब्धशांतिः कथंचित्॥
शरणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि मापन्नमीशेति॥ ॥ एतादृशाद्यात्याश्च भगव
त्प्रेमाणं परां काष्ठामधिरोहतीति तं प्रति भगवतोक्तं॥ क्षात्रधर्मस्थितो जंतून्न्यवधीर्मृगयादिभिः॥ समाहितस्तत्त
पसा जह्यघं मदुपाश्रयः॥ जन्मन्यनंतरे राजन्सर्वभूतसुहृत्तमः॥ भूत्वा द्विजवरस्त्वं वै मामनेवब्रसयास्यसी = मामुपैष्यसि केवलमिति॥
ति॥ तपसा परं वैराग्यं सूचितं॥ तेन च प्रेम्णः परमा काष्ठा नत्विदानीमेव कृतार्थता परवैराग्याभावेन भक्तिपू
र्त्त्यभावात्॥ तस्यैव कृतकृत्यहेतुत्वादित्यर्थः॥ परवैराग्यस्य लिङ्गं मोक्षपर्यंतसर्वफलनिरपेक्षत्वं॥ यथाहेमं लोकंत
थैवामुमात्मानमुभयायिनं॥ आत्मानमनु ये चेह ये रायः पशवो गृहाः॥ विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखं
॥ भजत्यनन्यया भक्त्या तान्मृत्योरतिपारये॥ ॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत॥ दीयमानं न गृह्णंति

भ॰ पो॰
१५

विना मत्सेवनं जनाः ॥ नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः ॥ येन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौ-
रुषाणि ॥ न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजः (
प्रपन्नाः ॥ प्रह्लादः ॥ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ॥ नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ पृथुः ॥
न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणाम्बुजासवः ॥ महत्तमांतर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमे
ष मे वरः ॥ ध्रुवः ॥ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वमहि
= कर्मदायियमासिना । छिद्यमानाद्विमानात् पततां जनानां [illegible] किं स्यात् ॥ =
मन्यपि नाथ मा भूत्किं त्वंतकासिलुलितात्पततां विमानात् ॥ महिष्यः ॥ न वयं साध्वि साम्राज्यं स्वाराज्यं भोज्यम
प्युत ॥ वैराज्यं पारमेष्ठ्यं वा आनंत्यं वा हरेः पदम् ॥ कामयामह एतस्य श्रीमत्पादरजः श्रियः ॥ कुचकुंकुमगंधाढ्यं मू
र्ध्ना वोढुं गदाभृतः ॥ इन्द्रः ॥ प्रसेनीताः परमभवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्रत्यबोधि ॥ कालग्र
स्तं कियदिदमहो नाथ शुश्रूषतां नो मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किं ॥ [illegible] ॥ यस्य भक्तिर्भगवति हरौ निःश्रे
यसात्मनि ॥ विक्रीडतोऽमृतांभोधौ किं क्षुद्रैः खातकोदकैः ॥ [illegible] ॥ नौ नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिप
त्यं ॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा विरहय्य कांक्षे ॥ श्रुतयः ॥ दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहा
न

ता

स्व

रामः

90

चिरहृप्यधकमा॰५ ६१७०

दृत्तिदः

लक्षणो जीवः साक्षित्वेन मवस्थितः ॥ यर्हि संसृतिबंधोयमात्मनो गुणवृत्तिदः ॥ मयि तुर्ये स्थितो जह्यात्त्यागस्त
द्गुणचेतसां ॥ अहंकारकृतं बंधमात्मनोर्थविपर्य्ययं ॥ विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत् ॥ याव
न्नानार्थधीः पुंसो न निवर्त्तेत युक्तितः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥ असत्वादात्मनोन्येषां भावानां त
त्कृता भिदा ॥ गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृ
ता इति निश्चितार्थाः ॥ संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत मांखिलसंशयाधीं ॥ एवं जि
ज्ञासयापोह्य नानात्वभ्रममात्मनि ॥ उपारमेत विरजं मनो मर्य्यर्प्य सर्वग इति ॥ अयमत्र निष्कर्षः ॥ चित्ते स्वा
कारसमर्पका ये विषयास्ते भगवद्व्यतिरिक्ता न भवन्ति अध्यस्तत्वात् ॥ भगवत एव सद्रूपतया घटः सन्नित्या
दिसदाकारेणैव सर्व्वविषयाणां स्फुरणात् ॥ सर्वं खल्विदं ब्रह्म तज्जलानिति श्रुतेः ॥ भगवदेकोद्भवत्वे भगवदे
कलयत्वेन सद्रूपवद्भेदावबोधनात् ॥ स्वप्नादिप्रपंचवद्बाध्यत्वाच्च ॥ अत एव भगवदाकारस्फुरणात्ते सर्वेपि
वर्त्तमानास्तद्रूपा एव भवन्ति ॥ अधिष्ठानज्ञाननिवर्त्तित्वादज्ञानानां ॥ एवं च सति विषयानिष्ठः सर्वोपि प्रमाम
णवत्स्वेवार्पितो भवति ॥ तद्व्यतिरिक्तास्फुरणात् ॥ एतादृशी चावस्था प्रार्थिता प्रह्लादेन ॥ वि॰पु॰॥ या प्रीतिर

×भगवदेकाधीनत्वे+३

हरिः५५

भ·यो·
१४

विवेकानां विषयेष्वनपायिनी॥ त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु॥ इति॥ तस्मादेतादृशानुक्त्या ऽनुसंधानेन सर्वविज्ञा
नसमात्रं परिपूर्णचिदानंदघनं भगवन्तं मद्रूपमात्मानं निश्चित्य ततः स्वाप्निकविषयेष्विव जाग्रद्विषयेष्वपि तुच्छत्वा
नुसंधानेन वैराग्यं मद्रूपजायते· वशीकाराख्यं॥ एतत्सूत्रितं भगवता पतंजलिना॥ दृष्टानुश्रविकविष
य·वितृष्णस्य वशीकारसंज्ञा वैराग्यमिति॥ चतुर्विधं हि वैराग्यं साध्यसाधनभावापन्नमागमप्रसिद्धं। तत्र मनोपु
यासेनापि चित्तदोषान्नष्टं निराकरिष्यामीत यत्नसाधनात्मकं प्रथमं यतमानसंज्ञं वैराग्यं। ततो निरंतरमुपायानु
ष्ठाने क्रियमाणे एतावंतो दोषा इदानीं क्षीणाः एतावंतश्चाऽवशिष्यंत इति चिकित्सकवत्प्रतिलक्षणमवधानं
द्वितीयं व्यतिरेकसंज्ञं वैराग्यं॥ एवं प्रतिलक्षणभूमिकाद्वयाभ्यासं कुर्वतः सर्वतोभावेन बहिरिंद्रियाणां वि
षयप्रवृत्तिं अंतःकरणगतवासनायां सत्त्वामपि यासानतो पारकेंद्रियसंज्ञा वैराग्यं॥ एवं भूमिकात्रितयाभ्या
सादृष्टेषु वनितादिषु· आनुश्रविकेषु च· स्वर्गादिष्विंद्रियसंग समाणेष्वपि दोषदर्शनपरिपाकजन्यास्पृहात्मि
काया चित्तवृत्तिः सा वशीकारसंज्ञा वैराग्यं॥ तदपि द्विविधम्॥ अपरं परं च॥ द्वितीयं सूत्रितं पतंजलिना॥ तत्परं
पुरुषख्यातेर्गुणवैतृष्ण्यमिति॥ पुरुषख्यातेरात्मज्ञानादनंतरंपद्गुणेषु शब्दादिविषयेषु· वैतृष्ण्यं वैराग्यं त

+ह्लष
श्रि×
षय

+र्सं×५
९१
तं२ णाः

धानंतसरस्मतत्स्वरूपेनाभिप्रायेण ।। सूत्रविरोधादिति भावः ।। भगवतो कारतानुविन्नस्य स्वाभाविकी ।। तस्य
विन्नकारणीभूतस्य स्वकारणं निर्वचनीयविचित्राऽनेकशक्तिमन्मायाधिष्ठानस्य विभोः सर्वान्तर्यामि नः
सर्वज्ञानुगतत्वात् । यथा घटस्य जलादिपूर्णता कारणसाध्या· आकाशपूर्णतानुत्पन्नः तस्य सर्वव्यापकत्वा
त्वात् तद्वत् उक्तं च वार्त्तिककारपादैः ।। विषयत्वस्वभावानुरोधादेव न कारणात्· विषयत्वसंपूर्णतो स्वतो कुंभ
स्यैवं दृशो धियाम् ।। घटदुःखादिरूपत्वं धियो धर्मादिहेतुतः ।। स्वतः सिद्धात्मसंबोधमाप्तिर्वस्त्वनुरोधतः
ता ।। विन्नस्य भगवदाकारतायां स्वाभाविकत्वेन हेतुत्वेन पक्षतायां शास्त्रस्य कोपयोग इति चेन्न ।। अन्याकारता
निरोधभगवदाकारतासंपादनरूपस्य वधो हि· यदि स्वाभाविकी भगवदाकारता विन्नस्य· विषयाकार
ता सहचरितत्वात् साधकत्वाच्च· ननु द्विरोधिनी शास्त्रजन्यानुसाधनोपक्रमे परोक्षेव भासमाना
साधनाभ्यासक्रमेण विषयाकारतां शनैस्तिरोदधती· साधनपरिपाकेन· अपरोक्षतां नीता सती तां स
मूलं चानमुपदन्तिं ।। अत एवोक्तं यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमद्गुण
=तथा च श्रीधरः । गुणाकृतानुहतं सरणं प्रथमाभजितपुरुषकृपाकथनादिभिः ।। धुनुत भक्तिरसेन विवेकिनो नादिषुनः सुखमंजनु

एवं धियां दृशां संपूर्णतापेक्षत्वस्वभावादेव न कारणात्·
कुम्भस्याप्यत्रो विषयत्वसंपूर्णता विषयत्वस्वभावानुरोधा
देव· एवं दृग्वस्तुस्वभावादेव न कारणात् स्वरूपैक्येतत्वं=प

कर्मजानि॥ तस्मिन्विशुद्धमुपलभ्यत आत्मतत्वं साक्षाद्यथामलदृशोः सवितुःप्रकाशः॥ यथाग्निना हेममलं ज
हाति ध्मातं पुनः स्वं भजते च रूपं॥ आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो मां॥ यथा यथा
त्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः॥ तथा तथा पश्यति तत्वसूक्ष्मं चक्षुर्यथैवाञ्जनसंप्रयुक्तं॥ वि
षयान्ध्यायतश्चित्तं विषयेषु विषज्जते॥ मामनुस्मरतश्चित्तं मय्येव प्रविलीयते॥ तस्मादसदभिध्यानं यथा
स्वप्नमनोरथं॥ हित्वा मयि समाधत्स्व मनो मद्भावभावितं॥ एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः
॥ सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा॥ सव कपिलदेवेनोक्तः॥ अनिमित्तनिमित्तेन स्वधर्मेणामला
त्मना॥ तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं॥ ज्ञानेन दृष्टतत्वेन वैराग्येण बलीयसा॥ तपोयुक्तेन योगेन
तीव्रेणात्मसमाधिना॥ प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशं॥ तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः॥ प्र न४
कृतिः स्वाभाविकी विषयाकारिकेत्यर्थः॥ हंसगीतायां च॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो॥ कथ
मन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोरिति सनकादिप्रश्नस्योत्तरं श्रीभगवानुवाच॥ मनसा वचसा दृष्ट्या गृ रामः
ह्यतेन्यैरपीन्द्रियैः॥ अहमेव न मत्तोन्यदिति बुध्यध्वमञ्जसा॥ जाग्रत्स्वप्नसुषुप्तं च गुणतो बुद्धिवृत्तयः॥ तासां वि

×म१

९२

[illegible]

दारुनोद्रु[illegible]

ह्यः। मन्नुपा विना कथमाह्यः सुद्रुतामन्विष्य कथं द्रवतावेन साविनाभावात् द्रवचित्तं च कथं रोमहर्षस्यानन्दाश्रु च विनाऽश्रा-
यत्वरूपमर्थः॥ अश्रुपुलकयोरभिधानं स्तंभस्वेदादीनामप्युपलक्षणम्॥ यतो द्रवत्वाभावो चित्तं न वास्यते अतो बुधाः
पण्डिताः कामक्रोधाद्यनास्पदीभूतपथिपतिनपाशास्त्रादिज्ञानं उपेक्षाज्ञानं संस्कारजनकत्वमित्याहुः॥ तथा चोक्तम्

काठिन्यं विषये कुर्याद्द्रवत्वं भगवत्पदे। उपायैः शास्त्रनिर्दिष्टै-
रनुक्षणमतो बुधः॥३२॥

तौन
न्यायवार्त्तिककृद्भिः॥ यन्न सुखसाधनं न च दुःखसाधनम्॥ तद्वेषोपेक्षणीयमिति॥ सुखसाधने रागः संस्कारहेतुः
॥ दुःखसाधने तु द्वेषः तथा॥ न द्रुमयाभावे तु चित्तं द्रवत्वाभावान्न ज्ञायते पटुसंस्कार इत्यर्थः॥ ॥ एतावान् हि स-
र्वेषां शास्त्राणां रहस्यभूतोऽर्थः॥ ॥ यद्विषयाकारतानिराकरणपूर्वकं चित्तस्य भगवदाकारतासंपादनं सर्वे-
षामपि शास्त्राणामत्रैव आकारभेदे पर्यवसानात्॥३१॥ ननु अनादिकालद्रवचित्तप्रविष्टानिष्टविषयको

ष्टिसंकोणिता चित्तस्य स्वभावमूर्च्छीतनेनैव तोयस्योष्णतारूवद्दहनस्य संवरिस्थितेव पवनस्य· कथं निवर्त्तिता माध
र्म्मिणोसमसत्तिवास्वभावोपमर्दासम्भवादित्यत्राह ॥ ॥ काठिन्यमिति ॥ ॥ विषयाकारताहीनचित्तस्य
स्वभावभूता· तस्य· आगन्तुकहेतुजन्यत्वात् ॥ तथाहि स्थूलविषयाकारताहेतुरिन्द्रियविषयसन्निकर्षादिजा
गरणे सूक्ष्मविषयाकारताहेतुर्मनोगतवासना स्वप्ने ॥ तदुभयाभावे तु· सुषुप्तिवन्निर्विषयमेव चित्तं भवति ॥ सु
षुप्तौ चित्तलयाऽभिधानं निर्विषयत्वाभिप्रायकमेव ॥ एतच्च भगवता सूत्रकारेणैव दर्शितम् ॥ तदाऽपीतेः
संसारव्यपदेशादिति ॥ अपीतिर्लयः ॥ मर्यादायामाङ् ॥ तस्य मनसो लयात्पूर्वकाले संसारव्यपदेशः त
तुलैलये सतीति सूत्रार्थः ॥ तथा च सुषुप्तावपि· पुनरुत्थानेंतु यत्केयं सूक्ष्मतामेमादिना मनोलयाभिधा
+१+ नसंसारव्यपदेशोस्य· सत्वान्नमनोलयः ॥ विवरणकाराणां +१+ ना ।

राम:

ह्युपलंभ इति कारिकार्थः सर्वा चेयं प्रक्रियास्माभिर्विस्तरेण प्रतिपादिता सिद्धान्तविवेके २४ एवमेतादृशं वाक्यमुदाहार्यमनेकशः चित्तस्य विषयाकारग्राहकत्वापर्यायादेते २५ ग्रंथगौरवभयान्नोदाह्रियते २५ पंचदशप्रकाराणां विचारणं श्रीपादैरप्ययमर्थो दर्शितस्तत्स्वरूपसंहारव्याजेनाह अतो मांसमयी योषित्काचिदन्या मनोमयी मांसमय्या अभेदेपि भिद्यतेत्र मनोमयी २६ मनोमय्याकारभेदं विनाप्येकस्मिन्भौतिके पिंडे भेदप्रत्ययायोगादित्यर्थः २६ भेदप्रतीतिमेव सर्वसिद्धांतमुदाहरति भार्यास्नुषाननांदा च माता भ्रातेत्यनेकधा जामाता श्वशुरः पुत्रः पितेत्यादिपुमानपि २७ भिद्यत इत्यनुषंगः २७ एकानेकत्ववैधर्म्यमुक्त्वा विनाशित्वाविनाशित्ववैधर्म्यांतरमाह बाह्यपिंडस्य नाशेपि तिष्ठत्येव मनोमयः अतस्थायीति विद्वद्भिरयमेव निरूपितः २८ अपि स्त्र्याद्देशकालादिनाव्यवधानेपि मनोमयोव्यवहित एवेत्यर्थः २८ एवं सामान्यतो भावस्वरूपमुपदर्शितं विशेषेणानुसर्वेषां लक्षणं वक्ष्यते पृथक् २९ मनोमयो विषयाकार एवाविनाशित्वात्स्थायिभाव इति कथितः तस्य तु रतिहासादिरूपेण भेदस्तल्लक्षणं च वक्ष्यते अनंतरोल्लास इत्यर्थः २९ यस्माद्द्रुतचित्तप्रविष्टो विषयाकारेणापायी न स्यात्॥ कै भगवंतं विभुं नित्यं पूर्णं बोधसुखात्मकं यद्गृह्णाति द्रुतं चित्तं किमन्यदवशिष्यते ३० विभुमिति सर्वदेशव्यापकत्वं नित्यमिति सर्वकाल

५नं२ व्यापकत्वं पूर्णमिति अद्वितीयतया सर्वद्वैतभ्रमाधिष्ठानत्वं बोधसुखात्मकमिति निरतिशयपुमर्थत्वं दर्शितं एतादृशेन भगवदाकारेण मनोगतेनानादिकालप्रविष्टासंख्यविषयाकाराणां केवलीकरणात्तन्मात्रपरिस्फूर्त्या कृतकृत्यो भवतीत्यर्थः॥ ३०॥ ॥ ३०॥

भ.यो.
११

अथद्रवीभावस्यप्रयोजनं पूर्वोक्तमेवस्मारयन्निनत्रप्रपन्नदार्ढ्याय कठिनाधीर्नगृह्णात्येव॰शिथिलानुगृह्णात्यपिनवासयते॰द्रवीभा
वादिनिष्पन्नमेवोक्तं द्रवत्वाभावःकाठिन्यं ईषद्द्रवत्वंशैथिल्यं नचद्रवावस्थाकार्यभूतसात्त्विकभावाःस्वसंपन्ने नैच लभन्तेस्वेदाद्य

कठिनाशिथिलावाधीर्नगृह्णातिनवासयते उपेक्ष्याज्ञानमित्याहुस्तब्धाःप्रस्तरादिषु ३१ ७

94

रोमांचस्वरभंगौचवेपथुः वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्त्विकास्मृताः इत्यभिहिताः अतस्तस्मिन्भगवद्विषयेकाठिन्यंनिषिध्यते नतदश्मसारं
हृदयंबतेदंयद्गृह्यमाणैर्हरिनामधेयैः नविक्रियेताथयदाविकारोनेत्रेजलंगात्ररुहेषुहर्षः कथंविनारोमहर्षंद्रवताचेतसा
विना॥विनानंदाश्रुकलयाशुध्येद्भक्त्याविना

रा.न.१
११

ननद्रव्यत्वनिश्चयात्स्वगतस्वगुणवत्त्वं च भूतारम्भत्वं साध्यतां विशेषाभावात् न च विजातीयानामनारम्भकत्वं विशेषः सुवर्णस्तैजःपदस्त्वेवं कार्यम
सूत्रैश्च विजातीयैरेकपटारंभदर्शनात् तन्त्वावयवानंगीकारसंभवाच्चावयविनोऽस्तु जलांजलिप्रसंगात् तस्मादपंचीकृतपंचमहाभूता
न्दे३ रब्धसंश्लिष्टानं संकोचविकाशशीलं स्वच्छद्रव्यं चक्षुर्वन्मूर्तद्रव्याभिघातयोग्यं च देहपरिमाणं मनोऽभ्युपगन्तव्यं सिद्धान्ते सुखदुःखेच्छाज्ञानादी
नां तदाश्रयत्वाभ्युपगमात् तेषां च सर्वशरीरव्यापकत्वेनोपलंभात् तदाश्रयस्य मनसोऽपि सर्वशरीरव्यापित्वात् अणुत्वाभावे युगपत्सर्वेन्द्रि
यसंबंधसंभवाद्युगपन्नानाज्ञानोत्पत्तिप्रसंग इति चेन्न एकेनेन्द्रियेणैकदैकमेव ज्ञानं जन्यत इति नियमस्तावदावयोः समः अन्यथा युगप
च्चाक्षुषज्ञानद्वयोत्पत्तिः किं न स्यात् नानेन्द्रियजन्यज्ञानानां युगपदुत्पत्तिरिष्यत एव दीर्घशष्कुलीभक्षयतः शब्दस्पर्शरूपरसगंधानां युगप
दनुभवात् सुषुप्त्यनुपपत्त्या त्वङ्मनःसंयोगस्य ज्ञानमात्रकारणत्वेन त्वयाभ्युपगमात्तद्रसनावच्छिन्नत्वङ्मनःसंयुक्तस्य गुडस्य युगपद्र
सस्पर्शोपलंभस्त्वयापि दुर्निवारः तस्मात्तादृशस्याभ्युपगमे मनसि श्रुतिस्मृतिन्यायसिद्धविमतिः संभवति समनंतरमुत्पत्त्यपत्त्वनितिनिर्युक्ति
कत्वादुपेक्षितः विस्तरस्त्वस्मदीयवेदान्तकल्पलतायामभिसंधेयः १९ अतः स्वच्छस्वभावस्य सावयवस्य मनसो दर्पणादिवद्विषयाका
राकारकत्वं वेदान्तशास्त्रे सांख्यशास्त्रे च यन्निरूपितं तत्प्रामाणिकत्वादतिसमीचीनमित्याह परिणामि विषयाकारं मनो विषययोगतः इति
वेदान्तिभिः सांख्यैरपि सम्यङ्निरूपितं २० यद्यपि सांख्यानामाहंकारिकं मनः ब्रह्मवादिनां तु मते भौतिकमिति महान्विशेषस्तथापि विष

३

१०

याकारणस्फुत्वं समभिनितस्त्वउभयोरुपन्यासः २० द्रवीभावपूर्वकं चित्तस्य विषयाकारभजनमित्यत्र भाष्यकारवचनमुदाहरति मूषा
सिक्तं यथा ताम्रं तन्निभं जायते तथा घटादिव्याप्नुवच्चित्तं तन्निभं जायते ध्रुवम् २१ मूषापुटपाकयंत्रेन द्रावणाद्द्रवीभूतं ताम्रं यंत्रपतितमू
षाकारघटितोदरे मृदादिसंस्थानविशेषे सिक्तं भवति तत्तदुदरस्थसंस्थानाकारं भवति द्रुतत्वात् एवं रागद्वेषादिना द्रवीभूतं चित्तं च
क्षुरादिद्वारा यत्र सिक्तं भवति· स्वयमपि तद्विषयाकारं भवतीति कारिकार्थः यद्यप्यस्मिन्वाक्ये सामान्यत एव द्रवीभाव उक्तस्तथाप्यनुभवबलाद्राग
द्वेषादिविषये व्यवस्थाप्यते तदभावे तु शिथिलीभावमात्रमित्युक्तमधस्तात् २१ मनोविषया कारं विषयगतावरणनिवर्तकत्वादालोक
वदित्यनुमानमस्मिन्नर्थे प्रमाणमाह व्यंजको वा यथालोको व्यंग्यस्याकारतामियात् सर्वार्थव्यंजकत्वाद्धीरर्थाकारा प्रदृश्यते २२ व्यंजक
स्य तदाकारत्वाभावेन ज्ञानावरणनिवृत्तेरदर्शनादित्यर्थः २२ भगवत्पूज्यपादानामियमुक्तिः सप्रपंचिका तथा वार्तिककारैरप्ययमर्थो निरूपि
तः २२ व्यंजको वेत्याद्युक्तिर्वार्तिककाराणामपि युक्तिरनुमानरूपं दर्शिता २३ वार्तिककाराणां वाक्यान्तरमुदाहरति· मातुर्मानाभिनिष्पत्तिर्निष्प
न्नं मेयमेति तत् मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्यते २४ मातुश्चिदविक्रियरूपान्तश्चित्कारादन्तःकरणात्· वृत्तिज्ञानाख्यस्य भावपूर्वकस्य मा
नशब्दवाच्यस्य परिणामविशेषस्याभिनिष्पत्तिर्भवति तच्च परिणामविशेषात्मकं मानं निष्पन्नं सत् चक्षुरादिद्वारा घटादिविषयपर्यन्तं गच्छ
ति शरीरावच्छिन्नमन्तःकरणमन्यत्र देव। कुल्याजलवत् ततश्च घटादिसंबद्धं सद्घटाद्याकारतां प्राप्नोतीति ततश्च तत्रैव तन्याभिव्यक्ताय

राम
१०

95

+वा+२

मान्यप्रकृतिकार्याःशब्दादयः इत्यनुमानेनसुखदुःखमोहात्मकप्रकृतिसिद्धिः ननुयत्सुखंनतत्सत्त्वंयद्दुःखंनतद्रजःयोमोहोविषादःसनतमइ
तिनस्यास्त्रिगुणात्मकत्वसिद्धिः ननुपरमाणुभिर्ब्रह्मणावार्थान्तरता परमाणोःकार्यकारणयोर्भेदाभ्युपगमेनैतेषामतीन्द्रियत्वेनचतदात्म
कतयाकस्यापिकार्यस्यप्रमीयमाणत्वाभावात् परमाणुषुप्रमाणाभावाच्च सर्गाद्यकालीनकार्योपादानानुमानस्यलाघवतर्कसहका
रेणैकोपाधीनविषयत्वात् क्षित्यादिकर्त्रनुमानस्यैककर्तृविषयत्ववत् ब्रह्मवादिनांकार्यकारणयोरभेदाभ्युपगमेपिनजगतोब्रह्मात्मना
प्रमीयमाणत्वंसंभवतिब्रह्मणःसर्वलौकिकमानागोचरत्वाभ्युपगमात्तद्रूपेणब्रह्मापिसर्वप्रमाणागोचरस्तथाचतदात्मनाकार्य
स्यप्रमीयमाणत्वमस्त्येवेतिचेत् किमनेनाकांडतांडवेनब्रह्मणोनिःसामान्यविशेषत्वेननानारूपासंभवइतिहिसांख्यसंख्यावताम
भिमानः १५ ननुभवतामप्यसिद्धोहेतुःसुखदुःखमोहानामान्तराणांब्रह्मघटादिनैतदात्म्यासंभवात् संभवेवासर्ववस्तुसर्वप्रमातारंप्र
तित्र्याकारतयाप्रतीयेतेत्यतआह त्रिगुणात्मकमेवैकंवस्तुत्र्याकारमीक्षते निजमानससंकल्पभेदेनपुरुषैस्त्रिभिः १६ ननावदान्त
रबाह्ययोस्तादात्म्यासंभवःबाह्यानामेवमनःप्रतिबिंबितत्वेनान्तरत्वात् नापिसर्वान्प्रतितुल्यभानप्रसंगः नन्तस्थवासनारूपसहकारिभेदात् +ह+२
१६ एतदेवोदाहरति कामिन्याःसुखताभर्त्रासपत्न्यादुःखरूपतांनंदलाभात्तयान्येनमोहत्वमनुभूयते १७ भर्त्तारंप्रतिकामिन्याःस
द्रि त्त्वांशएवोच्यते सपत्नींप्रतितुरजोंशःतांकामयमानमन्यंचतामविविंदतंप्रतितमोंशएव अत्रक्रमेणैषुसुखदुःखविषादाःप्रादुर्भवंति

+रेणैव१

96

=सु०३२

२

अतोव्यवस्थापपत्तिः वासनाभेदेनैकस्मिन्नपिभानभेदोभट्टाचार्यैरुक्तः परिव्राट्कामुकशुनामेकस्यांप्रमदातनौ कुणपःकामिनीभ
क्ष्यमितितिस्रोविकल्पनाइति १७ फलितमाह एवंसतिसुखाकारःप्रविष्टोमोनसेयदा तदासोस्यापिभावत्वंप्रतिपद्यस्तोभवेत्ः
क्रोधादिभावस्यापिरजस्तमोमिश्रितसत्वोद्रेकनिबंधनचित्तद्रुतिफलितत्वात्सुखमयत्वमभिप्रायः ड वीभावस्यसत्वधर्मत्वान्नवि
नानस्थायिभावानांसत्वगुणत्वस्यचसुखरूपत्वात्तदेवैषांभावानांसुखमयत्वेपिरजस्तमोंशमिश्रणात्तारतम्यमवगंतव्यं अतोनसर्वेषुरसे
षुतुल्यसुखानुभवः उपरिष्टाच्चस्पष्टीकरिष्ये १८ अत्राहुस्तार्किकाः नित्यंनिरवयवमणुपरिमाणंमनः तस्यकथंसावयवजतुदृष्टांते
नद्रवीभावरूपोविषयाकारपरिणामोवक्तुंशक्येन नहिनिरवयवस्यह्रासवृद्धीसंभवतः तस्मादुक्तस्थायिभावनिरूपणमसंगतमिति
तत्राह परमाणवकरूपंचचित्तंनविषयाकृतिः इत्यादिमतमन्येषामप्रमाणादुपेक्षितं १९ आदिशब्दाद्विभुमनइतिप्राभाकराणां
समनंतरप्रत्ययएवोत्तरज्ञानकारणंनयामनइतिसौगतानांचमतंसंगृहीतं अयंभावःकरणत्वात्परश्वादिवदिंद्रियत्वाच्चक्षुरादिवन्मन
२नाउ सोमध्यमपरिमाणत्वमनुमीयते नचाणुमानेकिंचिद्वीजमस्ति नापिनित्येंद्रियत्वाच्छ्रोत्रादिवदितिविभुत्वानुमानंनित्यत्वस्यासिद्धत्वा
त् आकाशस्यापिनित्यत्वाभावेनतत्कार्यश्रोत्रस्यसुतरांनित्यत्वाभावात् अतएवनतस्यविभुत्वंत्वाभावान्मध्यमपरिमाणस्यश्रोत्रेणव्यभिचार एम
ः यदिंद्रियंयद्गुणग्राहकंतदिंद्रियंतद्गुणवदितिव्याप्तेर्यथाचक्षुरादेःस्वग्राह्यगुणवत्त्वारंभकत्वंसाध्यतेतथामनसोपिपंचभूतगुणाहकत्वे २

*विभुः ग्रा

=४कुमारादिसंत

×ढं×५

रसत्वोपपत्तेपिपरमानंदरूपतानुपपद्यत इति भगवान्परमानंदस्वरूपः स्वयमेवाह मनोगतस्तदाकारतामेति पुष्कलं बिंबमेवस्तुपाधिनिष्ठ
त्वेनप्रतीयमानंप्रतिबिंबमित्युच्यते परमानंदरूपश्चभगवान्मनसिप्रतिबिंबितः स्थायिभावतामासाद्यरसतामासादयतीतिभक्तिरसस्य
परमानंदरूपत्वंनिर्विवादम् नाप्यालंबनविभावस्थायिभावयोरैक्यं बिंबप्रतिबिंबभावेनभेदस्यव्यवहारसिद्धत्वात् ईशजीवयोरिव १०
नन्वेवंभगवदाकारस्यपरमानंदरूपस्यस्थायिभावत्वेनभक्तिरसस्यपरमानंदरूपत्वमस्तुकांतादिविषयाणांतुशृंगारादिरसानामतथात्वा
त्कथंपरमानंदरूपत्वमत आह कांतादिविषयेप्यस्तिकारणंसुखचिद्घनं कार्याकारतयाभानादावृतंमाययास्वतः आनंदाद्ध्येव
खल्विमानिभूतानिजायंते आनंदेनजातानिजीवंति आनंदंप्रयंत्यभिसंविशंतीत्यादिश्रुत्यापरमानंदरूपब्रह्मजगदुपादानमितिप्रतिपा
दितं जन्माद्यस्ययत इतिन्यायेनचतथैवनिर्णीतं उपादानाभिन्नंचसर्वंकार्यंमृदभिन्नघटवत्सर्वंचदृष्टं सर्वंखल्विदंब्रह्म·इदंसर्वंयद
यमात्मा सदेवसोम्येदमग्रआसीदित्यादिश्रुतिभिश्चतथैवप्रतिपादितं·तदनन्यत्वमारंभणशब्दादिभ्यइतिन्यायेनचनिर्णीतम् एवंसत्यपि
अखंडानंदस्याह्लादिनीयाकारेणभानेहेतुर्मायानिमित्तावारणविक्षेपाविन्याह कार्येति अकार्यस्यापिकार्याकारेणभानंविक्षेपः अखंडानं
दाकारेणस्वतोभासमानस्याप्यभासनमावरणं तदुक्तम् ऋतेर्थंयत्प्रतीयेतनप्रतीयेतचात्मनि तद्विद्यादात्मनोमायांयथाभासोयथा
तम इति ११ कथंतर्हितस्यभानमित्यत आह सदज्ञानंचतदस्तुमेयंकांतादिमानतः मायावृत्तिनिरोधानेवत्यासत्वोत्थयाक्षणं अज्ञान

97.

८

ज्ञापकत्वेनैवहि सर्वेषांमानानांमानता अन्यथास्मृतेरपिमानतापत्तेः अत्रानंदस्यस्वप्रकाशतयाभासमानंचैतन्यमेवतज्ज्ञं तस्यमानाश्र
शक्त्यानन्दावरणभङ्गस्याभावात् अतःकांतादिगोचरमानानामज्ञानज्ञापकत्वेनप्रामाण्यापत्तेरनवच्छिन्नंचैतन्यमेवविषयोवाच्यः अन्यथा
तद्योगात्सात्त्विकप्रमाणजनितापरोक्षवृत्त्यावरणतिरोभावेसतितत्तद्विषयावच्छिन्नत्वेनभासतेवस्तुतःपरमानंदरूपंविषयोपाधान
चैतन्यं अनवच्छिन्नस्वरूपमानाच्चनसर्वथामुक्तिः स्वप्रकाशत्वभंगोवा १२ ननुःकिमतआह अतस्तद्भावत्वमनुसिषनिपद्यते किंचि
न्मूर्तांचरसतांयान्तिजाड्यविमिश्रणात् १३ विषयावच्छिन्नचैतन्यमेवमनोवृत्त्यारूढतयाभावत्वंप्राप्यरसतांप्राप्नोतिनलौकिकरस
स्यापिपरमानंदरूपत्वानुपपत्तिः अतएवानवच्छिन्नचिदानंदघनस्यभगवतःस्फुरणाद्भक्तिरसेऽन्यूनाधिकमानंदस्यलौकिकरसेतुविषयाव
च्छिन्नस्यैवचिदानंदांशस्यस्फुरणात्तत्रानंदस्यन्यूनतैवतस्माद्भक्तिरसएवलौकिकरसानुपेक्ष्यसेव्यइत्यर्थः १३ इतिवेदांतसिद्धांतेस्थायिनो
रसतोदिता सांख्यसिद्धांतमाश्रित्यापितदुपपाद्यते स्थायिनोरसतेत्यनुषंगः १४ एतदेवोपपादयितुंसांख्यसिद्धांतंव्युत्पादयति त
मोरजःसत्त्वगुणमोहदुःखसुखात्मकः तन्मयीप्रकृतिर्हेतुःसर्वंकार्यंतदात्मकं १५ तथाहिसांख्याएवमाचक्षते सर्वभावाःसुखदुःखमोहात्म
कैकसामान्यप्रकृतिकाःसुखदुःखमोहात्मकत्वेनप्रमीयंतेतेतदात्मकसामान्यप्रकृतिकाः यथामृदात्मकतयाप्रमीयमानामृत्सामान्यप्र
कृतिकाघटशरावादयः अनुगतकारणातिरिक्तसामान्यानभ्युपगमान्नघटत्वादिनाव्यभिचारः सुखदुःखमोहात्मकत्वेनचैतेप्रमीयंतेतस्मात्सा

रा. म
८

Nepal Sanskrit University, Balmiki Campus, Kathmandu

यमानेयथासएवरंगःप्रतिभासते शैथिल्यावस्थाप्रविष्टोरंगस्तुनतथा एवंद्रवावस्थेचेतसियद्वस्तुस्वरूपंप्रविष्टंतत्काठिन्यदशापर्यंत
स्थितंतेनद्रवीभावांतरेणविषयांतरेगृह्यमाणोपिप्रकाशमानत्वाच्चेतसानत्यज्यते अतःसावासनेत्युच्यते शैथिल्यावस्थाप्रविष्टंतुन
काठिन्यावस्थापर्यंतंनतिष्ठति तिष्ठद्वाविषयांतरग्रहणसमयेचित्तेनत्यज्यतेइतिसावासनाभासइत्यर्थः अतएवयस्यैकदाद्रुतेचित्तेभ
गवदाकारताप्रविष्टासर्वदानहृवात्कृंत्योभवतीत्युक्तम् सर्वभूतेषुयःपश्येद्भगवद्भावमात्मनः भूतानिभगवत्यात्मन्येषभागव
तोत्तम इति सर्वभूतग्रहणसमयेपिद्रवावस्थाप्रविष्टभगवदाकारतायाएवप्रकाशनात्स्वतुरंगवत्सर्वभूतेषुभगवद्ज्ञानोपपत्तिःस
चभागवतोत्तमःएतादृश संस्कारस्याविनाशित्वादितिभावः अतएवब्रह्मविदेवैतादृशइत्यपास्तं तस्यद्रवावस्थायाअनपेक्षितत्वेनो
त्तममध्यमप्राकृतेषुगणनीयत्वात् अत्रतुद्रवावस्थापरिपुष्टोसर्वभूतेषुयःपश्येदित्यवस्थायांभागवतोत्तमउक्तः इषद्द्रवावस्थायांतु
वासनाभासेनेश्वरेतदधीनेषुबालिशेषुद्विषत्सुच प्रेममैत्रीकृपोपेक्षायःकरोतिसमध्यम इत्युक्तः एतादृगवस्थातोपीषद्द्रवावस्था
याउत्पद्यमानत्वमित्यर्थः यस्यचित्तेनवाद्रवस्थापुष्टा नापीषदुत्पन्ना किंतुतदर्थंभागवतधर्मानभ्यस्यतुतिष्ठतिसकाठिन्यावस्था
विनाशसामग्र्याविशिष्टः अर्चायामेवहरयेपूजांयःश्रद्धयेहते नतद्भक्तेषुचान्येषुसभक्तःप्राकृतःस्मृतः इत्युक्तः प्रकृतिरारंभस्तस्यांवर्तमा
नःप्राकृतःसाधनप्रारब्धभक्तिसाधनानुष्ठान इत्यर्थः इयमेवचद्रवावस्थाप्रणयानुरागस्नेहादिशब्दैरपिसंकीर्त्यते यथा विसृज

× तत्५८

×वा५२

तिहृदयन्नयस्यसाक्षाद्धरिरवशाभिहितोप्यघौघनाशः प्रणयरशनयाधृतांघ्रिपद्मः सभवतिभागवतप्रधानउक्तः प्रणयोद्रवावस्थासएवरसता
रङ्गैर्वर्धनसाधनम् तस्यांप्रविष्टस्यापुनर्विनिर्गमंहित्यर्थः ३ द्रवावस्थाप्रविष्टभगवत्स्वरूपभानस्यत्रिविधत्वादुत्तमभागवतोपि [redacted]
त्रिविधः तत्राद्यंप्रपंचस्यमानसहितं यथा खंवायुमग्निंसलिलंमहींचज्योतींषिसत्वानिदिशोद्रुमादीन् सरित्स
मुद्रांश्चहरेःशरीरंयत्किंचभूतंप्रणमेदनन्यइत्यादि अनेनप्राकृतोभागवतोत्तमः द्वितीयंप्रपंचमिथ्यात्वभानसहितं यथा तस्मा
दिदंजगदशेषमसत्स्वरूपंस्वप्नाभमस्तधिषणंपुरुदुःखदुःखं त्वय्येवनित्यसुखबोधतनावनंतेमायातउद्यदपियत्सदिवावभाति अ
नेनमध्यमोभागवतोत्तमः तृतीयंप्रकारद्वयेनापिप्रपंचभानरहितम् यथा ध्यायतश्चरणांभोजंभावनिर्जितचेतसा उत्कंठ्याश्रुकलाक्ष
स्यहृद्यासीन्मेशनैर्हरिः प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः आनंदसंप्लवेलीनोनापश्यमुभयंमुने अनेनोत्तमोभागवतोत्तमः सा
धनाभ्यासपरिपाकेनोत्तरोत्तरभूमिकालाभः ८ द्रवावस्थाप्रविष्टविषयाकारस्यानपायित्वेनस्थायिशब्दोपितत्रमुक्तएवनपारिभा
षिकइत्याह स्थायिभावगिरांतोसौवस्त्वाकारोभिधीयते व्यक्तश्चरसतामेतिपरानंदतयापुनः विभावानुभावव्यभिचारिसंयोगेनाभि
व्यक्तःस्थायीभावएवसभ्यामितेयोभेदतिरोधानेनसम्भोगानएवसन्नयस्मान्स्वसाक्षात्काररूपेणरसतामाप्नोतीतिरसविदांमर्यादानुक्रमा
चार्यमतेन विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति अनेनभक्तेरपिरसत्वंवक्तुंस्थायीभावोनिरूप्यतइतिभावः ९ स्थायिभावस्य

+म+३

वश्यकत्वाच्च भक्तिसुखोद्रेकाणंनस्यादिति चेन्न एवमेवनआयादितं आत्मारामाश्चमुनयोनिर्ग्रन्थाअप्युरुक्रमे कुर्वन्त्यहैतुकींभक्तिमित्थंभूतगु
णोहरिरित्यादिनाजीवन्मुक्तानामपिभगवद्भक्तिप्रतिपादनात्‌ तस्मादनुभववत्साधुचरणोपासनयाभगवद्भजनसुखंततःस्वयमेवस
माधानंप्रतिपन्नस्यमहत्फलंनिरूपयावनेन स्वग्रंथस्यनामकथनद्वारेप्रयोजनमुपदिशतिसुहृद्भावेन संसाररोगेनबलीयसाचिरंनिः
पीडितैस्तत्प्रशमैनिदिक्षितं इदंभवद्भिर्विबुधायथामतिंनिपीयतांभक्तिरसायनंबुधाः स्पष्टम् भगवद्भक्तेःरसरूपतयाप्रमथ
नांवक्तुंप्रथमंसामान्यलक्षणमाचष्टे द्रुतस्यभगवद्धर्माद्धारावाहिकतांगता सर्वेशेमनसोवृत्तिर्भक्तिरित्यभिधीयते भगवद्धर्मात्भगवद्गु
णश्रवणम् नतुधर्मज्ञानतदनुष्ठानपर्यंतंविवक्षितम् तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेदित्यत्रापिकेनाप्युपायेनेतिधर्मं तुअ
नुष्ठितेनार्पितेनसिद्धेनवाभगवद्गुणश्रवणेनेत्यर्थः तेनशिशुपालादेर्नाव्याप्तिः भगवद्गुणश्रवणेनवक्ष्यमाणकामक्रोधाद्युद्दीपनद्वा
राद्रवावस्थांप्राप्तस्यचित्तस्यधारावाहिकायासर्वेशविषयावृत्तिर्भगवदाकारेत्यर्थः तदाकारतैवहिसर्वत्रवृत्तिशब्दार्थोस्माकंदर्शने
अतःसाभक्तिरित्यभिधीयतेशास्त्रविद्भिः तथाचशास्त्रं मद्गुणश्रुतिमात्रेणमयिसर्वगुहाशये मनोगतिरविच्छिन्नायथागंगांभसोम्बुधौ
लक्षणंभक्तियोगस्यनिर्गुणस्यह्युदाहृतम् अत्राविच्छिन्नेतिधारावाहिकत्वदर्शिना यथागंगांभसोम्बुधाविति दृष्टान्तेनतदार्द्रतानिकेपिमन
सिद्रवावस्थामपिसर्वगुहाशयेमनोगतिरितिसर्वेशाकारता तेनाद्रवावस्थायांधारावाहिक्यपिवृत्तिर्द्रवावस्थायामप्याशुविनाशिनी

६
+शिति+२

साद्रवत्वधारावाहिकत्वयुक्तापि सर्वेशाविषयान भक्तिरित्युक्तम् एतदेव स्पष्टयितुं चित्तचेष्टितमाचष्टे चित्तद्रव्यं हि जतुवत्स्वभावात्कठि
नात्मकम् तापकैर्विषयैर्योगाद्द्रवत्वं प्रतिपद्यते जतुनो हि दहनात्मकतापकयोगमन्तरेण काठिन्यशान्तिर्न भवति सौरालोकादियोगेष्व
शिथिलीभावमात्रं न द्रुतिः सर्वसिद्धं एवं चित्तस्यापि वक्ष्यमाणकामादिविषयात्मकतापकसंयोगं विना न द्रवीभावो विषयमात्रसंयोगाय
रवेन प्रशिथिलीभावमात्रमिति तापकपदोपादानेन सूचितं ४ तानेव तापकानाह कामक्रोधभयस्नेहहर्षशोकदयादयः ताप
काश्चित्तजतुनस्तच्छान्तौ कठिनं तु तत् एषां लक्षणभेदाश्च प्रत्येकं वक्ष्यन्ते यद्विषये कामादीनामुद्रेकस्तद्विषये चित्तस्य द्रवीभावः पुन
र्विषयान्तरसंचारादिना कामादितिरोभावे काठिन्यमेवेत्यर्थः ५ द्रवीभावप्रयोजनमाह द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुना संस्का
रवासनाभावभावनाशब्दभागसौ नतु विनश्यता ज्ञानेन जनितस्तार्किकपरिकल्पित आत्मगुण इत्यर्थः ६ शिथिलिभावमात्रं तु मनोगच्छद्
तापकैः न तत्र वस्तु विशति वासनात्वेन किंचन नस्नीषदर्थं अतापकैरीषत्तापकैरित्यर्थः सोरालोकास्थानीयैर्योगे सति मनसः किं
चिदवयवविपरिणामं प्राप्नोति अतः शिथिलीभूते जतुनि वनाठशे मनसि न किंचिद्वस्तु वासनात्वेन विशति किंतु वासनावैलक्षण्येन तत्
दाभासत्वेनैव विशतीत्यर्थः ७ चित्तद्रुतो भवति वासनाशिथिलीभावे तु वासनाभास इत्यत्र विनिगमकमाह द्रवतायां प्रविष्टं स यत्का
ठिन्यदशां गतं चेतः पुनर्द्रुतौ सत्यामापतन्नैव मुञ्चति· द्रवावस्थाप्रविष्टं हि हिंगुलादिरंगस्य जतुनः पुनः काठिन्यापनयने कर्ष्यादिसंयोगेना

99

राम
६

+नि+

वेनत्र उक्तस्तत्रैव महतः परमव्यक्तमित्यत्राव्यक्तशब्दस्तत्प्रभवंशरीरमाचष्ट इति स्थितमानुमानिकाधिकरणे सूक्ष्मंतु तदर्हत्वादि
त्यत्र एवमत्र गुणानुवर्णन गुणानुवादशब्दौ तज्जन्यपदनियततया योज्यौ अन्यथापरमपुरुषार्थत्वायोगात् ननुतर्हिनामांनरोपणब्रह्मवि
द्यैव भगवद्भक्तिरित्युक्तम् तथाहि तमेतंवेदानुवचनेनब्राह्मणाविविदिषन्तियज्ञेनदानेनतपसानाशकेनेत्यादिश्रुत्यासर्वसुकृतसा
ध्यत्वेनब्रह्मविद्याप्रतिपादिता सर्वापेक्षाधिकरणेचतथैवनिर्णीता इहापिपूर्वोदाहृतवचनैः सर्वसुकृतसाध्यत्वेनलक्षणेनभग
वद्भक्तेर्ब्रह्मविद्यारूपतयाप्रतिपादनात्तस्याश्चनिरतिशयपुरुषार्थत्वस्यचतुर्लक्षणमीमांसयाप्रतिपत्तिविप्रतिपत्तिनिवारणेनव्यवस्था
पितत्वात् व्यर्थोयंविचारारंभइतिचेन्न स्वरूपसाधनफलाधिकारिविलक्षणयोर्भक्तिब्रह्मविद्ययोः द्रवीभावपूर्विकाहिमनसोभगवदा
कारतासविकल्पकरूपाभक्तिः द्रवीभावानपेक्षाद्वितीयात्ममात्रगोचरनिर्विकल्पकमनोवृत्तिर्ब्रह्मविद्या भगवद्गुणगरिमग्रथनरूपग्रंथ
श्रवणंभक्तिसाधनं तत्त्वमस्यादिवेदान्तमहावाक्यंब्रह्मविद्यासाधनम् भगवद्विषयेप्रेमप्रकर्षोभक्तिफलम् सर्वानर्थमूलाज्ञानानि
वृत्तिर्ब्रह्मविद्याफलम् प्राणिमात्रस्यभक्तावधिकारः ब्रह्मविद्यायांतुसाधनचतुष्टयसंपन्नस्यपरमहंसपरिव्राजकस्य यज्ञदानादिस
२सुकृत र्वसंहृतंसाध्यत्वंतुसमंभक्तिब्रह्मविद्ययोः स्वर्गविविदिषयोरिव यथाहि [redacted] स्वर्गकामोदर्शपूर्णमासाभ्यांयजेतेतिस्थितस्यस्व
र्गसाधनस्यसर्वेभ्यः कामेभ्योदर्शपूर्णमासाविति वाक्येनफलान्तरसाधनत्वमपिबोध्यते तथातमेतंवेदानुवचनेनेत्यादिनास्थितएवब्रह्म

॥अ४२

५ फलसाधनत्वे संयोगपृथक्त्वन्यायेन विविदिषासाधनत्वमपि बोध्यते एवं भक्तिब्रह्मविद्ययोरपि स्वर्गब्रह्मविद्ययोरिव फलसाधनभावाभा
वश्च तुल्यसाधनसाध्यत्वं च भविष्यति· सामग्र्येको हि कार्यैकं· ननु कारणमात्रैक्येतिप्रसंगात् ब्रह्मविद्यातिरिक्तत्वे भक्तेः स्वर्गादिवन्निरति
शयपुमर्थत्वं न स्यादिति चेन्न स्वर्गादेर्नियतदेशकालशरीरेंद्रियादिभोग्यत्वेन सर्वत्रोपभोक्तुमशक्यत्वात्· क्षयित्वपारतंत्र्यलक्षणदुः
खद्वयानुविद्धत्वेन निरतिशयत्वाभावेपि भक्तिसुखधारायाः सर्वदेशकालशरीरेंद्रियादिसाधारण्येन ब्रह्मविद्याफलवदुपभोक्तुं शक्यत्वा
त्· क्षयित्वपारतंत्र्यलक्षणदुःखद्वयानुबंधाभावेन निरतिशयत्वोपपत्तिः ननूक्तं त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पते
त्ततो यदि यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोभजतां स्वधर्मतः नैवं जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिम् स्म
रन्मुकुंदांघ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तन् गुणरागि यैरिह न ते यमं पाशभृतश्च
तद्भटान्स्वप्नेपि पश्यन्ति हि चीर्णनिष्कृताः इत्यादि अत एव दुःखासंस्पर्शित्वप्रतिपादनायास्पृष्टदुःखमिति विशेषणमुपात्तम्· 100
अत एव च न परिणामविरसेन स्वर्गादिना साम्यम् एतेनैव लौकिकरसवैलक्षण्यमपि व्याख्यातं तस्यापि शास्त्राविहितत्वेन पापस्पर्शहेतुत्वेना
यतो दुःखसंस्पर्शित्वात्· भक्तेस्तु दृष्टादृष्टफलतया महान्विशेषो वक्ष्यते नन्वेवं सति भक्तिसुखाद्वैराग्यासंभवेन मुमुक्षुत्वासंभवात्तदाधिका एन
रकचतुर्लक्षणमीमांसारंभो न स्यादिति चेन्न· सत्यम् भक्तिसुखासक्तान्प्रति तस्या अनारंभात् भजनीयस्वरूपनिर्णयार्थं भक्तानामपि तद्विचारस्या ५

वपादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् सा ब्रह्मणि स्वमहिम्नपि नाथ माभूत् किंत्वन्तकासिलुलितात्पततां विमानात् इत्यादय
: अत्र हि सर्वसुकृतसाध्यत्वेन सर्ववेदतात्पर्यविषयत्वेन चार्थान्निश्रेयसनिर्वृतिशब्दाभ्यां साक्षादेव पुरुषार्थत्वं दर्शितं गीतासु च योगिनाम
पि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो मत इत्यादि ननु भक्तियोगस्य साधनत्वमपि वदन्त्यन्यवादाः वासुदेवे भ
गवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकं अकामः सर्वकामो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन यजेत
पुरुषं परं केचित्केवलया भक्त्या वासुदेवपरायणाः अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः गीतासु च भक्त्या मामभिजानाति यावान्यश्चा
स्मि तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् इत्यादयः अत्रास्य साधनत्वेन साक्षात्पुरुषार्थत्वं स्पष्टमेवोक्तम् अत्रोच्यते साधन
फलभेदेन भक्तेर्द्वैविध्योपपत्तेरदोषः तथा हि भजनमन्तःकरणस्य भगवदाकारतारूपं भक्तिरिति भावव्युत्पत्त्या भक्तिशब्देन फलमभिधीयते
तस्य च निरतिशयपुरुषार्थत्वात्पूर्वोक्तवादानां प्रामाण्यमुक्तं तथा भज्यते सेव्यते भगवदाकारमन्तःकरणं क्रियतेऽनयेति करणव्युत्पत्त्या भक्तिश
ब्देन श्रवणकीर्तनादिसाधनमभिधीयते तस्य च स्वयं पुरुषार्थत्वाभावात्साधनत्ववादानामपि प्रामाण्यमविरुद्धम् यथा विज्ञप्तिर्विज्ञानमि
ति भावव्युत्पत्त्या विज्ञानमानन्दं ब्रह्मेत्यत्र विज्ञानशब्दो ब्रह्मणि वर्तते विज्ञायतेऽनेनेति करणव्युत्पत्त्या विज्ञानं यज्ञं तनुत इत्यादावन्तःकरणे व
र्तते तद्वत् एतच्च स्पष्टीकृतं प्रबुद्धेन स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुमित्यत्र करणव्युत्प

४
[illegible] ४२

न्याप्रथमभक्तिशब्दोभागवतधर्मेषुप्रयुक्तः द्वितीयस्तुभावव्युत्पत्त्याफले इतिभागवतान्धर्मान्शिक्षन्भक्त्यातदुत्थया नारायणपरोमायामंजस्तरति
दुस्तरामित्युपसंहारे प्रथमभक्तिपदस्यानेभागवतधर्मशब्दप्रयोगात्· नचयथाध्ययनस्याक्षरग्रहणात्मकस्याप्यक्षरग्रहणमेवफलम् गु
।र्वधीनत्वाभ्यांविशेषात् एवमत्रापिभागवतधर्मरूपाभक्तिरेवगुर्वधीनंसाधनं तदधीनत्वेनचनिष्ठांप्राप्तासतीसैवफलमितिनसाधन
फलमितिनसाधनफलभेदेनभक्तेर्द्वैविध्योपपत्तिरितिवाच्यम्· क्वचिद्रुदंत्यच्युतचिंतयाक्वचिद्धसंतिनंदंतिवदंत्यलौकिकाः नृत्यंतिगा
यंत्यनुशीलयंत्यजंभवंतितूष्णींपरमेत्यनिर्वृताइतिमध्येकृतकृत्यत्वपरामर्शात् यदित्वध्ययनफलस्याक्षरग्रहणस्यार्थज्ञानानुष्ठानादि
वद्भागवतधर्मजनितायाभक्तेरपिफलान्तरसाधनत्वंसमभविष्यत् तदापरंपुरुषार्थंप्राप्यनिर्वृतास्तूष्णींभवंतीतिकृतार्थतांनावक्ष्यत्
अपितुतदनंतरमनुष्ठेयांतरंनिरदेक्ष्यत् नचनिर्दिशति तस्मात्साधनफलभेदेनभक्तेर्द्वैविध्योपपत्तेःसाधनत्ववचनानांफलत्वव
चनानांचविषयविभागेनसर्वत्राविरोधःसिद्धः अयंध्रुवन्तिकान्तेयोनेत्यादितुफलसाधनयोःसमानम् फलरूपायाभक्तेरुदाह
रणतयावक्ष्यमाणत्वात् एवंच इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः अविच्युतोर्थःकविभिर्निरूपितोयदुत्तम
श्लोकगुणानुवर्णनं· निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविनापशुघ्नादित्या
दौसाधनवचनंफलपरतयायोजनीयं गोभिःश्रीणीतमत्सरमितिवत् अत्रहिगोप्रभवैःक्षीरैर्मत्सरंसोमंमिश्रयेदित्यर्थःस्थितःपू

राम
४

101

र्थ इति पक्षहानिः सुखं दुःखाभावश्च द्वौ पुरुषार्थाविति तार्किकाः तन्न लाघवेन सुखमात्रस्यैव पुरुषार्थत्वकल्पनात् इच्छाजनकत्वे
हि ज्ञानस्य सुखविषयत्वमवच्छेदकं न तु सुखदुःखाभावान्यतरविषयत्वं गौरवात् दुःखाभावस्य सुखपरिचायकत्वेनैवोपयोगः
एतन्न्यायनिबंधकारैराशंकितं दुःखाभावस्य सुखार्थत्वेनोपयोगे विहिते सुखस्यापि दुःखाभावार्थत्वेनोपयोगो वक्तुं शक्यते विनि
गमनाविरहात् तस्मात्तदुभयं पुरुषार्थ इति तदयुक्तं व्याप्यव्यापकभावस्यैव विनिगमकत्वात् यदा सुखं तदा दुःखाभाव इति हि
व्याप्तिः सर्वसंमता निरुपाधिसहचारदर्शनात् अतो दुःखाभावस्य सुखकालेऽवश्यंभावित्वात्सुखंपरिचायकत्वमुपपद्यते न त्व्या
पकत्वात् यदा दुःखाभावस्तदा सुखमिति न व्याप्तिः सुषुप्तिप्रलयादौ व्यभिचारात् अतो दुःखाभावस्य सुखव्यापकत्वांतेन तत्परिचाय ×भावाद्
कत्वं सुखस्य व्यापकं हि व्याप्यस्थितिहेतुत्वेनान्यथासिद्धं सुखस्य च न दुःखाभावो व्यापकस्तेन स्वतंत्रपुरुषार्थः दुःखाभावस्य सुखा =सुखमेव
र्थत्वेनोपयोगः सर्वसुखशून्यस्य दुःखाभावस्य मोक्षस्य पुरुषार्थत्वं तस्यादिति चेत् दीयतां जलाजलिस्तस्मै परमानंदरूपत्वेन तु तस्य
पुरुषार्थत्वं वेदान्तविदो वदंति अतो भगवद्भक्तियोगस्यापि दुःखासंभिन्नसुखत्वेनैव परमपुरुषार्थत्वमित्याहुः नित्यमसुखसंविद्रूप
मस्पृष्टदुःखमिति एतेन भक्तिर्न पुरुषार्थो धर्मार्थकाममोक्षेष्वनंतर्भावादित्यपास्तम् धर्मार्थकामानां स्वतःपुरुषार्थत्वाभावात्तज्जन्य
सुखस्यैव पुरुषार्थत्वे गौरवादननुगमाच्च धर्मजन्यत्वादिविशेषणानां परित्यज्य सुखमात्रं पुरुषार्थ इति स्थिते समाधिसुखस्यैव भक्ति

भ·यो·
२

सुखस्यापिस्वतंत्रपुरुषार्थत्वात् तस्यमोक्षसमीपवर्तितयामोक्षांतर्भूतत्वेयोगजधर्मजन्यतयाधर्मांतर्भूतत्वेवाभक्तिसुखस्यापिभा
गवतधर्मजन्यतयाधर्मांतर्भावस्यश्रद्धासऽन्त्यनिवक्तुंशक्यत्वात् भक्तस्यसंसारान्मोक्षस्यावश्यकत्वान्मोक्षान्तर्गतोवाभक्तियोगः
तस्मात्पुरुषार्थचतुष्टयांतर्गतत्वेनवास्वातंत्र्येणवाभक्तियोगःपुरुषार्थःपरमानंदरूपत्वादितिनिर्विवादम्·तस्यपरमानंदरूपतासु
पणादयर्त्वात्तरविभागमाह नवरसमिलितत्वाकेवलत्वेति स्पष्टमेतदुपरिष्टात्करिष्यते· मुकुंदस्तत्रभक्तियोगस्यविषयनि
र्देशः सर्वांतर्यामीसर्वेश्वरएवभक्तिरसालंबनविभावइतिवक्ष्यते ग्रंथादौचेदंमंगलमाचरितं· सर्वदासर्वकार्येषुनास्तितेषामम
मंगलं येषांहृदिस्थोभगवान्मंगलायतनोहरिरित्यादिस्मृतेः तदहंवंदनत्मीत्यभिधेयसंबंधनिर्देशः शास्त्रदृष्ट्येत्यमूलत्वनिवारणा
म् अखिलतुष्ट्याइतिप्रयोजननिर्देशः साधूनांतुष्टिर्हिस्वाभाविकी अन्येषामप्यनेनकथायुक्तिभिरसंभाव नाविपरीतभावनादीनिहृ
त्वांतःकरणशुद्धिरित्यभिप्रायः केचित्पुनर्भक्तियोगस्यपुमर्थत्वंसमर्थनवादाः श्रूयतामत्र· नह्यतोन्यःशिवःपंथाविशतःसंसृताविह वा
सुदेवेभगवतिभक्तियोगोयतोभवेत् धर्मःस्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः नोत्पादयेद्यदिरतिंश्रमएवहिकेवलम् दानव्र
ततपोहोमजपस्वाध्यायसंयमैः श्रेयोभिर्विविधैश्चान्यैःकृष्णेभक्तिर्हिसाध्यते भगवान्ब्रह्मकार्त्स्न्येनत्रिरन्वीक्ष्यमनीषया तदध्यवस्यत्कू
टस्थोरतिरात्मन्यतोभवेत् एतावानेवलोकेस्मिन्पुंसांनिःश्रेयसोदयः तीव्रेणभक्तियोगेनमनोमय्यर्पितंस्थिरम् यानिर्वृतिस्तनुभृतांन

102

एम
२

रूपः कर्म्मयोगोन्तःकरणशुद्धिसाधनत्वेन तत्पर्यंतमनुष्ठेयः तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न
जायत इति भगवद्वचनात् अंतःकरणशुद्धिसाधनत्वं च तस्य धर्मेण पापमपनुदतीति तस्माद्धर्म्मं परमं वदंति येन केन च यज्ञेनापि वा
×म× दर्विहोमेनानुपहतमना एव भवतीत्यादिश्रुतिसिद्धं ततश्चाद्रुतचित्तस्य निर्वेदपूर्वकं तत्वज्ञानं द्रुतचित्तस्य तु भगवत्कथाश्रवणा २×मवधि×२
×स्वधि×२ दिभागवतधर्म्मश्रद्धापूर्विका भक्तिरित्यवधित्वेन द्वयमप्युपात्तं ततोन्तःकरणशुद्ध्या कर्मसु निर्विण्णो यमनियमासनप्राणायाम
प्रत्याहारधारणाध्यानसमाधिलक्षणमष्टांगयोगमनुष्ठाय तैलधारावदविच्छिन्नं भगवदेकाकारप्रत्ययपरम्परात्मकैकाग्रतायोगं स
नः संपादयेत् यदारंभेषु निर्विण्णो विरक्तः संयतेन्द्रियः अभ्यासेनात्मनो योगी धारयेदचलं मनः धार्यमाणं मनो यर्हि भ्राम्यदा
श्वनवस्थितं अतंद्रितोनुरोधेन मार्गेणात्मवशं नयेदित्यादिभगवद्वचनात् तस्मिंश्च अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवं
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः इत्यारभ्यैतज्ज्ञानमिति प्रोक्तमित्यंतेन ग्रंथेन भगवद्गीतोपनिषदुपदिष्टो ज्ञानयोगः प्रतिष्ठि
तो भवति देहेंद्रियप्राणसंघातात्मकः सांख्येन सर्वभावानां प्रतिलोमानुलोमतः भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति निर्विण्णस्य
×विरक्तस्य× पुरुषस्योक्तवेदिनः मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ममार्चोपासनाभिर्वा ना
न्यैर्योग्यं स्मरेन्मन इत्यादिभगवद्वचनात् अत्र मनो यावत्प्रसीदतीति भक्तियोग एव ज्ञानयोगावधित्वेनोक्तः भक्तियोगं विनाम

ततः सम्यक्प्रसाराभावात् मनस्यजनिदोषान्म्यमित्यत्रापि स एव ममार्चायामनाभिर्वैर्निमयिचानन्ययोगेनभक्तिरव्यभिचारिणी
निज्ञानयोगान्तर्गतयासाधनभक्त्यान्यर्थः ततश्च प्रोक्तेन भक्तियोगेन भजतोमांसकृन्मुने कामाहृदय्यौनश्यंतिसर्वेमयिहृदिस्थितेइ
त्यादिभगवद्वचनानुसारिण्यासाधनभक्तिनिष्ठयानिखिलमपिप्रेमाणंभगवत्येवप्रतिष्ठायतः सकलविषयविमुखमनसामह
भागस्यकस्यचिद्भगवद्गुणगरिमग्रथनरूपग्रंथश्रवणाजनितद्रुतिरूपायांमनोवृत्तौसर्वसाधनफलभूतायांगाढंहीनभगवदाकारायां
विभावानुभावव्यभिचारिसंयोगेनरसरूपतयाभिव्यक्तोभगवदाकारतारूपरत्याख्यस्थायिभावः परमानंदसाक्षात्कारात्मकः प्रादुर्भव
ति सएवभक्तियोगइतितंपरमंनिरतिशयंपुरुषार्थंवदंति· तस्मान्मद्भक्तियुक्तस्ययोगिनोवैमदात्मनः नज्ञानंनचवैराग्यंप्रायः श्रे
योभवेदिह यत्कर्मभिर्यत्तपसाज्ञानवैराग्यतश्चयत् योगेनदानधर्मेणश्रेयोभिरितरैरपि सर्वंमद्भक्तियोगेनमद्भक्तोलभतेञ्ज
सा स्वर्गापवर्गमद्धामकथंचिपं दिवांछति· नकिंचित्साधवोधीरा· भक्ताह्येकान्तिनोमम· वांछन्त्यपिमयादत्तंकैवल्यमपुनर्भवं
नैरपेक्ष्यंपरंप्राहुर्निःश्रेयसमनल्पकम्· तस्मान्निराशिषोभक्तिर्निरपेक्षस्यमेभवेत् नमय्येकान्तभक्तानांगुणदोषोद्भवागुणाः साधू
नांसमचित्तानांबुद्धेःपरमुपेयुषामित्यादिवचनानि· तदनुभविनारभ्य दुःखासंभिन्नंसुखंहिपरमःपुरुषार्थइतिसर्वतंत्रसिद्धान्तः ध
र्मार्थकाममोक्षाश्चत्वारःपुरुषार्थाइतिप्रसिद्धिस्तुलांगलंजीवनमितिवत्साधनेफलत्ववचनादौपचारिकी अतोनसुखमेवपुरुषा

=दपि४

103

राम
२

भागवते। तमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशंखगदाद्युदायुधं। श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीतांबरंसांद्रप
योदसौभगं।१।महार्हवैदूर्यकिरीटकुंडलत्विषापरिष्वक्तसहस्रकुंतलं। उद्दामकांच्यंगदकंकणादिभिर्विरो
चमानंवसुदेवऐक्षत॥२॥ विष्णुपुराणे॥ फुल्लेंदीवरपत्राभंचतुर्बाहुमुदीक्षितम्॥ श्रीवत्सवक्षसंजातंतुष्टावाऽऽनकदुन्दुभिः॥१॥

भ॰ यो॰
१
गुरुः
२९४

श्रीगुरवेनमः ॥ पदनखनिविष्टमूर्त्तिभिर्योदशरूपतामिव वहन्निष्ठां यं समुपास्ते गिरीशस्तं वंदे नन्दमन्दिरे किंचित् १ ग्रंथा-
रंभे संभावितविघ्ननिवारणाय श्रीभगवदनुध्यानरूपं मंगलमंगीकुर्वन्नादौ प्रेक्षापूर्वकमधिकारिप्रवृत्त्यंगतयाभिधेयप्रयोजन-
संबंधानाचष्टे शिष्याग्रणीर्ग्रंथकारः नवरसमिलितं वा केवलं वा पुमर्थं परममिह मुकुन्दे भक्तियोगं वदंति निरुपमसुखसं-
विद्रूपमस्पृष्टतापं तमखिलतनुभृच्छास्त्रदृष्ट्यावयन्धि तत्र कर्मयोगः अष्टांगयोगो ज्ञानयोगो भक्तियोग इति चत्वारः पुमर्थत्वे-
न प्रसिद्धा योगाः योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कर्हिचित् इति भगव-
द्वचनैः अष्टांगयोगोपि ज्ञानयोगान्तर्गतो द्रष्टव्यः एकं सांख्यं च योगं च यः पश्यति स पश्यतीति भगवदुक्तत्वात् मन एकत्र संयु-
ज्याजितश्वासो जितासनः वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः इत्यादिनातस्यापि विधुत्यादनात् तत्र गर्भाधानपुंसवन-
सीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौडोपनयनानि चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पंचानां य-
ज्ञानामनुष्ठानं देवपितृभूतमनुष्यब्रह्मणामेतेषां चाष्टकाऽन्वष्टकापार्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्त
पाकयज्ञसंस्था अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि निरूढपशुबंधः सौत्रामणी चेति सप्त हविर्यज्ञसं-
स्था अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रोप्तोर्याम इति सप्त सोमसंस्था इत्यादिशास्त्रविहितो वर्णाश्रमधर्म

104
राम
१

भ॰यो॰
१११

श्रीगणेशो जयति॥ नमो गोपीजनवल्लभाय॥ अथ द्रवीभावस्य प्रयोजनं पूर्वोक्तमेव स्मारयन्नितत्प्रयत्नद्रावणाय॥ कठिना
पीनेगहृल्लास्येवः शिथिलानुगहृल्लस्यपिनवाप्यते। द्रवीभावाभावादिति पूर्वमेवोक्तं॥ द्रवत्वाभावः काठिन्यं। रूपद्रवत्वं शैथि
ल्यं तत्र द्रवावस्था काठिन्यमंतसात्त्विकभावाऽवसेयम्। ते च स्तंभस्वेदोथरोमांचः स्वरभेदोथवेपथुः॥ वैवर्ण्यमश्रुप्रलय इत्यष्टौ सा

कठिनाः शिथिला वापीनेगहृल्लाः तिनवाप्यते॥ उपदेशाज्ज्ञानमित्याद्युक्तदृष्टाः प्रस्तरादिषु॥ २१॥

त्विकर्म्मतः॥ रूप्यमि हि तासु अतः एवं भगवद्विषये काठिन्यं निंद्यते। तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः॥ न विक्रि राम:
क्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः॥ कथं विना रोमहर्षं द्रवता चेतसा विना॥ विनानंदाश्रुकलया शुद्ध्येद्भक्त्या विना १११
लो॰ गात्र रुहा॰

105

भक्तियोगः ४१०४

[illegible]आदुर्वे॥ भावस्य प्र[illegible]नन्तू वा क्रमेव स्मारयन्ति अप्रयत्ने दो[illegible]॥ [illegible]

नित्त्वा स्मृतो॥ उपे[illegible]मे भिन्ना दुरन्तु वा॰ पुरनरा दुःखा नृ॰॥ [illegible] नाधीन॥ [illegible] शिथिलो दुःख[illegible]

न वास्य नेः [illegible] दुर्वाद्यो [illegible]

प्रेमाख्यः विकासाख्यः

इष्टसमीहाजनितामनोविकृतिर्यासारतिः। कुतूहलकृतवचनवेषवैलादृप्यकृतोमनोविकारोहासः। इष्टविश्लेषजनितोऽरत्यनालिंगितोऽपरिमितोमनोविकारःशोकः॥

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा॰ जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः॰

उज्वलनाख्यः आहुत्याख्यः

अवज्ञादिकृतः प्रमोदप्रतिकूलोऽपरिमितोमनोविकारःक्रोधः। शौर्यदानदयान्यतमकृतोऽपरिमितोमनोविकार उत्साहः। अपराधकृतरवविकृतसत्वादिजनितोऽपरिमितोमनोवि

विचिकित्साख्यः

कारोभयं। अलग्यदर्शनस्पर्शनस्मरणजनितोऽपरिमितोमनोविकृतिर्जुगुप्सा।

४१०४

१०।१०।१०।१०००॥

॥ नवनागसहस्राणि नागेनागे शतं रथाः॥ रथे रथे शतं चाश्वा अश्वे अश्वे शतं नराः॥

नागाः २००८ रथाः १००००० अश्वाः १००००००० नराः १०००००००००० अक्षौहिणी

सप्रकाशिता::वर्तुर्द्धौ वरत्नानि सर्वेषां

वक्रवर्त्तिनामिति चतुर्थां भ्राटीकायां॥ अ २२।४॥